सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

५३ वर्षे | ज्येष्ठ-भाद्रपदपूर्णिमे
१-२ अङ्कौ | जून - सितम्बर, १९९८

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकौ

प्रो. श्रीकान्तपाण्डेयः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

५३ वर्षे
१-२ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
जून - सितम्बर, १९९८ ई.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राममूर्तिशर्मा, कुलपतिः, अध्यक्षः

१. **डॉ. उमाशङ्करशुक्लः**,
वेदवेदाङ्गसङ्कायाध्यक्षः

२. **डॉ. रामकिशोरत्रिपाठी**,
दर्शनसङ्कायाध्यक्षः

३. **डॉ. गङ्गाधरपण्डा**,
साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **डॉ. ब्रह्मदेवनारायणशर्मा**,
श्रमणविद्या-सङ्कायाध्यक्षः

५. **डॉ. सत्यव्रतशर्मा**,
आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. हरिश्चन्द्रमणित्रिपाठी**,
संयोजकः

❖ ❖ ❖

प्रकाशकः —
डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

मुद्रकः —
श्रीजी-कम्प्यूटर प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००१

प्राप्तिस्थानम्—
विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१. **वेदेषु पर्यावरणं तस्य रक्षणञ्च**
डॉ. रामाशीषपाण्डेय: १-१८

२. **यज्ञतत्त्वमीमांसा**
डॉ. राममूर्तिचतुर्वेदी १९-२६

३. **श्रीमद्भागवतप्रस्थाने शब्दस्वरूपस्य तत्प्रमाणत्वस्य च विमर्शः**
डॉ. विन्ध्येश्वरीप्रसादमिश्रो विनय: २७-४४

४. **निपातार्थनिर्णयसमीक्षणम्**
डॉ. परमहंसमिश्र: ४५-५४

५. **अष्टाध्याय्यां स्मृतानामाचार्याणां परिचयः**
डॉ. गिरिजेशकुमारदीक्षित: ५५-६२

६. **शाब्दबोधविमर्शः**
डॉ. रमाकान्तपाण्डेय: ६३-७२

७. **धर्मशास्त्रेषु बालानामधिकाराः**
डॉ. बनारसीत्रिपाठी ७३-८२

८. **साक्षिस्वरूपविमर्शः**
प्रो. रामकिशोरत्रिपाठी ८३-१००

९. **ब्रह्मणः सविशेषस्वरूपसमीक्षा**
डॉ. जयप्रकाशनारायणत्रिपाठी १०१-१०४

१०. **मीमांसाशास्त्रस्य वैधत्वम्**
डॉ. कमलाकान्तत्रिपाठी १०५-११२

११. **न्यायमीमांसामते निर्विकल्पकसमीक्षणम्**
ब्रह्मचारी श्रीसमतानन्दः ११३-१२०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. शब्दस्य प्रमाणान्तरत्वसाधनम्
श्रीविष्णुपदमहापात्रः १२१-१३६

१३. कान्तासम्मिततयोपदेशयुजे अभिज्ञानशाकुन्तलम्
डॉ. ददन-उपाध्यायः १३७-१५०

लघु-ग्रन्थमाला

देवीस्तोत्रम्
श्रीयशस्करकविः १-३७

तर्कचन्द्रिका
श्रीहरिरायः १-१९

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पादकीयम्

विश्वविश्रुतायास्सारस्वती-सुषमानुसन्धानपत्रिकायाः ५३ वर्षे १-२ अङ्कयोः प्रकाशनं दधानोऽहममन्दमानन्दमनुविन्दामि। पत्रिकायामस्यां प्रकृष्टपाण्डित्य-संवलितानां विदुषां शोधपूर्णा लेखाः प्रकाशिता भवन्ति। एतदुपक्रमे तत्तद्गवेषकाणां त्रयोदशशोधलेखाः, लघुग्रन्थमालाप्रकाशनयोजनानुगता '**देवीस्तोत्रम्**', '**तर्कचन्द्रिके**'ति ग्रन्थद्वयी च प्रकाशिता विद्यन्ते। तत्तच्छीर्षकानुरोधेन प्रस्तुताः सर्वेऽपि विषया नितान्तमुपयोगितां भजमानाः सन्ति।

सम्प्रति सर्वत्रैव देशे विदेशे च पर्यावरणविषयिणी चर्चा चर्चिता भवति, तदनुसारमस्माकं समेषां सर्वस्वभूतेषु वेदेषु पर्यावरणं तस्य रक्षणञ्च महता समारम्भेण समीक्षितम्। जगति सर्वेऽपि पदार्था येनावरणेन सर्वदाऽऽवृता भवन्ति, तदेवावरणं पृथिव्यप्तेजोवाय्वाकाशरूपं पञ्चभूतात्मकं तत्त्वं पर्यावरणपदव्यपदेश्यं भवति। साङ्गोपाङ्गतयैतत् सर्वमाधारीकृत्य प्रथमशोधलेखे विषयाः प्रतिपादिताः।

अस्माकं भारतीयचिन्तनधारायां निमग्ना ये तत्त्वद्रष्टारः ऋषयो मननशीला मुनयश्चासन्, ते पदार्थानां वस्तुतत्त्वसाक्षात्कारे तन्मनने च सततं संलग्नाः सन्तोऽनुसन्दधाना विश्वहितार्थं रात्रिन्दिवं प्रयतमाना आसन्। गुरुशिष्यमाध्यमेनाध्ययनाध्यापनादिपरम्परयाऽनुसन्धानात्मिका तदनुभूतिः पूर्वं सूत्रात्मकेन तदनु व्याख्यानात्मकेन रूपेण वाङ्मये दरीदृश्यते। सेयं भारतीयचिन्तकानामनुसन्धानात्मिका दृष्टिः। सूत्रपद्धतिमाधारीकृत्यैवेदानीं संस्कृतभाषायाः सर्वातिशायिमहत्त्वं वैशिष्ट्यञ्च पर्यालोच्यानुसन्धाय कम्प्यूटरयन्त्रोपयोगितायामस्माकं विचारकाणां भाषाविषयिणी दृष्टिः सर्वैः समर्थिता।

इह खलु निखिललोकव्यवहारनिर्वाहार्थं भाषैव जुषते प्रधानभावम्। अन्तरेण भाषां जना न प्रभवन्ति नैजमाशयं प्रकाशयितुम्, आशयमप्रकाशयन्तश्च किञ्चिदप्यनुष्ठातुन्न पारयेयुः। यद्यपि 'इङ्गितेन निमिषितेन चेष्टितेनाप्यर्थावगति'-रिति महाभाष्ये योगानुगतचेतसा शब्दानुशासनकर्मणि व्यापृतेन महावैयाकरणेन भगवता पतञ्जलिनाभिहितम्, तथापि तन्माध्यमेन सामान्यार्थबोधेऽपि स्पष्टार्थप्रतिपत्तिः शब्दद्वारैवेति तात्पर्यमवगन्तव्यम्। पशुपक्षिणामपि काचिद् भाषा भवति, तद्द्वारा तेऽपि स्वाभिप्रायं प्रकाशयन्त्यवगमयन्ति। अतो भाषाया महत्त्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वर्वर्ति। लोके प्रवृत्त्यादिप्रयोजकं किमपि ज्ञानं (प्रत्ययः) नास्ति, यः शब्दानुगमं विना भवेत्। शब्दार्थयोरभेदादर्थस्य शब्दप्रकाश्यत्वनियमानुरोधाद्वेति सर्वमपि ज्ञानं शब्दानुवेधपूर्वकं संसृष्टमिव भासते। उक्तञ्च भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।। (वा.प.,ब्रह्म-का.१२३)

पत्रिकायामस्यामन्ये ये शोधलेखाः सारस्वतसाधनारतैर्विद्वद्भिः प्रस्तुताः, यच्च लघुग्रन्थद्वयं 'देवीस्तोत्रम्, तर्कचन्द्रिके'ति निबद्धं वर्तते, तदर्थमहं सारस्वतीसुषमासंवर्द्धकान् मनीषिणो धन्यवादप्रदानपुरस्सरं सभाजयामि। यशस्विनः प्रकाशन-निदेशकस्य **डॉ०हरिश्चन्द्रमणित्रिपाठिनः** सत्प्रयासेन नूनमेवास्याः पत्रिकायाः प्रकाशनवर्षक्रमसातत्यं **सारस्वती-सुषमा**-संवर्द्धनञ्च सम्पत्ता। अस्याः पत्रिकायाः प्रकाशने दत्तावधानतया संलग्ना ये मुद्रका ईक्ष्यशोधका अन्ये वा महानुभावास्सन्ति, तेषां समेषामुत्तरोत्तरमुत्कर्षार्थं साम्बं शिवं प्रार्थये।

वाराणस्याम्
वसन्तपञ्चम्याम्,
वि.सं. २०५७

श्रीकान्तपाण्डेयः
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५३ वर्षे	ज्येष्ठ-भाद्रपदपूर्णिमे, वि.सं. २०५५	१-२ अङ्कौ

वेदेषु पर्यावरणं तस्य रक्षणञ्च

डॉ० रामाशीषपाण्डेयः

आचार्योऽध्यक्षश्च, संस्कृतविभागस्य

राँचीस्थ-मारवाड़ीमहाविद्यालये

(बिहार-प्रदेशः)

❀ ❀ ❀

'परि + आङ् + वृ + ल्युट्' इति निष्पन्नेन पर्यावरणशब्देन परितः आवृणोति यत्तत् पर्यावरणमिति ज्ञायते। येनावरणेन जना जीवा वा सर्वदावृतास्तिष्ठन्ति तदेवावरणं पर्यावरणं कथ्यते। मानवान् जीवान् स्थावरजङ्गमादिपदार्थान् वा परितः पृथिव्यप्तेजोवाय्वग्न्यादीनि यानि पञ्चतत्त्वानि विद्यन्ते, तैस्ते सर्वे आवृताः सन्ति। पञ्चतत्त्वैरावृता जीवाः पञ्चतत्त्वानां गुणैः पञ्चतत्त्वैर्वा नियमिताः सततं तेषामाश्रय एव तिष्ठन्ति। पञ्चतत्त्वानि प्रकृतिभूतानि बाह्यावरणरूपाणि जीवोपकारकाणि भवन्ति, यैः प्रभाविता जीवाः स्वकीयमस्तित्वं धारयितुं समर्था भवन्ति। जीवने येषां तत्त्वानां विशेषतः प्रकृतिभूतानां प्रभावो दृश्यते, तानि तत्त्वानि समग्ररूपेण पर्यावरणे परिगणितानि सन्ति।

वेदान्तप्रक्रियायामपि पञ्चतन्मात्राभिर्जायते स्थूलशरीरोत्पत्तिर्येन श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि क्रमशः प्रभावितानि भवन्ति[१]। सृष्टिप्रक्रियायामुपनिषदि प्राप्यते—'तस्माद्वा एतस्मादात्मनः

१. ज्ञानेन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।
मनोबुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम्।।
प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च।
समानश्चेति पञ्चैताः कीर्तिताः प्राणवृत्तयः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आकाशः सम्भूतः, आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीति'[१]। पञ्चतत्त्वैः प्रभावितानामिन्द्रियाणां विवरणमत्र द्रष्टव्यम्—

तत्त्वानि	**ज्ञानेन्द्रियाणि**	**विषयाः**	**कर्मेन्द्रियाणि**	**विषयाः**
आकाशः	श्रोत्रम्	शब्दः	वाक्	वाणी
वायुः	त्वक्	स्पर्शः	पाणिः	आदानम्
अग्निः	अक्षिः	तेजः, रूपम्	पादः	गमनम्
जलम्	जिह्वा	रसः	पायुः	मलोत्सर्जनम्
पृथिवी	नासिका	गन्धः	उपस्थः	प्रजननम्

पञ्चतत्त्वेषु गुणत्रयस्य सत्त्वरजस्तमाख्यास्यापि विद्यमानता भवति, यैः प्रभाविता भवन्ति जीवास्तेषामिन्द्रियाण्यपि जायन्ते प्रभावितानि। अनेनैव कारणेन जीवास्त्रिगुणात्मकाः प्रोच्यन्ते। तत्र सत्त्वगुणस्याधिक्ये रजसस्तमसो गौणत्वे च सात्त्विकाः, रजसः प्राधान्येऽपरयोस्तयोर्गौणत्वे राजसाः, तमसः प्राधान्येऽपरयोस्तयोर्गौणत्वे तामसाश्च जीवा भवन्ति। सामान्यतः प्रकृतिरियं त्रिगुणात्मिका। गुणवैशिष्ट्यादेव जीवेषु भिन्नता दृश्यते। नहि कोऽपि जीवः समानो गुणवैशिष्ट्यात्। पुनश्च गुणाश्रितैः पञ्चतत्त्वैराश्रिता जीवाः सर्वदैवाकाशादितत्त्वानां सन्तुलनमभिलषन्ति। तत्त्वानां सन्तुलनेनैव जीवानां स्थितिः सामान्या भवति। यदि पञ्चभौतिकतत्त्वेषु कस्मिन्नपि तत्त्वे विकृतिरायाति तदा तत्रासन्तुलनं निश्चितमेव। ध्यातव्यमस्ति यत् प्रकृतिभूतानां तत्त्वानां विकृतौ पर्यावरणं सङ्कटापन्नं भवति। पर्यावरणस्य प्रभावा जीवेषु जायन्त एव।

वैदिकसाहित्ये प्रधानभूतानां पञ्चप्रकृतितत्त्वानां समग्रजीवावरणानां महत्त्वप्रतिपादनाय संरक्षणाय च प्रेरणादीनि वैशिष्ट्येन वर्णितानि। सम्प्रति पर्यावरणस्य स्थितिः, पर्यावरणप्रदूषणम्, प्रदूषितस्य पर्यावरणस्य शुद्धिकणम् प्रदूषणाद्रक्षणञ्चेत्यादीनि विचार्य्यन्ते। पर्यावरणसम्बद्धज्ञानं जनाधिक्येऽस्मिन् वर्तमानसमये परमावश्यकमिति हेतोर्जनकल्याणाय राष्ट्रकल्याणाय विश्वकल्याणाय जनोद्बोधाय चात्र प्रस्तूयते।

खं वाखग्न्यब्धरित्र्यश्च भूतसूक्ष्माणि पञ्च च।
अविद्या कामकर्माणि लिङ्गं पुर्यष्टकं विदुः।। (पञ्चीकरणवार्तिके सुरेश्वराचार्यः)

१. वेदान्तसारे, भूमि० ३५ पृष्ठे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१.१ आकाशावरणम्

आ समन्तात् काशन्ते प्रकाशन्ते सूर्यादयोऽत्रेति आकाशशब्दस्य गगनं खमनन्तमन्तरिक्षमम्बरादयो भवन्ति पर्यायाः। आकाशस्य कृते प्रयुक्तमन्तरिक्ष-मन्तराक्षान्तं भवत्यन्तरे मे इति वा शरीरेष्वन्तरक्षयमिति वा[१]। अन्तरिक्षमिदं द्युलोक-पृथिवीलोकयोर्मध्येऽवस्थितं पृथिवीं यावत् शरीरेष्वन्तरमविनश्वरं विद्यते। यास्कादयः केचनाचार्या द्युलोकस्य स्थितिराकाशस्योपरि स्वीकुर्वन्ति तथा द्युस्थानीयदेवेषु सूर्यादेः स्थितिं दर्शयन्ति[२]। सामान्यतो द्युलोकोऽपि आकाशशब्देनैव गृह्यते[३]। शब्दगुणकमाकाशमित्यनेन शब्दस्य सम्बन्धः कर्णेन सह विद्यते। कर्णेन्द्रियस्य विषयस्तु शब्द एव।

आकाशाद्वायुः प्रादुर्भवति। वायुभिः परिवेष्टिते आकाशे जीवानां स्थितिर्विद्यते। आकाशावरणं पर्यावरणरूपेणान्येषामावरणानामिव प्रथितम्। आकाशावरणस्य सन्तुलने स्वच्छतायाञ्च जीवानां स्थितौ दृढताऽऽयाति, जीवा विकसिता भवन्ति दीर्घायुष्यञ्चावाप्नुवन्ति।

१.२ आकाशावरणदूषणम्

विविधकारणादाकाशः प्रदुष्टो भवति। प्रदुष्टस्याकाशस्य प्रभावः पृथिव्यां स्थितानां जीवानामुपरि समागच्छति। पञ्चतत्त्वैर्निर्मितानि जीवानां शरीराणि सर्वदैव पञ्चतत्त्वेभ्यः स्वकीयांशं गृह्णन्ति। प्रदूषितांशेभ्यः प्रदूषितांशस्यैव ग्रहणं जायते। प्रदूषितांशग्रहणेन तेषां स्थितिः कथं दृढा भविष्यति, पुनश्च कार्यक्षमतायामपि ह्रासताऽऽयाति। अत आकाशावरणस्य दूषणेन मानवत्वरक्षायाः सङ्कटोऽपि समुपस्थितो भवति।

२.१ वायुतत्त्वावरणम्

वातीति वायुशब्दो व-गतिगन्धनयोः धातोरुण्प्रत्ययेन निष्पन्नो भवति[४]। रूपरहितस्पर्शवान् वायुरित्यन्नम्भट्टः[५]। वायुरयं गत्यात्मकतया पृथिव्यामाकाशे च सञ्चरणशीलो विद्यते। वायुभिरेव जीवानां स्थावरजङ्गमादिभूतानां स्थितिर्जायते।

१. नि० २।३।
२. ऋग्वेदे आकाशस्य कृते द्यौशब्दस्य प्रयोगः प्रायेण पञ्चशतवारं प्राप्यते—ऋ०सू०सं० भूमिकायाम्, ४३ पृष्ठे।
३. नि० ७।२; ४. हला०, ६०२ पृष्ठे; ५. तर्कसङ्ग्र०, ७ पृष्ठे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यावद्वायुर्भ्रमति तावदेव जीवानां शरीरस्य स्थितिर्दृश्यते। यत्र वायुर्नास्ति तत्र प्राणधारणमपि दुष्करमेव। शरीरान्तःसञ्चारी वायुः प्राणः, यो वै प्राणः स वायुः। अनेन प्राणवायुः शरीरधारिणां कृते परमावश्यकः। वायुतत्त्वस्य सर्वत्र व्याप्तत्वात् तेनावृतत्वाच्च वायुरपि पर्यावरणे परिगण्यते। स वायुः पर्यावरणस्य प्रधानभूतो जीवानामुपकाराय सर्वथा विहितः। स्पर्शग्राहकं त्वक्, सर्वशरीरवर्तित्वगिन्द्रियस्य विषयो वर्तते स्पर्शः, स्पर्शस्तु वायोर्गुणः। पञ्चभौतिकेऽस्मिन् शरीरे पञ्चरूपेण प्राणापानव्यानोदानसमानादयो वायवो व्याप्ता भवन्ति[१]। प्राणवायुस्तु पृथिव्यामाकाशे सर्वथा वरीवर्ति येन जीवाः प्राणवायोर्ग्रहणं कुर्वन्ति श्वसन्ति वा[२]। प्राणवायोः प्रादुर्भावो वृक्षेभ्योऽपि जायते। प्रायेण सर्वे वृक्षाः पादपाश्च प्राणवायुमुत्सृजन्ति गृह्णन्ति जीवैश्चोत्सृष्टं कार्बनडायऑक्साइड इत्याख्यं दूषितं वायुम्। अनेन प्रकृतिनियमेन वायौ शुद्धत्वमायाति। वायोः पर्यावरणस्य सन्तुलनमपि रक्षितं भवति। ज्ञातव्यमस्ति यत् केचन वृक्षा अश्वत्थादयोऽहर्निशं प्राणवायुमुत्सृजन्ति केचन दिवा एव[३]।

२.२ वायुतत्त्वावरणदूषणम्

विविधकारणाद्वायुरपि दूषितो भवति। वायोर्दूषिते सति पर्यावरणे दूषणमायाति। वायोः प्रदूषणस्य प्रभावात् स्वच्छवायोरभावाच्च भवति जीवनं सङ्कटापन्नम्। न हि जीवाः प्राणवायुं विना प्रकृतरूपेण स्थातुं प्रभवन्ति। प्रकृतिनियमानुकूलेन शुद्धवायोरुपलब्धिः प्राणवायोः प्राचुर्यं नितरां कल्याणाय विद्यते परं सम्प्रति दृश्यते वायौ प्रदूषणम्। तत्र वायोः प्रदूषणस्य विविधकारणेषु नानावाहनेभ्यो निःसृतानि धूमानि विषाक्ततैलीयपदार्थमयानि रासायनिकगैसाख्यादीनि प्राथम्येन परिगणितानि सन्ति। जनसंख्याभिवृद्धौ आवासादिकृते कृषिकार्येभ्यो बृहदुद्योगादिस्थापनायाः कृते च प्रायेण वृक्षा उत्पाट्यन्ते वनानि विनष्टानि भवन्ति। इन्धनार्थं विविधकार्यार्थमपि वनानां विनाशो भवति। वृक्षादीनां विनाशे सति

---

१. हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः।। (हला०, ६७० पृष्ठे)

२. प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च।
समानश्चेति पञ्चैताः कीर्तिताः प्राणवृत्तयः।। (पञ्चीकरणवार्तिके, सुरेश्वराचार्याः)

३. ऐत०ब्रा० ६।३३।८।१६।
या फलिनीर्या अफला अपुष्पा या च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः।। (यजु० १२।८९)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वायोरुत्सस्य विशेषतः शुद्धवायोः प्रस्रवणस्य विनाशोऽपि जायते। सम्प्रति जनाधिक्यादुद्योगाधिक्यान्नगरस्यानियतवर्धनाच्च क्रमेणारण्यादिकं विलुप्तं जातम्। तत्रस्थाः प्राणवायुप्रदायका वृक्षा अपि प्रायेण विनष्टा एव, येन शुद्धवायोर्ग्रहणस्य गभीरसमस्या सर्वस्मिन् क्षेत्रे समागता। न केवलं भारतेऽपि तु भारताद्बहिरपि एतादृशी समस्या दृश्यते। अशुद्धवायोर्ग्रहणेन जना अस्वस्था भवन्ति, विविधरोगैराक्रान्तास्ते अकाल एव कलेवरं त्यजन्ति, असमय एव वृद्धत्वं शक्तिहीनत्वञ्चानुभवन्ति। शक्तिहीनतायाः कारणेन क्रमशः शक्तिहीना एव तेषां सन्ततयो भविष्यन्ति, कारणकार्यनियमात्।

३.१ अग्नितत्त्वावरणम्

अङ्गति ऊर्ध्वं गच्छतीत्यग्निशब्दोऽगि गतौ धातोर्निप्रत्ययेन निष्पन्नो भवति[१]। अग्निरयं पञ्चतत्त्वेष्वेको विद्यते। अग्निस्तेजसः प्रतीकोऽस्ति। उष्णस्पर्शवत्तेजः[२]। यतो यतो भवति उष्मायाः प्रादुर्भावस्तत्र तत्राग्नेरस्तित्वं सम्भाव्यते। अत एवोष्णस्पर्शवत्तेज इति कथ्यते। परमाणुरूपं तेजो नित्यमनित्यञ्च कार्यरूपमिति। सूर्यस्तेजसः प्रधानकारणम्[३]। तत्राग्नितत्त्वं प्रभूतं विद्यते। पञ्चतत्त्वैर्निर्मितेषु शरीरेषु नितरामग्नितत्त्वं महत्त्वपूर्णम्। अग्नितत्त्वाभावेन शरीरस्य स्थितिर्न सम्भाव्यते। अग्निशून्यत्वं प्राणरहितत्वस्य लक्षणम्।

अग्निरपि दावाग्निरूपेण जठराग्निरूपेण वडवाग्निरूपेण च त्रिधा पृथिव्यां विराजते। तत्र दावाग्निर्भौमाग्निरूपेण काष्ठेन्धनरूपोऽग्निः। जीवानां शरीरे जठरे निवसतीति हेतोर्जठराग्निः प्रसिद्धः। समुद्रे जले वा स्थितोऽग्निर्वडवाग्निरिति। अग्नितत्त्वाभावेन जलमपि हिमखण्डरूपं जायते। उष्णताया एव कारणेन जलं पाषाणमयं न भवति। वायोरग्निरजायत इति वायोः प्रादुर्भावोऽग्नेरेव। अग्नितत्त्वावरणमपि सर्वत्र विराजते[४]।

३.२ अग्नितत्त्वावरणदूषणम्

सृष्टेर्नियमनार्थमग्नितत्त्वस्य सन्तुलनमावश्यकम्। सूर्यरश्मेः प्रभावादागत-मग्नितत्त्वं जीवोत्पादने अन्नोत्पादने च समर्थतरम्। साम्प्रतमग्नितत्त्वेऽपि प्रदूषणं

---

१. हला० १०७ पृष्ठे; २. तर्कसं० ७ पृष्ठे।

३. सूर्य आत्मा जगतस्तस्थुषश्च। (ऋ०१।१५।१)

४. गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्।
गर्भो विश्वस्य भूतस्याग्नेर्गर्भो अपामसि।। (यजु० १२।३७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राप्यते। पृथिव्यां प्रवर्धितस्य प्रदूषणस्य प्रभावोऽग्नितत्त्वेऽपि दृश्यते। प्रदूषितेऽग्नितत्त्वे उष्णतायामाधिक्यं न्यूनत्वञ्च वर्धेते। उष्णताया आधिक्येन हिमस्खलनं, हिमस्य जलरूपेण प्रवर्तनं प्रभूतं भवति, येन जलप्लवनस्य प्रलयस्य च स्थितिरपि भवितुमर्हति। उष्णताया आधिक्येन ध्रुवीयहिमस्खलनं तेन समुद्रे जलाभिवृद्धिश्च सम्भाव्यते। समुद्रजलस्तरे वृद्धावेव प्रलयस्य दृश्यमागमिष्यति। पुनः दीर्घकालं यावत् शीताधिक्यं यदा भविष्यति तदा जीवानां स्थितिरपि कठिना एव। उष्णतायां न्यूनत्वं तु शीततायाः कारणमस्ति। सूर्यरश्मेराच्छादनाज्जलदेन वर्षर्तौ यदा कदा कीदृशी स्थितिर्जायत इति सर्वे जानन्त्येव। अग्नेः सन्तुलनं विना नानारोगाः प्रवर्धन्ते। सृष्टेः सम्यक् सञ्चालनं तदा एव भविष्यति यदाऽग्नितत्त्वेऽपि सन्तुलनं स्थास्यति।

४.१ जलावरणम्

जलति जीवयति लोकानाच्छादयति भूम्यादीनीति वा। जल् + पचाद्यच् इत्यनेन जलशब्दो निष्पन्नो भवति[१]। जलस्य पर्यायवाचिनः शब्दा आपस्तु शीतस्पर्शवत्यः प्रसिद्धाः[२]। जलतत्त्वं नित्यरूपेण परमाणुरूपं तथाऽनित्यरूपेण कार्यरूपं प्राप्यते। अग्नेर्जलस्योत्पत्तिर्भवति। पञ्चतत्त्वेष्वेकं तत्त्वं जलं शरीरेष्वपि सर्वदा वर्तमानं भवति। जलशून्यत्वे सति शरीरस्य स्थितिरनिश्चिता एव। मानवा जलावरणेनावृताः सन्ति। शुद्धजलेन शरीरे बलादिकं वर्धते। जलमपि प्राणभूतम्[३]। अशुद्धजलेन शरीरे रोगाणां प्रवर्धनं भवति, शक्तिहीनत्वमकाल-मृत्युत्वमपि सम्भाव्यते। जलं तु स्रष्टुराद्या सृष्टिर्वर्तते[४]। जलेन जीवाना-मविनाभावसम्बन्धो विद्यते।

४.२ जलावरणदूषणम्

सृष्टेर्नियमनार्थं जलतत्त्वेऽपि सन्तुलनमावश्यकम्। जले शुद्धता तस्य प्रचुरता चापेक्ष्यते सर्वत्र। सम्प्रति कारणवैविध्याज्जलेऽपि प्रदूषणं प्राप्यते। प्रदूषणतत्त्वानामाधिक्याद् यत्र तत्र मलादिप्रक्षेपणाच्च जलं दूषितं भवति। बृहदुद्योगेभ्यो निःसृतानि मलसमन्वितानि जलानि विकृतपदार्थानि प्रदूषणतत्त्वानि च नद्या जलमपि दूषयन्ति। पृथिव्यां स्थितं जलमपि विविधकारणाद् दूषितं

१. हला० ३१३ पृष्ठे; २. तर्कसङ्ग्र० ६ पृष्ठे।
३. आपोमयः प्राणः—छान्दो० ६३१ पृष्ठे; ४. अभि०शा० १।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवति। जनसंख्यायां वृद्धिः सततं जायते। जीवानां कृते शुद्धजलस्योपलब्धिर्न सहजा, परिणामतोऽशुद्धमेव जलं गृह्णन्ति जीवाः। अशुद्धजलग्रहणं निश्चितमेव विनाशाय भवति। पवित्रतमा गङ्गाऽपि सम्प्रति प्रदुष्टा जाता। प्रायेण नद्यास्तटे नगराणि विकसितानि भवन्ति। नगराणां दूषितजलप्रक्षेपणं नद्यामेव भवति तथा मलादिकमपि तत्रैव प्रक्षिप्यते। गङ्गाया अप्येतादृशी स्थितिर्दृश्यते। अनेकेषां नगराणां दूषितं जलं तत्र पतति मलादिकमपि तत्र प्रक्षिप्यते। यदि सुरापगापि प्रदुष्टा तर्हि अन्यासां नदीनां का कथा? समुद्रजलमपि सम्प्रति प्रदुष्टम्। पृथिव्या जलेऽपि प्रदूषणं दृश्यते।

५.१ पृथिवीतत्त्वावरणम्

प्रथते विस्तारयतीति प्रथ्-विस्तारे धातोः षिवन्प्रत्यये सम्प्रसारणे ङीषि च कृते पृथिवीशब्दो निष्पन्नो भवति[१]। प्रथनात् पृथिवीति यास्कः[२]। पञ्चतत्त्वेषु पृथिवीतत्त्वस्य महत्त्वं सर्वविदितम्। पृथिवी सर्वबीजप्रकृतिरिति कालिदासेन कथितम्[३]। तत्र गन्धवती पृथिवी। गन्धग्राहकं घ्राणमिन्द्रियं नाशाग्रवर्ति[४]। अनेन ज्ञानेन्द्रियेण सह पृथिव्याः प्रत्यक्षसम्बन्धो विद्यते। पञ्चतत्त्वैर्निर्मितेऽस्मिन् शरीरे पृथिवीतत्त्वस्य योगदानमपि महत्त्वपूर्णम्। पृथिवीतत्त्वमपि सर्वत्रावरणरूपेण विद्यमानमस्ति, येन जीवा अपि आवृताः सन्ति। जलात्पृथिवी समुत्पन्ना[५]। पृथिवीतत्त्वं जीवानां कृते नितरामावश्यकम्; यतो हि तेन विना तेषां जीवनमसम्भवमेव। जीवानां पञ्चत्वे प्राप्ते तेषां पृथिवीतत्त्वं पृथिवीतत्त्वे विलीनं भवति।

५.२ पृथिवीतत्त्वावरणदूषणम्

अण्डजपिण्डजोद्भिजस्वेदजादयो ये स्थावरजङ्गमादिकाः सन्ति, तेषां स्थितिः पृथिव्यामेव विद्यते। तेषामुत्पत्तौ पृथिवीतत्त्वं सहायकं भवति, पुनस्तेषां पोषणादिकी क्रिया प्रायेण पृथिव्या एव सम्पाद्यते। सर्वबीजप्रकृतिः पृथिवी अन्नादिदानैः पोषयति स्थावरजङ्गमादिकान्[६]। सम्प्रति पृथिवी प्रदूषिता जाता। जनसंख्याया वृद्धौ पृथिव्या दोहनमत्यधिकं भवति। यथा गौः स्वशरीरस्थं दुग्धं

---

१. हला० ४४४ पृष्ठे; २. नि० १।
३. अभि०शा० १।१; ४. तर्कसङ्ग्र० ५ पृष्ठे।
५. अथर्व० १।५।१; ६. अभि० शा० १।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वयमेव लोकाय प्रयच्छति, तथैव पृथिव्यपि स्वानुरूपमन्नादिकं जीवेभ्य: प्रयच्छति। लोभाविष्टा ये वाञ्छन्ति गोर्दुग्धमत्यधिकं ते तस्या: स्वस्थताया यत्नमपि कुर्वन्ति, एवमेवाधिकान्नाद्यवाप्तये तै: पृथिव्या रक्षणार्थमपि यतनीयम्।

जनाधिक्यात् पृथिव्या अनियतदोहनं मलमूत्रादिकस्य यत्र तत्र प्रक्षेपणं विविधोद्योगेभ्यो नि:सृतानां विकृतपदार्थानां पातनमद्य दृश्यते। अनेनैव कारणेन पृथिवी निरन्तरं प्रदूषिता जायते। दुष्टायां पृथिव्यामन्नादिकं तथा नोपलभ्यते। उत्पन्नेष्वन्नेषु प्रदूषणस्य प्रभावात् तादृशी शक्तिर्न भवति। अत: पृथिवीतत्त्वावरणदूषणं परिहरणीयम्।

६. वर्तमानकाले वैज्ञानिका: पर्यावरणप्रदूषणं दृष्ट्वा भृशं चिन्तिता: सन्ति तथा वैज्ञानिकपद्धत्या तदपाकर्तुं सततं निरता: सन्ति। पर्यावरणेषु विशेषतो मानवोपसम्बद्धानां वनानां वृक्षाणाञ्च संरक्षणं ते विशेषेण वाञ्छन्ति। अत्र समुल्लेख्यमस्ति यत् प्राचीनतमेषु वेदादिग्रन्थेषु न केवलं पर्यावरणसम्बद्धानां वनानां वृक्षाणां वा संरक्षणस्योपायाश्चित्रिता:; अपि तु पर्यावरणं प्रति वैज्ञानिकानां यादृशं चिन्तनं सम्प्रति जायते, तादृशं चिन्तनं पूर्वमेव तत्र विहितम्।

७. वेदेषु आकाशस्य वर्णनमन्तरिक्षरूपेण प्राप्यते। द्युलोकस्तु आकाशस्य कृते केवलमृग्वेदे ५०० स्थलेषु प्रयुक्त:। ऋषि: कथयति—पिता द्यौ: मयोभुवो भेषजं न: प्रवातु[1]। यजुर्वेदे—'द्यौ: शान्तिरन्तरिक्षं शान्ति:' इति मन्त्रे पर्यावरणस्य सन्तुलनाय रक्षणाय चोद्घोष: प्राप्यते। अन्तरिक्षस्थदेवा: सन्ति—इन्द्रवायुरुद्रादय:। एतेषां देवानां वर्णनं वेदेषु प्रभूतं दृश्यते। अनेन वर्णनेनान्तरिक्षस्यैव महत्त्वं प्राप्यते। ऋग्वेदे प्राप्यते—'हिरण्यगर्भ: समवर्तताग्रे....। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम'[2]। तत्रैव प्राप्यते यद् योऽन्तरिक्षे आकाशे उदकस्य विमानो निर्माता स हिरण्यगर्भो विद्यते[3]।

शब्दगुणकमाकाशमिति सम्बद्धा: सन्त्याकाशेन शब्दा:। प्रतीतपदार्थको लोके ध्वनि: शब्द[4] इति महाभाष्यवचनेनाकाशसम्बद्धानां तद्गुणभूतानां शब्दानां

---

१. वृष्टिप्रदानेन सर्वेषां रक्षिता पिता द्यौ: द्युलोकोऽपि तद्भेषजमस्मान् प्रापयतु। (सायणभाष्ये)

२. ऋ०सं०१०।१२१।१।

३. यो अन्तरिक्षे रजसो विमान:, कस्मै देवाय हविषा विधेम (ऋ०सं० १०।१२१।५)।

४. महाभाष्ये पस्पशाह्निके।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रदूषणं विचारणीयम्। शब्दप्रदूषणेन ध्वनिप्रदूषणेन वा मनसः स्थितिरनुकूला न तिष्ठति। सम्प्रति जनाधिक्याद् वैज्ञानिकयन्त्रबाहुल्याद् ध्वनिविस्तारकयन्त्राद् विविधकारणाच्च ध्वनिप्रदूषणं प्रायो दृश्यते। प्रदूषितेन संवर्धितेन वा ध्वनिना विस्फोटादिशब्दैश्च हृदयस्य गतिरनियमिता जायते, येन हृदयरोगाः सम्बद्धरोगाश्चोत्पद्यन्ते, हृदयगत्यवरोधेन मानवाः कालकवलिताश्च भवन्ति। श्रुतिरन्ध्रे प्रतिकूलशब्दप्रवेशात् तीव्रसन्धानाच्च वाधिर्यमपि प्रादुर्भवति।

ऋग्वेदे मन्त्रद्रष्टार ऋषयः शुद्धां वाचमभिलषन्ति—'भद्रं कर्णेभिः शृणुयाम देवाः'[१]—हे देवाः! श्रोत्रैः कल्याणवचनं युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं वाधिर्यं कदापि मा भूत्। अभद्रेण शब्देन तीव्रेण ध्वनिना च कर्णेन्द्रियेषु प्रतिकूलप्रभावः सम्भाव्यते, सम्बद्धरोगाश्च प्रादुर्भवन्ति। अथर्ववेदे प्राप्यते—'अन्यो अन्यस्मै वल्गु वदन्त एत'[२]—अन्योऽन्यस्मै परस्परं शोभनं प्रियवाक्यं वदन्तो यूयम् एत आगच्छत। तत्रैव प्राप्यते—'सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया'[३]—सर्वे समानगतयः समानकर्माणो भूत्वा भद्रया कल्याण्या वाचा वागिन्द्रियेण वाचं वदन्तु। ऋषयः कामयन्ते—भद्रां वाचं लोका व्यवहरन्त्विति। अथर्ववेद एव 'मधुमतीं वाचं वदतु शन्तिवाम्'[४]—मधुमतीं माधुर्यवतीं शन्तिवां सुखयुक्तां वाचं वदत्विति सायणाचार्यः। ध्वन्यादिप्रदूषणेन प्रदूषितं मनः कथं प्रकृतावस्थायां तिष्ठेदिति यजुर्वेदे—'दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु'[५]।

८. आकाशाद्वायुरजायत इति वायोर्महत्त्वमृग्वेदे वर्णितम्। वातसूक्ते प्रतिपादितमस्ति यद् वायोः पर्वतगुहादिप्रदेशेषु विविधं शब्दमुत्पादयन् सर्वान् स्थावरजङ्गमपदार्थान् भञ्जयन् प्रयाति। स च वायुराकाशं व्याप्नुवन् दिगन्तराणि पृथिव्या धूलिमस्यन् गच्छति[६]। वायोर्वेगस्य व्यापकत्वस्य च वर्णनमत्र प्राप्यते। तत्रैव वायुर्विश्वस्य भुवनस्य राजा वर्तत इति वर्णितमस्ति[७]। आकाशमार्गेण गच्छन् वायुर्विश्रामं करोति, स जलस्य सखा पूर्वोत्पन्नः सत्यरूपः कुत्रोत्पन्नः कस्माच्च देशान्निष्क्रम्य निखिलं विश्वं व्याप्नोदिति कोऽपि ज्ञातुं न शक्नोति। वायोर्महत्त्वं व्यापकत्वञ्च वर्णयन् ऋषिः कथयति—

---

१. ऋ०सं० १।८९।८;
२. अथर्व० ३।३०।५।
३. तत्रैव-३।३०।३;
४. तत्रैव-३।३०।२।
५. यजु० ३४।१।१-६;
६. ऋ०सं० १०।१६८।१।
७. तत्रैव-१०।१६८।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मा देवानां भुवनस्य गर्भो 'यथावशं चरति देव एषः।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम'[१] ।।

अयं वायुर्देवादीनामप्यात्मा प्राणिमात्रस्य प्राणरूपः स्वेच्छया विचरति। अस्य शब्द इव श्रूयते नीरूपत्वाद्रूपं न दृश्यते।

मरुतसूक्ते देवैरभिषिक्ता मरुतो रुद्रस्य पुत्रा भूमेः पुत्रा इति वर्णिताः। तैश्च द्युलोके निजं सर्वोत्कृष्टं स्थानं निर्मितम्[२]। एषां मरुतां मार्गाननुसृत्य जलमपि स्रवति[३]। तत्रैव पवनस्यैकोनपञ्चाशतरूपाणि वर्णितानि। मनोवेगगत्यो मरुतो वृष्ट्युदकसेचनसमर्थाः सप्तसङ्घात्मकाः स्वरथेषु श्वेतबिन्दुयुक्ता मृगीर्यदा नियोजयन्ति तदा च्यावयितुमशक्या अपि पदार्थाः पतन्ति[४]। मरुतोऽन्नोत्पादनाय मेघं वर्षणार्थं प्रेरयन्ति।[५] तथा च वायुर्देवतारूपेण परमेश्वरस्यांशभूतो वर्णितः—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यो स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः[६] ।।

यज्ञे वायोर्देवस्य प्रतिष्ठा तदानीमासीत्। यज्ञेन वायो रक्षणं प्रदूषणनिवारणं सर्वथानुमीयते। मरुतः स्वमाहात्म्येन स्वर्गमधिकृतवन्तः, स्वनिवासाय तैर्विस्तृतं गगनरूपं स्थानमाक्रान्तम्। तेभ्यो मरुद्भ्यः कामनापूरकं हर्षदायकञ्च यज्ञं स्वयं विष्णू रक्षति[७]। विश्वेदेवसूक्ते—'तन्नो वातो मयोभु वातु' वायुस्तदौषधं नोऽस्मान् प्रापयतु यद् भेषजं मयोभु मयस्य सुखस्य भावयितृ वर्तते। मरुतो यज्ञे आहूता भवन्ति—

पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः।
अग्निर्जिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह[८] ।।

पृषदश्वाः श्वेतबिन्दुभिर्युक्ता अश्वा येषां ते पृश्निमातरो नानावर्णा गौर्माता येषां ते शोभनगतयो यज्ञेषु गन्तारोऽग्नेर्जिह्वायां वर्तमानाः सर्वस्य मन्तारः सूर्यप्रकाश एव चक्षुःप्रकाशो येषां त एवम्भूता मरुत इह अनसा रक्षणेन सहागच्छन्तु। एकस्मिन् मन्त्रे वाता ऋतायते सत्यशीलाय मधु क्षरन्तीति वर्णितम्[९]।

---

१. ऋ०सं०-१०।१६८।४;　　२. तत्रैव-१।८५।२;　　३. तत्रैव-१।८५।३।
४. तत्रैव-१।८५।४-मरुतां कृते प्रयुक्तो वृषप्रातासः, वृष्ट्युदकसेचनसमर्थसप्तसंघात्मक इति सायणः।
५. तत्रैव-१।८५।५;　　६. तत्रैव-१।१६४।४६;　　७. तत्रैव-१।८५।७।
८. तत्रैव-१।८९।७;　　९. "मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः"—यजु० १३।२७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रुद्रसूक्तेऽपि मरुतां वर्णनमस्ति। रुद्रो मरुतां पिता वर्तते। ऋषिः कथयति—हे मरुतः! युष्माकं यानि औषधानि निर्मलानि तथा सुखकराणि सन्ति, यानि अस्मत्पिता मनुर्वृतवान् तानि रुद्रस्य प्रभावाद् रोगोपशमनानि भेषजानि कामये[1]। अनेन स्पष्टं भवति यन्मरुतां प्रभावेणैवौषधानि निर्मलानि, सुखकराणि तथा रोगोपशमनयोग्यानि भवन्ति। अत एव वायोः संरक्षणमावश्यकम्। मरुतो जलवर्षणे क्षमा विद्यन्ते। अग्निमारुतसूक्ते प्राप्यते—मरुतस्तीव्राः सन्तो जलं ववृषुः।[2] मरुतो मेघान् सञ्चालयन्ति, जलराशिञ्च समुद्रे पातयन्तीति।[3] यजुर्वेदे वायुर्देवतारूपेण वर्णितः।

आधुनिकवैज्ञानिका वायुप्रदूषणेन सन्त्रस्ता विद्यन्ते। एभिर्वृक्षाणां वनानाञ्च महत्त्वं स्थापितम्। वस्तुतो वृक्षा वनादयश्च पर्यावरणस्य महत्त्वपूर्णाङ्गेषु परिगणिताः। वैदिकसाहित्ये वृक्षाणां संरक्षणाय तत्र देवत्वस्याधानं क्रियते। वृक्षा देववत् पूज्याः, न तु उपेक्षणीयाः—'वृक्षाणां पतये नमः। वनानां पतये नमः'[4]। 'औषधीनां पतये नमः। अरण्यानां पतये नमः'[5]। 'वृक्षेभ्यो नमः। नमो वन्याय च'[6] इत्यादिमन्त्रेषु वृक्षाः प्रणम्याः, वृक्षपालका अरण्यपालकाश्च प्रणम्या इति पर्यावरणस्य प्रधानाङ्गभूतं प्रति वनस्पतिं प्रति च मानवानां व्यवहारः पर्यावरणरक्षणे महत्त्वपूर्णः। औषधयो वनस्पतयश्च विशेषेण मानवानामुपकाराय विद्यन्ते। एकतो वनस्पतयः प्राणवायुं प्रयच्छन्ति, अपरतश्च रोगादिनाशने औषधिरूपेण प्रयुक्ता भवन्ति। औषधयो वनस्पतयश्च तत्र विशेषेण कल्याणाय प्रतिपादिताः—माध्वीर्नः सन्त्वोषधीः, मधुमान्नो वनस्पतिः,[7] ओषधीः मधुमती भवतु वनस्पतिश्च मानवेभ्यो मधुमान् भवतु। पूर्वमेवास्माकमृषयो वृक्षाणां महत्त्वं परिज्ञाय सत्यस्य दर्शनं कृतवन्तः। वायोर्महत्त्वमपि वेदेषु प्रभूतं वर्णितम्। ऋग्वेदे यथा—

आ वात वाहि भेषजं वि वातं वाहि यद्रूपः।
त्वं हि विश्वभेषजो देवानां दूत ईमसे[8]।।

अस्मिन् मन्त्रे प्रयुक्तो भेषजवातशब्दः शुद्धवायोः कृते तथा विश्वभेषजशब्दो विश्ववैद्यस्य रूपेण प्रयुक्तः। ऋषिः प्रार्थयति—हे वात! भेषजवातमावाहि त्वं

---

१. ऋ० सं०२।३३।१३;
२. तत्रैव-१।१९।३४।
३. तत्रैव-१।१९।७;
४. यजु० १६।१८।
५. तत्रैव-१६।१९-२०;
६. तत्रैव-१६।१७,३८।
७. तत्रैव-१३।२७;
८. ऋ०सं० १०।१३७।३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वभेषजो देवानां दूतोऽसि।[१] शुद्धवायुर्भवति मानवस्य कृते सुखकरः शान्तिदायकश्च। अनेनायुरपि वर्धते—

वात आ वातु भेषजं शम्भु मयोभु
नो हृदि प्रण आयूंषि तारिषत्[२]।।

वृक्षेभ्यो वनस्पतिभ्यो भेषजवातः प्रभूतं प्राप्नोति, अत एव वृक्षा वनस्पतयश्च वर्णिताः, संरक्षणाय प्रेरिताः, कल्याणाय प्रयुक्ताश्च।

९. वेदेषु अग्नेर्महत्त्वमत्यधिकं विद्यते। ऋग्वेदस्य सामवेदस्य चारम्भोऽग्निसूक्तेनैवाभूत्। अग्निमीले पुरोहितमिति ऋग्वेदस्य अग्न्यायाहि वीतये इति सामवेदस्यारम्भिकौ मन्त्रौ विद्येते। ऋग्वेदस्य २०० सूक्तेषु अग्नेर्वर्णनं प्राप्यते। अग्निर्यज्ञकर्मसु सर्वदैवाग्रणी भवति तथा तत्र प्रदत्तं हविर्देवेषु प्रापयति। यज्ञस्य प्रधानभूतोऽग्निस्तस्य च पर्जन्येन सह सम्बन्धो यज्ञसम्बन्धत्वात्[३]। अग्निमारुतसूक्ते अग्नेर्मरुताञ्च वर्णनं सहैव प्राप्यते। ये मरुतः प्रकाशशीला हिंसाशून्याश्च महावृष्टेः प्राकारं जानन्ति, तैः सह हे अग्नि, त्वमागच्छ[४]। अग्निर्वै रुद्रः[५], अग्निं यमं मातरिश्वानमाहुः[६], अग्निर्वै सर्वा देवता[७] इत्यादिवाक्यैरग्नेर्व्यापकत्वं प्राप्यते। अग्नेरुत्पत्तिराकाशात्, सूर्यात्, जलात्, पाषाणात्, वनस्पतिभ्यः, ओषधीभ्यश्च जायते। अग्नेस्त्रिविधं रूपं पार्थिवमन्तरिक्षस्थानीयं द्युस्थानीयञ्चेति। अग्नेः कृते अपानपात् शब्दः प्रयुक्तः। अद्भ्य ओषधयः, ओषधीभ्योऽग्निरिति।[८] ओषधीभ्यो योऽग्निः स दावाग्निः। अग्नेः पर्यायभूतोऽन्नादशब्दो जठराग्नेरवबोधकः।

सूर्यादयोऽप्युष्माणः प्रवर्तका अग्नितत्त्वान्तर्भूताः। सूर्यस्य वर्णनमृग्वेदे प्राधान्येन दृश्यते। सूर्यः स्थावरजङ्गमात्मकस्य कार्यवर्गस्य कारणमतो वर्णितः— 'सूर्य आत्मा जगतस्तस्थुषश्च, सूर्यो मित्रस्य वरुणस्याग्नेश्चक्षुःप्रकाशको वर्तते[९]। गायत्री सूर्यमेव गायति। द्यावापृथिव्योः प्रकाशकः सूर्य एव। सूर्यादयोऽग्नितत्त्वस्य

---

१. भेषजवातः (Medicated air) विश्वभेषजः—(World physician)।
२. ऋ०सं० १०।१८६।१।
३. श्रीमद्भगवद्गीता-३।१४, ऋ०सं० १।१६४।४७ (कृष्णं निधानं हरयः सुपर्णाः)।
४. ऋ०सं०१।१९।३;
५. शत०ब्रा०५।२।४।१३।
६. ऋ०सं०१।१६४।४६;
७. ऐ०ब्रा० १।१, शत०ब्रा० ६।२।२।२८।
८. ऋ०सं० १।१४३।१;
९. तत्रैव-१।११५।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिरूपाः पर्यावरणरक्षणे समर्थाः। सूर्यरश्मयो रोगाणुं दूषितपदार्थञ्च विनाशयन्ति, जीवेभ्यः शक्तिं प्रयच्छन्ति, अन्नादिपदार्थानुत्पादयन्ति, पर्यावरणस्य रक्षाञ्च कुर्वन्ति।

वेदा यज्ञार्थसम्भवा इति यज्ञस्य महत्त्वं वेदस्य महत्त्वञ्च नाविदितम्। यज्ञेऽग्नेर्महत्त्वमत्यधिकं वर्तते। यज्ञस्य दीर्घसत्रत्वं विश्रुतम्।[१] प्राचीनभारते प्रत्येकेषु गृहेष्वग्नेः स्थापनं भवति स्म। 'स्वाहास्वधाकारविवर्जितानि श्मशानतुल्यानि गृहाणि यत्र' इत्यस्य यथार्थता मान्यता च तदानीमासीत्। यज्ञाग्निमाध्यमेन पर्यावरणरक्षणं प्रदूषितपर्यावरणस्य शुद्धिकरणं भवति। यज्ञीयहंवनकुण्डे प्रज्ज्वलिताग्नौ आहुतिर्दीयते। अग्निर्देवानां सविधे तेषामंशं हव्यादिकं प्रापयतीत्यध्यात्मसम्भवं सूक्ष्मीकरणम्। स्थूलदृष्ट्या अग्नौ प्रक्षिप्तैर्हवनद्रव्यैर्निःसृतेन धूमेन रोगाणवो नश्यन्ति, प्राणवायुश्च शुद्धो भवति। यज्ञाग्नौ घृतं तिलमष्टगन्धं गुग्गुलादिकं शमीवृक्षादिकस्य समिधादिकञ्चाहुतिरूपेण दीयन्ते, परिणामतः पर्यावरणे शुद्धत्वमायाति, कृमिनाशोऽपि तदा जायते, यतो हि हवने प्रयुक्तानि द्रव्याणि कृमिनाशकानि भवन्ति[२]। औषधियागरूपेण विख्यातो विद्यते एतादृशो यज्ञः। अथर्ववेदे प्राप्यते यद् यो हि गुग्गुलोर्गन्धं गृह्णाति, स प्रायेण रोगपीडितो न भवति, तस्य गन्धेन वातावरणमपि सुगन्धपूर्णं जायते[३]।

यज्ञाद्वर्षणं भवति। यज्ञीयधूमेन पर्जन्यस्य वर्षणं जायते। वर्षाजलेन पर्यावरणं विशुद्धं भवति। अग्नितत्त्वस्य सूर्यरश्मेश्च प्रभावाज्जलं मेघरूपेण परिवर्तितं भवति तथा यज्ञधूमेन प्रवर्धितः पर्जन्यो वर्षति।[४]

१०. जलस्य वर्णनमपि वेदेषु प्राप्यते। ऋग्वेदस्यापःसूक्ते जलस्य विविधं रूपं वर्णितम्—या दिव्या आपोऽन्तरिक्षे उत्पन्ना भवन्ति, या नद्यादिमध्ये प्रवहन्ति, या खनित्रिमा खननेन निवृत्ता कूपादिरूपेण वर्तन्ते, या स्वयंजाः स्वयमेव प्रादुर्भवन्ति, याः समुद्रार्थाः समुद्रगामिन्यः याः शुचयः, स्वच्छा याः पावकाः, शोधयित्र्यश्च सन्ति ताः क्व विद्यन्ते। अनेनापां भेदाः—दिव्या, खनित्रा, स्वयंजाः, समुद्रार्थाः, शुचयः, पावकादयश्च वर्णिताः[५]। दिव्या आपोऽन्तरिक्षा-

---

१. ऋ०सं० १०।९०।६।

२. अज्ञातयक्ष्मात उत राजद् त्वा मुञ्चामियक्ष्मात् (अथर्व० ३।११।१)।

३. न ते यक्ष्मा अरुन्धते नैनं शपथो अश्नुते।
यं भेषजस्य गुग्गुलोः सुरभिर्गन्धो अश्नुते।। (अथर्व० १७।३।२१)।

४. यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसम्भवः।
अन्नाद् भवन्ति भूतानि यज्ञः कर्मसमुद्भवः।।
(श्रीमद्भगवद्गीता-३।१४ तथा ऋ०सं० १।१६४।४७)

५. ऋ०सं० ७।४९।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दागच्छन्ति। समुद्रे या आपस्तिष्ठन्ति ता ज्येष्ठा गण्यन्ते। वृत्रेणावरुद्धा आपः, इन्द्रो वृत्रं हत्वा रराद[१]। अपांपतिर्वरुणो विद्यते। स वरुणः प्रजानामसत्यं सत्यञ्च पश्यन्नन्तरिक्षे व्रजति, शुचयः पावका आपो मधुररसं क्षरन्ति। अपां राजा वरुणः सोमश्चाप्सु वर्तंते। विश्वेदेवा अप्सु स्थिता अन्नं मदन्ति, वैश्वानरो वह्निस्तासु प्रविष्टोऽस्ति। एतादृश्यस्ता आपो वर्तन्ते।[२] अनेन प्रतीयते यज्जलादग्निरुत्पद्यते। योऽग्निर्जलात् प्रादुर्भवति स वडवाग्निः सलिलाग्निरिति।

पर्जन्यसूक्ते ऋषिः कथयति—हे स्रोतः! त्वं बलवन्तं मेघमभिप्रायं वद यो जलस्य वर्षको गर्जन् शब्दं कुर्वन् ओषधीषु गर्भं स्थापयति।[३] यदा पर्जन्य उदकेन पृथ्वीं रक्षति तदा वातश्चलति, सौदामिन्यः समन्तात् सञ्चरन्ति, ओषधय उद्गच्छन्ति, अन्तरिक्षं क्षरति, भूमिः सर्वस्मै समर्था भवति[४]। पर्जन्यादन्नसम्भवस्य वर्णनमृग्वेदेऽपि प्राप्यते—यस्य पर्जन्यस्य व्रते पृथिवी अत्यर्थं नमति, यस्य व्रते ओषधयो नानारूपा भवन्ति, एतादृशः पर्जन्यः सुखं प्रयच्छति[५]। इन्द्रसूक्ते प्राप्यते यद् वृत्रो जीवनदशायां स्वकीयेन महिम्ना या एव मेघगता अपः पर्यतिष्ठत परिवृत्य स्थितवान् स सम्प्रति अपां पादस्याधः शयानो बभूव। पृथिव्यां शयानं पतितमिन्द्रेण हतं वृत्रमतिक्रम्यापो गच्छन्ति[६]।

ऋग्वेदस्य नदीसूक्ते अनेका नद्यो वर्णिताः[७]। अथर्ववेदे 'आपो भवन्तु पीतये' इति कामयते तत्र ऋषिः[८]। यजुर्वेदेऽपि शुद्धजलस्य कृते प्रदर्शिता स्वकीयाकाङ्क्षा—मधु क्षरन्ति सिन्धवः[९]। वैदिकसाहित्ये वृक्षाणां वनानां पर्वतानां नदीनाञ्च प्रभूतं वर्णनमस्ति। यज्ञात्तु पर्जन्यस्यागमनं भवत्येव, परं वृक्षाणां वनानां पर्वतानां योगादपि जलस्य वर्षणं भवति। यजुर्वेदे ऋषिः कामयते—'निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्'[१०]। तत्रैव सर्वत्र जलस्योपलब्धिर्भवेदिति वर्णितम्—'पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्'[११]॥

---

१. ऋ०सं० ७।४९।१; २. तत्रैव-७।४९।४।

३. तत्रैव-५।८३।१; ४. तत्रैव-५।८३।४।

५. तत्रैव-५।८३।५; ६. तत्रैव-१।३२।८।

७. इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या असिक्न्या मरुद्वृधे वितस्त्या-र्जीकीये शृणु ह्या सुषोमया।। ऋ (१०।७५।५)।

८. अथर्व० १।११; ९. यजु०-१३।२७।

१०. यजु०२२।२२; ११. यजु० १८।३६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

११. ऋग्वेदस्य पृथिवीसूक्ते पृथिव्या वर्णनं विशेषेण प्राप्यते। मानवानां मध्ये पृथिव्या उच्चो निम्नो बहु समतलं क्षेत्रमसम्बाधं बाधारहितं विद्यते। या पृथिवी नानाशक्तिसहिता वनस्पतीन् धारयति सा पृथिवी अस्मभ्यं विस्तृता समृद्धा च भवतु[१]। यस्यां पृथिव्यां समुद्रः सिन्धुर्जलानि च सन्ति, यस्यामन्नं भवति, कृषिकार्याणि च सम्भवन्ति, यस्यामिदं जगत् श्वसद् गतिशीलञ्च भवत् जिन्वति आनन्दमनुभवति, सा पृथिवी अस्मान् उत्तमपेयप्रदेशे स्थापयतु[२]। अन्नादिभोज्य-पदार्थानां गवादिसम्पदाञ्च धारयित्री पृथिवी वर्तते। अत एव ऋषिः कथयति—सा नो भूमिर्गोष्वप्यन्ने दधातु[३]। अस्यां पृथिव्यां पूर्वपुरुषाः स्वानि विशिष्टकर्माणि सम्पादितवन्तो यत्र देवा असुरान् पराजितवन्तः, या गवामश्वानां वयसाञ्च विशिष्टा स्थितिः सा अस्मभ्यमैश्वर्यं तेजो दधातु[४]। सा पृथिवी पुरा समुद्रे सलिलमध्ये आसीत्, तां पृथिवीं विद्वांसो बुद्धिभिर्यथेष्टं भुञ्जन्ति स्म। पृथिव्यामेव गिरयो लघुपर्वता हिमाच्छादिता उन्नताः पर्वता वनानि च विद्यन्ते। वभ्रुवर्णा कृष्णवर्णा रक्तवर्णा नानारूपा पृथिवी वर्तते, यस्यामपराजिता अक्षताः स्वस्थाश्च भूत्वा स्थिता भवामः[५]। 'माता भूमिः पुत्रोऽहं पृथिव्याः' इत्युद्घोषः पृथिवीसूक्त एव प्राप्यते। ऋषिः कथयति—हे पृथिवी, यंत्ते मध्यभागो नाभिस्थलं या च ते रसः शक्तिर्वा शरीरादुत्पन्ना तास्वस्मान् संस्थापय अस्मान् पुनीहि[६]। पृथिव्या रस उत्पद्यते, परिणामतः सा रसापि कथ्यते। पृथिव्यामुत्पन्ना मनुष्यास्तस्यां विचरन्ति। सा द्विपदप्राणिनश्चतुष्पदप्राणिनो धारयति, सर्वे मनुष्याः पृथिव्या एव विद्यन्ते। तेभ्य उद्यन् सूर्यः किरणैरमृतं ज्योतिर्विस्तारयति। ऋग्वेदस्य द्यावापृथिवीसूक्ते मातृरूपा पृथिवी प्राणिनां रक्षां करोति, सर्वाणि भूतानि पालयति[७]।

पृथिवीतत्त्वावरणस्य प्रदूषणमपि पर्यावरणस्य समस्या वर्तते। वेदकाले पृथिवी अन्नोत्पादिका कृषिकर्मयोग्या प्राणवायुसम्भृता चासीत्[८]। तदा पृथिवी प्रभूतान् वनस्पतीनपि धारयति स्म येन प्रदूषणस्य समस्या नासीदोषधीभ्यः प्राणवायोरागमनात्[९]। पृथिव्यामुपरि स्थितानि जलानि कृषिकार्येऽपि प्रयुक्तानि भवन्ति स्म। उत्तमपेयस्य शुद्धजलस्योपलब्धिस्तदानीमासीत्। पृथिव्याः

---

१. अथर्व०-१२।१।२; २. तत्रैव-१२।१।३।
३. तत्रैव-१२।१।४; ४. तत्रैव-१२।१।५।
५. तत्रैव-१२।१।९; ६. तत्रैव-१२।१।१०-११।
७. ऋ०सं० १।१६०।२; ८. तत्रैव-१२।१।४।
९. तत्रैव-१२।१।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुद्धजलस्याकाङ्क्षा पृथिवीसूक्ते वर्णिता—'सा नो भूमिर्विसृजतां माता पुत्राय मे पयः'[१]।

यथा माता पुत्राय पयो विसृजति तथैव सा भूमिरपि पयो ददातु; यतो हि माता भूमिः पुत्रोऽहं पृथिव्या इति तया सह मानवानां सम्बन्ध आसीत्। पञ्चतत्त्वेषु परिगणिताया भूमे सम्बन्धः सर्वैस्तत्त्वैः सह विद्यते परिणामतोऽग्निजलादिदूषणेन पृथिवी अपि दूषिता जायते, तथा च पादपानां वनानामभावादपि भूमेः क्षरणं प्रदूषणञ्च दृश्येते। नागरसंस्कृतौ जनाधिक्येन पृथिव्यामेव मलसङ्ग्रहाज्जलस्य सम्बद्धक्षेत्रस्य दूषणता दृश्यते।

१२. निष्कर्षतः पर्यावरणविषये कथनीयमस्ति यत् पर्यावरणसम्बद्धानि यानि तत्त्वानि विद्यन्ते, तानि प्रायेणान्योऽन्यश्रितानि सन्ति। एकस्य तत्त्वस्य प्रदूषणेनापरस्य दूषणं जायते। वैदिकवाङ्मये पर्यावरणस्य प्रधानभूतानि पृथिव्यादिपाञ्चभौतिकतत्त्वानि विस्तरेण वर्णितानि। सृष्टेरारम्भ एव भारतीयाः प्रकृतेर्महत्त्वं दृष्टवन्तोऽतस्तैः प्रकृतिभूता अग्न्यादिभौतिकपदार्था मानवोपकारकाः प्रत्यक्षदेवत्वेन सम्मानिताः पूजिताश्च[२]। ते भारतीया मन्त्रद्रष्टारो भविष्यद्रष्टारोऽप्यासन्। अतः पञ्चभूतानां महत्त्वं ज्ञातवन्तः। ते सर्वे प्रकृतिदेवा यज्ञादिमाध्यमेन साधनाया बलेन च तेषां वशवर्तिन आसन्। तदानीं तेषु तत्त्वेषु प्रदूषणस्याशङ्का आसीत्, तस्य समस्या नासीत्। एते प्रकृतिदेवा ज्ञाताज्ञाताचरणैः प्रकुपिता मा भवन्त्विति सर्वदैव ते मानवास्तदा प्रकृतिदेवान् प्रति सावधाना आसन्।

आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु[३]। आपः शुन्धन्तु मैनसः[४]। देवः सविता मां सूर्यस्य रश्मिभिः पुनातु[५]। इदमापः प्रवहतामवद्यं च मलं च यत्[६]।

एतेषु मन्त्रेषु जलदेवताः सवितृदेवता च शोधनार्थं प्रार्थिताः। वैदिकमानवा जानन्ति स्म यत् प्रकृतेरस्तित्वं मानवं विना भवितुमर्हति, परं मानवानामस्तित्वं

---

१. ऋ०सं०-१२।१०।८।

२. अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता—यजु० १०।२०।

३. तत्रैव-४।२; ४. तत्रैव-२०।२०।

५. तत्रैव-४।४; ६. तत्रैव-६।१७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रकृतिं विना न स्थास्यति। अतो वायुं प्रार्थयति–वृक्षं मा निपातय[१]। पृथिवी सदा पादपैरावृता भवतु—'ओषधीः प्रतिमोदध्वं पुष्पवती प्रसूवरीः। अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः'[२]। मानवकल्याणाय प्रकृतिभूताः प्रत्यक्षदेवा भृशं प्रार्थिताः—'मधु वाता ऋतायते, मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः।। मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता।। मधुमान्नो वनस्पतिर्मधुमाँऽस्तु सूर्यः। माध्वीर्गावो भवन्तु नः'[३]।।

अत्र प्राप्यते यद् वाताः सिन्धव औषधीर्नक्तमुषा पार्थिवं रजो द्युलोकं वनस्पतिः सूर्यः सूर्यरश्मयश्च प्रदूषिता मा भवन्तु, ते मानवानां कृते सर्वदैव मधु क्षरन्तु। विविधकारणात्प्रदुष्टे वातावरणे प्रवर्धिते च वैज्ञानिकोपकरणे परमाण्वादि-विनाशशीलस्यास्त्रस्य प्रक्षेपणस्याशङ्कायां सम्भावितं प्रकृष्टपर्यावरणदूषणमभिलक्ष्य सर्वथा लोकोपकारकोऽयं मन्त्रः प्रस्तूयते—'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि'[४]।।

अत्र वर्णितमस्ति यद् दिव्यन्तरिक्षे पृथिव्यामप्स्वोषधीषु वनस्पतिषु विश्वेदेवेषु ब्रह्मणि सर्वस्मिंश्च या शान्तिः सा मां प्रत्यस्तु। एतादृशी कामना विश्वकल्याणाय पर्यावरणरक्षायै च महत्त्वपूर्णा। सर्वाणि पृथिव्यादीनि पर्यावरणाङ्गानि प्रदूषितानि मा भवन्तु, तथा कल्याणाय सन्नद्धानि भवन्तु, यत्र सर्वेषामभ्युदयो निहितो वर्तते—

शं वातः शं हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन्[५]।।

शं नो वातः पवतां शं नस्तपतु सूर्यः।
शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु।।[६]

कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्षं शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः[७]।।

अत्र ऋषिः कामयते—वायुः सूर्यकिरण इष्टका अग्नयः पार्थिवाश्च ते सुखरूपा भवन्तु, त्वां मा अभितापयन्तु। वायुरव्याधिजनकः पवतां, भेषजरूपः

१. ऋ०सं०-५।५७,३;
२. यजु०।१२।७७।
३. तत्रैव-१३।२७-२९;
४. तत्रैव-३६।१७।
५. तत्रैव-३५।८;
६. तत्रैव-३६।१०।
७. तत्रैव-३५।९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूर्यो नोऽस्माकं तपतु किरणान्प्रसारयतु। पर्जन्य: सुखकरं काशनिक्षाररहितं जलमभिवर्षतु। तुभ्यं दिश: क्लृप्ता भवन्तु। आप: कल्याणकारिण्यो भवन्तु, सिन्धव: शिवतमा भवन्तु, अन्तरिक्षं कल्याणकारि भवतु। सर्वा दिशस्तुभ्यं कल्पन्ताम्।

अनेन स्पष्टं भवति यद् वेदेषु पर्यावरणस्य सर्वाण्यङ्गानि वर्णितानि। तेषां महत्त्वं जनकल्याणाय विश्वकल्याणाय च तत्रोद्घाटितम्। पर्यावरणरक्षणे जागरणमपि सूचितम्, प्रदूषणमुक्तये साधनान्यपि वर्णितानि। वेददृष्ट्या तु पर्यावरंणरक्षण एव सर्वेषां कल्याणमिति दिक्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यज्ञतत्त्वमीमांसा

डॉ० राममूर्तिचतुर्वेदी
ऋग्वेद-प्राध्यापकः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

इह किल जगतीतले स्थावरजङ्गमात्मका यावन्तोऽपि नामरूपाभिधेयाः पदार्थाः समुपलभ्यन्ते, तेषामस्तित्वस्य भवति किमपि प्रयोजनमुद्देश्यञ्च। तत्र स्थावरास्तु सर्वविधचेतनोपकारकत्वेन साफल्यजन्मानो भवन्तीति निर्विवादम्। जङ्गमेषु केचन भक्ष्य-भक्षकभावेन, केचन पूज्य-पूजकभावेन, केचन चाधाराधेयभावेन व्यापृताः सन्तः कृतकर्माणो जायन्ते। तत्रापि प्राणिवर्गेषु मानवमन्तरा सर्वे खलु पशु-पक्षि-कीट-पतङ्गादयः प्राणिनः स्वजीवनस्य परमोद्देश्यं परमं प्रयोजनञ्च नैव ज्ञातुं प्रभवन्ति तथाविधशास्त्रज्ञानाभावात्।

परं मानवस्तु शास्त्रज्ञानानुशीलनेन स्वजीवनस्य चरमोद्देश्यं परमं प्रयोजनञ्च ज्ञातुं शक्नोति। यतो हि सर्वाणि खलु शास्त्राणि मानवजीवनमनुद्दिश्य जागताध्यात्मिकपदार्थनिरूपणायैव प्रवृत्तानि, अतस्तानि सर्वदा सर्वथा च मानव-हिताय कल्पन्ते, प्रेरयन्ति च मानवं नैजं परमं प्रयोजनमधिगन्तुम्।

''शास्त्रयोनित्वात्'' इति ब्रह्मसूत्रोक्तदिशा परमेश्वरो हि सर्वान्तर्यामित्वात् सर्वविधं कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वात् सर्वप्रेरकः प्रतारसुधारकश्च विद्योततेतराम्। तेनैव परमेश्वरेण वेदादिशास्त्राणि ब्रह्मणो मुखात् प्रकटीकृतानि। 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै, (श्वेताश्वतरोपनिषदि) इति श्रुतिवाक्येनेदं सुस्पष्टं जायते यत् परमेश्वरे ब्रह्मणे प्रथमं वेदान् प्रयच्छति ब्रह्मसम्प्रदायतो वेदाः परम्परया मनुष्यान् प्राप्नुवन्ति, तदेव वेदोऽखिलस्यापि धर्मस्य मूलं स्रोतो जायते। न केवलं भारतीयवाङ्मये, अपि तु समस्तवैश्विकसाहित्येऽपि वेदस्य स्थानं नितान्तं गौरवपूर्णं समादृतञ्च वर्तते। वेदा एव भारतीयसंस्कृतेः सभ्यतायाश्च समुद्भावका आधारशिलारूपेण परिज्ञायन्ते। तेषां शाब्दिकं स्वरूपं परमेश्वरस्य बाह्यकलेवरमुच्यते, अत एव भगवता कृष्णेन स्वयमेवोक्तम्, यत्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अहं वै सर्वभूतानां भूतात्मा भूतभावनः।
शाब्दं ब्रह्म परं ब्रह्म ममोभे शाश्वती तनू।।

एतादृशपरमेश्वरस्वरूपेण वेदेन यज्ञानां विविधं विधानं धर्मानुष्ठानरूपं प्रतिपाद्यते। वैदिकसंहितासु ऋग्वेदस्य प्राथम्यन्तु न क्वचित् केषाञ्चित् तिरोहितं विद्यते। तत्र प्रथममन्त्रे[१] यज्ञदेवतात्वेन अग्निदेवः स्तुतो दृश्यते। एतेन ज्ञायते यद् यज्ञस्य देवतायाश्च अस्ति कश्चिद् विशिष्टः सम्बन्धः, तत्रापि 'यज्ञो वै विष्णुः'[२] इति शतपथश्रुत्या यो हि क्रियाविषयव्यापाररूपो यज्ञः सोऽपि देवतारूप एव, अतो देवस्य देवेन सह सम्बन्धः समानधर्म एव जायते। अत एव सृष्ट्यादौ प्राकृता देवा प्राकृतयज्ञेन सर्वदेवमयं विष्णुं यज्ञरूपमर्चयामासुः, तस्मादेव यज्ञपुरुषाद् ऋगादयो वेदाः प्राकट्यमुपगताः। अत्र भगवती श्रुतिः स्वयमेवात्मतथ्यं प्रकटयति। तद्यथा—

'यज्ञेन यज्ञमयजन्त देवा..........'[३]।
'तस्माद्यज्ञात् सर्वहुतऋचः सामानि जज्ञिरे.......'[४]।।

वेदप्रतिपादितो यज्ञ एव धर्मपदेनोच्यत इति मीमांसाशास्त्रं सप्रमाणं निरूपयति, तद्यथा अर्थसङ्ग्रहे— "वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः, स च यागादिः, यागादिरेव धर्म इति श्रीमद्भगवद्गीतायामपि भगवता कृष्णेन नित्यब्रह्मणो यज्ञे प्रतिष्ठानं तथा शब्दब्रह्मणो वेदादेव यज्ञरूपस्य कर्मणः समुद्भवनं समुपदिष्टं प्राप्यते। तद्यथा—

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।।

वेदविहितयज्ञानां सम्पादनेन न केवलमेकस्य यज्ञकर्तुः, अपि तु समस्तस्य लोकस्य कल्याणं जायते। ऐतरेयब्राह्मणे स्पष्टेषु शब्देषु लोककल्याणाय एव यज्ञप्रकल्पना कृतास्तीति प्राप्यते, शास्त्रान्तरे च स एव यज्ञः श्रेष्ठतमकर्मरूपेण प्रतिपादितः, तथा तस्यैव यज्ञस्य साधुसम्पादनाय ऋगादिवेदत्रयमाविर्भूतमित्यपि परिज्ञायते, तद्यथा—

'यज्ञोऽपि तस्यै जनतायै कल्पते'। (ऐतरेय-ब्रा.१।२।३)
'यज्ञो वै श्रेष्ठतमं कर्म' (शतपथब्रा० १।७।१।५)

---

१. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नदातमम्। (ऋ०सं०-१।१।१)
२. शतपथब्राह्मणे-१।१।२।३।
३. ऋ०सं०-१०।९०।१६;　　　　४. तत्रैव-१०।९०।९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'अग्निर्वायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजु: सामलक्षणम्'।। (मनुस्मृतौ-१।२३)

'ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये'। (ब्रह्मपुराणे-१।४२)

'वेदास्तु यज्ञार्थमभिप्रवृत्ता:'। (विष्णुधर्मोत्तरपु.)

वैदिकसाहित्यानुशीलनेन तथ्यमिदमुद्गतं भवति यद् अखिलस्य सृष्टिप्रपञ्चस्य आधारशिलाभूता यज्ञविद्या भवति, यतो हि सृष्ट्यादावेव प्रजापति-र्मरीच्यादीन् मानसपुत्रानुत्पाद्य समग्रस्य प्रजावर्गस्य कल्याणाय वेदोक्तान् यज्ञाँश्च तेभ्योऽध्यापयामास, पुनश्च तान् प्रत्युक्तवान् यद् अनेन यजनप्रकारेण यज्ञानुष्ठानेन देवा मोदयितव्या:, मुदिताश्च देवा युष्माकमिष्टकामनां पूरयिष्यन्ति, एवं देवा: प्रजाश्च परस्परमन्योन्याश्रिता: सन्त: परं श्रेय: प्राप्स्यन्ति। एतदेव तथ्यं श्रीमद्भगवद्गीतायां भगवता कृष्णेन स्पष्टीकृतं प्राप्यते, तद्यथा—

सहयज्ञा प्रजा: सृष्ट्वा पुरोवाच प्रजापति:।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।।
देवान् भावयतानेन ते देवा भावयन्तु व:।
परस्परं भावयन्त: श्रेय: परमवाप्स्यथ।।

सृष्टिप्रपञ्चे प्रत्येकं चेतनपदार्थस्य जडपदार्थेन सह उपकार्योपकारकभाव-सम्बन्धो जायते। पौराणिकमान्यतानुसारं सृष्टिविधात्रा ब्रह्मणा प्रथमतो दिव्यशक्तिसमन्वितान् देवान् संसृज्य तेभ्यो द्युलोकस्यानन्तसौख्यसाम्राज्यं प्रदत्तम्, अथ च मानवान् संसृज्य तेभ्यो धान्योषधिवनस्पत्यादिजनयित्र्या: पृथिव्या विपुलं वैभवं प्रदत्तम्। अपि च देवमनुष्ययोर्मिथ: साहाय्यं स्यादेतदर्थं द्युलोक: पृथिवीलोकाधीन:, पृथिवीलोकश्च द्युलोकाधीन: कृत:। अत एव दिव्यवैभवसम्पन्ना अपि द्युलोकस्था देवा: पृथिवीलोकस्थेन मनुष्यवर्गेण क्रियमाणेषु यज्ञेषु विधिपूर्वकं दीयमानं हविर्द्रव्यं स्वजीवनाय सततं कामयन्ते, एवमेव पृथिवीलोकस्था मानवा वेदविहितेन यज्ञेन तत्र हविप्रदानद्वारा द्युलोकस्थान् देवान् सन्तोष्य तेभ्यो जीवनशक्तिलाभाय अन्नरसनिष्पादनाय च सुधामयीं जलवृष्टिं पृथिव्यां कामयन्ते। तद्यथा—

इत: प्रदानाद् हि देवा उपजीवन्ति।
यदन्नं होमान् जुहोति देवानेव तत्प्रीणाति।। (श.ब्रा. १३।२।१।१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा।
देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः।।
यज्ञार्थं पशवः सृष्टा देवास्त्वोषधयस्तथा।
यज्ञो हि भगवान् विष्णुर्यज्ञे सर्वं प्रतिष्ठितम्।।
(विष्णुधर्मोत्तरपुराणे-६२।१-२)

यज्ञस्वरूपविमर्शः

शब्दनिर्वचनदृष्ट्या 'यज्ञ'शब्दः यज्—देवपूजासङ्गतिकरणदानेषु इति धातोः 'यज्याज्यङ्विच्छ-प्रच्छरक्षो नङ्' (पा.३/३/९०) इति सूत्रेण नङ्प्रत्यये कृते निष्पाद्यते। एतस्यायमर्थः कर्तुं शक्यते यद् इन्द्रादिदेवतानिमित्तं यत्पूजनहवनप्रदानात्मकं कर्म तद्शब्देनाभिधीयते। अपि च देशधर्मरक्षायै वेदादिशास्त्रमर्यादायै च क्रियमाणः श्रुतिस्मृतिप्रतिपाद्यविचारसामञ्जस्यरूपो व्यापार-विशेषो यज्ञः। एवमेव ऋग्वेदाद्यार्षग्रन्थानां नियमपूर्वकं गुरोः सान्निध्येऽध्ययनं तथा पुनः योग्यशिष्येभ्यस्तत्प्रदानमपि स्वाध्याययज्ञ उच्यते। एवमेव जपयज्ञः, ज्ञानयज्ञः, दानयज्ञ इति विविधो यज्ञप्रकारो वक्तुं शक्यते।

सम्पूर्णेऽपि भूमण्डले परमात्मनः पूजनमर्चनञ्च येन केनापि प्रकारेण क्रियते तद् 'यज्ञ'पदेनैवोच्यते। सङ्क्षेपेणेदं वक्तुं शक्यते यद् ईश्वरार्पणबुद्ध्या क्रियमाणं निखिलमपि कर्म यज्ञो भवति, ईश्वरविरहितं कर्म लोकबन्धकं जायते। यथोक्तं गीतायाम्—

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।। (३।९)

एतदतिरिक्तं श्रौतसूत्रकारेण महर्षिणा कात्यायनेन 'अथ यज्ञं व्याख्यास्यामः' इति प्रतिज्ञाय अग्रिमे सूत्रे यज्ञस्वरूपं 'द्रव्यदेवतात्या' इति सूत्रेण निरूपितं प्राप्यते, तदनुसारं देवतामुद्दिश्य हविष्यान्नपदार्थानां सोमरसादिविधिविहितद्रव्याणां वा अग्नौ परित्यागो याग उच्यते। अत्र भाट्टदीपिकाकारेणाप्युक्तं यत्'—'यत्र प्रक्षेपाङ्गको देवतोद्देश्यपूर्वको द्रव्यत्यागोऽनुष्ठीयते स यागपदार्थः' (टी. ४।२।२)। भगवता वेदव्यासेनापि मत्स्यपुराणे यज्ञस्वरूपं तथैव परिभाषितमस्ति। तद्यथा—

देवानां द्रव्यहविषाम् ऋक्सामयजुषां तथा।
ऋत्विजां दक्षिणानाञ्च संयोगो यज्ञ उच्यते।। (१४४।४४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यज्ञस्य स्वरूपद्वयम्

मूलरूपेण यज्ञस्य द्विधा स्वरूपं वक्तुं शक्यते। तत्र प्रथमं प्राकृतं स्वरूपं द्वितीयमनुकृतिस्वरूपमिति। तत्राद्यन्तु परमेश्वरनिर्देशमनुसृत्य सूर्यचन्द्रादयो देवा नित्यमनुतिष्ठन्ति, द्वितीयोऽनुकृतिरूपो यज्ञः परमेश्वरस्य शाब्दिकविग्रहरूपेण वेदेन प्रतिपादित ऐहिकामुष्मिकफलप्राप्तिकामनया मनुष्यैरनुष्ठातुं शक्यते। एतस्यैवानुकृतिरूपस्य यज्ञस्य शास्त्रेषु श्रौत-स्मार्तभेदेन द्विधाप्रकारो द्रष्टुं शक्यते। साक्षात् श्रुतिवाक्यविहितो यज्ञः श्रौतयज्ञः। वेदमूलकैः स्मृतिपुराणादिभिश्च प्रतिपादितो यज्ञः स्मार्तयज्ञ उच्यते।

श्रौतयागाः

यद्यपि श्रुतिप्रतिपादिता यज्ञाः कामनाभेदेन वेदेषु बहवः समाम्नाताः, तथापि सर्वविधयागानां प्रकृतिभूता यागाः केवलं पञ्चविधा भवन्तीति परिगण्यते सूत्रकारैः। तद्यथा—अग्निहोत्रं दर्शपूर्णमासः चातुर्मास्यं निरूढपशुबन्धः सोमयागश्चेति। अत्र श्रौतसूत्रकारैः श्रौतयागानां स्वरूपगतसाम्यमाधारीकृत्य वर्गद्वये विभाजनं विहितम्। तत्र प्रथमो वर्गः—सप्त हविर्यज्ञसंस्थाः, द्वितीयः सप्त सोमयज्ञसंस्था इत्युच्यते। तत्र प्रथमवर्गे सप्त यागाः परिगणिताः, यत्र भिन्न-भिन्नहविर्द्रव्याणि विभिन्नेभ्यो देवेभ्यो दीयन्ते, तद्यथा—अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासः आग्रायणं, चातुर्मास्यं, निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञश्चेति। द्वितीये वर्गे सोमरसद्रव्याका सप्त यागाः परिगण्यन्ते, तद्यथा—अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रम्, आप्तोर्यामश्चेति। अन्येऽपि केचन यागाः सोमयागाङ्गत्वेन स्वतन्त्रयागत्वेन वा श्रौतयागान्तर्गता परिगण्यन्ते, तद्यथा—राजसूययागः, अश्वमेधयागः, वाजपेययागः, अग्निचयनयागश्चेति। एतेषां श्रौतयागानां विस्तृतं परिज्ञानं विभिन्नवेदशाखासम्बद्धेषु श्रौतसूत्रेषु ब्राह्मणग्रन्थेषु च प्राप्यते।

स्मार्तयागाः

स्मार्तयागानामपि द्विधा विभागः कर्तुं शक्यते। तत्र प्रथमः, येषां यागानां विधानं विभिन्नवेदशाखासम्बद्धेभ्यो गृह्यसूत्रेभ्यः कृतं प्राप्यते, द्वितीयः, येषां यागानां निर्देशो विभिन्नाभिः स्मृतिभिः पुराणैश्च प्राप्यते। गृह्यसूत्रोक्तयागेषु चरुपाकविधानाद् एते यागाः 'पाकयज्ञ' इत्यभिधानेन व्यवह्रियन्ते। पारस्कर-गृह्यसूत्रानुमतेन पाकयज्ञश्चतुर्धा विभक्तुं शक्यते। तत्र प्रथमः "हुतयज्ञः", अत्र देवतामुद्दिश्य केवलं हवनविधानं क्रियते, द्वितीयः "प्रहुतयज्ञः" अत्र हवनं बलिहरणञ्चोभयं विधानं क्रियते, तृतीयः "प्राशितयज्ञः", अत्र काञ्चिद्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मङ्गलकामनामधिकृत्य केवलं ब्राह्मणभोजनं विधीयते, चतुर्थः "अहुतयज्ञः", अत्र वेदादिसच्छास्त्राणां भागवतादिपुराणानाञ्च श्रवणविधानं कृतमवलोक्यते।

गृह्यसूत्रान्तरेषु सामान्येन पाकयज्ञानां संख्या सप्त दृश्यते, तेषां नामानि चेत्थं विद्यन्ते—औपासनहोमः, वैश्वदेवः, पार्वणम्, अष्टकाश्राद्धं, मासिकं श्राद्धं, श्रवणाकर्म, शूलगवश्चेति। एतेषां प्रथमतस्त्रयो यागा अद्यापि ब्राह्मणगृहेषु प्रचलिताः सन्ति। "अतिथिदेवो भव" इति श्रुत्युक्तपरम्परामनुश्रित्य स्मृतिग्रन्थेषु अतिथिसेवामूलको नृयज्ञः पञ्चमहायज्ञेष्वन्यतमरूपेण प्रतिपादितः। तद्यथा—

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।। (मनु० ३।७०)

श्रौतयागानां दुर्बोधतया दुःसम्पाद्यतया च साम्प्रतमेतेषामनुष्ठानमत्यल्पमेव दृश्यते, परं स्मार्तयागानान्तु लोकानुरागतया सुबोधत्वात् सर्वत्र बाहुल्येनानुष्ठानं दरीदृश्यते। अत्रेदमेव कारणं पश्यामो यत् स्मृतिपुराणादिषु पञ्चदेवोपासनाया महन्महत्त्वं प्रतिपादितं विद्यते। तत्र विधित्रयेण उपासनायाः प्रकारो निर्दिष्टः, तद्यथा—जपात्मकविधिः, होमात्मकविधिः, अभिषेकात्मकविधिश्चेति। जपस्य आहुतेर्वा उच्च-उच्चतर-उच्चतमसंख्यावृद्धिपरिमाणेन याग-महायागातियागरूपेण भेदत्रितयं जायते। शास्त्रेषु विभिन्नदेवतोपासनाया विधिसम्पूर्तये जपसंख्या आहुतिसंख्या वा निर्धारिता विद्यते। यागनिर्धारितजपसंख्याया द्विगुणिता महायागे त्रिगुणिता अतियागे सामान्येन विधीयते। विष्णुयागपद्धत्यनुसारं होमात्मकविष्णुयागसम्पूर्तये षष्टिसहस्राधिकमेकलक्षमाहुतिसंख्या निर्धारिता प्राप्यते। महाविष्णुयागाय विंशतिसहस्राधिकलक्षत्रयमाहुतिसंख्या निर्धारिता विद्यते। एवमेव अतिविष्णुयागसम्पादनाय अशीतिसहस्राधिकं लक्षचतुष्टयमाहुतिसंख्या निर्धारिता दृश्यते।

यज्ञपञ्चाङ्गम्

ब्राह्मणग्रन्थेषु यज्ञस्य यागस्य वा पञ्चाङ्गानि प्रतिपादितानि सन्ति, तानि यथा देवता, द्रव्यम्, मन्त्रः, ऋत्विक्, दक्षिणा चेति। सर्वेषां यज्ञाङ्गानां स्ववैशिष्ट्यमनिवार्यत्वञ्च वरीवर्ति। तत्र देवतादिव्यैश्वर्यसम्पन्ना त्रिधा विभक्ता भवन्ति, तद्यथा—आजानदेवता, कर्मदेवता, आजानजदेवता चेति। आजानदेवता हि प्राकृतदेवता उच्यन्ते, परमेश्वरसङ्कल्पप्रभवा इमे देवा वाय्वाकाशादिरूपाः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूर्यचन्द्रनक्षत्रादिरूपाश्च सन्तोऽहर्निशं सृष्टिं सञ्चालयन्ति। कर्मदेवता हि वेदोक्तकर्मानुष्ठानेन उत्तरोत्तरं दैवकोटिं प्राप्नुवन्तः कर्मबलेन देवतात्वमधिगता इन्द्र-वरुण-कुबेराद्यभिधेया जायन्ते। आजानजदेवतास्तु प्राकृतदेवताभिराविर्भाविताः। वसु-रुद्रादित्या दिव्यपितरो मरुद्गणाश्चेति रूपाः प्राणिनां कर्मसाक्षिणो भूत्वा कर्मानुसारं तेभ्यो यथासमयं फलं प्रयच्छन्ति।

इमे देवाः समकालमेवानेकत्रात्मानं प्रकटयितुं प्रभवन्ति, अपि च तादृशमलौकिकसामर्थ्यमधिकुर्वाणा भवन्ति यद् एकः सदपि नैजसामर्थ्यमहिम्ना नैकरूपमादधति। सन्दर्भेऽस्मिन् निरुक्तकारो यास्को ब्रह्मसूत्रभाष्यकार आचार्य-शङ्करश्च नितरां संस्मरणीयौ। तद्यथा महाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते, एकस्यात्मनोऽन्ये देवा प्रत्यङ्गानि भवन्ति, इतरेतरजन्मान इतरेतरप्रकृतयो भवन्ति, तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति। (नि. ७।२)

एकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदं गतां गच्छतीति परैश्च न दृश्यते, अन्तर्धानादिक्रियायोगात्। (ब्र.सू.शां.भाष्यम्—१।३।२७)

यज्ञस्य द्वितीयमङ्गं हविर्द्रव्यरूपं भवति, यच्च यज्ञेषु पुरोडाशादिरूपेण तिलजवादिरूपेण च दीयमानं भवति। अग्नौ देवतोद्देश्येन दीयमानं हविर्देवेभ्योऽ-मृतरूपेण प्राप्यते, तदेव देवानां जीवनाधारकं जायते, यथा हि शतपथब्राह्मणे— "इतः प्रदानाद्धि देवा उपजीवन्ति, यदन्नं होमान् जुहोति, देवानेव तत्प्रीणाति"(१३।२।१।१)। सन्दर्भेऽस्मिन् हारीतस्मृतौ महर्षेरङ्गिरसो वचनमिदमेवं प्राप्यते, तद्यथा—

यज्ञेन देवा विमला भवन्ति यज्ञेन देवा अमृतत्वमाप्नुयुः।
यज्ञेन पापैर्बहुभिर्विमुक्ताः प्राप्नोति लोकान् परमस्य विष्णोः।।

मन्त्रो हि यज्ञस्य तृतीयमङ्गं भवति। मीमांसकदृष्ट्या शाब्दिको मन्त्रवर्णः चैतन्यदेवतारूपो भवति, अतो हेतोस्तन्मन्त्रप्रभावेणैव अग्नौ प्रहुतं हविर्देवेभ्यो योग्यमाहाररूपं जायते। देवताया मन्त्रस्य च मिथः सम्बन्धादेव मन्त्रे चैतन्यदेवता-सान्निध्यं जायते। निरुक्तकारो यास्कोऽपि तथैव निर्दिशति, तद्यथा—

यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति।। (नि. ७।१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ऋत्विजो नाम यज्ञेषु विभिन्नकर्मकर्तृत्वेन यजमानवृता ब्राह्मणा भवन्ति, इमे वेदज्ञानसम्पन्ना याज्ञिकविधानसम्पादनकुशलाश्च भवितव्याः। श्रौतयाग-परम्पराणामेतेषां संख्या चतुर्गणेषु विभक्ता भवति। ऋगादिवेदसम्बद्धतया क्रमशो होता, अध्वर्युः, उद्गाता, ब्रह्मा चेति चत्वारो गणप्रमुखा भवन्ति। सोमयागे प्रत्येकस्मिन् गणे चत्वारश्चत्वारः ऋत्विजो भवन्ति। एतेषां नामानुरूपं कार्यविभाजनं जायते। शास्त्रेषु यज्ञपत्नीत्वेन दक्षिणायाः समुल्लेखः प्राप्यते। यथा लोके "विना पत्नी कथं धर्म आश्रमाणां प्रवर्तते" इत्युक्त्या पत्नीं विना धर्मादिकार्यस्य पूर्णता नैवोक्ता, तथैव यज्ञस्यापि पूर्णता तदीयपत्नीरूपां दक्षिणां विना नैव सम्पत्स्यते। दक्षिणाविरहितो यज्ञः श्रुतिस्मृतिपुराणोक्तफलसाधनेऽसमर्थो दृश्यते। अत एव "निर्दक्षिणो हतो यज्ञः" इति स्मृतिवचनमत्र प्रमाणं भवति।

यज्ञस्य सर्वविधपरिपूर्णतायै प्रोक्तपञ्चाङ्गेषु सर्वस्याप्यङ्गस्य यथाविधि सम्पादनमावश्यकं भवति। यदि नाम अङ्गेषु मनागपि न्यूनता जायते, तर्हि यज्ञस्वरूपेण वैगुण्यमागच्छति, येनाभीष्टफलं नासाद्यते।

वेदेषु यद्यपि कामनाबाहुल्येनापि बहवो यागा निर्दिष्टाः सन्ति, तथापि मुख्यरूपेण स्वर्गावाप्तिरेव सर्वविधयज्ञस्य प्रधानफलं जायते। मीमांसकानां स्वर्गरूपं कर्मफलमेव दर्शनान्तरेषु मोक्षः, निर्वाणं, कैवल्यं वा निरूप्यते। अत एव मुमुक्षुजनानां लौकिककर्मण्यनासक्तपुरुषाणामपि यज्ञदानादिकर्मणां निषेधो न क्रियते, यथा हि गीतायां भगवता श्रीकृष्णेनोपदिष्टम्—

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।। (गी० १८।५)

इति यक्षतत्त्वमीमांसायां स्वात्माभिप्रायः।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भागवतप्रस्थाने शब्दस्वरूपस्य तत्प्रमाणत्वस्य च विमर्शः

डॉ० विन्ध्येश्वरीप्रसादमिश्रो विनयः
उपाचार्यः
उज्जयिनीस्थ-विक्रमविश्वविद्यालयस्य
संस्कृतप्राध्ययनकेन्द्रे (स्नातकोत्तरसंस्कृतविभागे)

❀ ❀ ❀

स्तुमः शब्दात्मकं शब्दप्रेरकं शब्दकारणम्।
शब्दप्रमाणगं ब्रह्म कृष्णं श्रुत्यन्तविग्रहम्।।१।।

तन्नुमः शास्त्रनिःस्यन्दं पुराणानाञ्च भूषणम्।
वेदान्तस्य पृथग् हृद्यं प्रस्थानं सर्वसम्मतम्।।२।।

स्वोपज्ञं रसभाष्यञ्च ब्रह्मसूत्रकृतो मुनेः।
वेदव्यासस्य सर्वस्वं श्रीमद्भागवतं सदा।।३।।

वन्दामहे च शास्त्रीयां कामपि प्रत्नपद्धतिम्।
तांस्तांश्च सम्प्रदायस्थानाचार्यान् भगवत्परान्।।४।।

प्रमाऽप्रमा प्रमेयञ्च प्रामाण्यं प्रमितिस्तथा।
यदाश्रित्य विराजन्ते चैतन्यं तदुपास्महे।।५।।

अथ श्रौतप्रस्थानभूता उपनिषदः, स्मार्तप्रस्थानान्तर्गता श्रीमद्भगवद्गीता, दर्शनप्रस्थानात्मकानि च ब्रह्मसूत्राणीति वेदान्तस्य 'प्रस्थानत्रयी' विद्वत्सु प्रथितैव, श्रीमद्भागवतं पुनश्चतुर्थं, सर्वसमन्वयप्रस्थानं', श्रुत्यन्तद्रुमस्य द्रुतं रसरूपं फलम्—अर्थोऽयं ब्रह्मसूत्राणामित्यभियुक्तवाचोयुक्त्या, बादरायणसन्दृब्ध-शारीरकसूत्राणाञ्च 'रसभाष्य'मिति नः प्रतिपत्तिः। ननु कल्पितं निष्प्रमाणक-मिदमभिमतं, पारम्परिकाचार्येष्वप्रतिष्ठिततत्वाद् ग्रन्थस्यास्य च पुराणपरिसीम्न्येव व्यवस्थितत्वादिति चेत्, न, सर्ववेदेतिहासानां सारं सारं समुद्धृतम्[१]।

---

१. श्रीमद्भागवते-१।३।४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्युपक्रम्य,

सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्वलक्षणम्।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्[१]।।

इत्यन्तम्,

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते[२]।।

इत्युपसंहृतिवचनपर्यन्तं च स्वयमेव ग्रन्थकृन्निरूपणसौलभ्यात्—

महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः[३]।।
यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम्[४]।।
एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति।[५]।।
शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम्[६]।।
यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम्[७]।।
श्रीमद्भागवतं शास्त्रं यत्र भागवतैर्यदा[८]।।
श्रीमद्भागवतं शास्त्रं नित्यं यैः परिसेवितम्।
पितुर्मातुश्च भार्यायाः कुलपङ्क्तिः सुतारिता[९]।।

इति पद्मस्कन्दादिपुराणान्तरसङ्कीर्तनादथ च,

'श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासः'[१०] इति स्वामिश्रीधराचार्यवर्यैः,

'शास्त्रे स्कन्धे प्रकरणेऽध्याये वाक्ये पदेऽक्षरे।
एकार्थं सप्तधा जानन्नविरोधेन मुच्यते'[११]।।

'शास्त्रार्थो दशधा हि सा'[१२] इत्येवमादिषु च श्रीमद्वल्लभाचार्यैरपि श्रीमद्भागवतस्य तथात्वव्याहरणात्तदव्याहतम्। अपि च, ग्रन्थोक्ते सर्ववेदान्तसारमित्य-

१. श्रीमद्भागवते-१२।१३।१२; २. तत्रैव-१२।१३।१५।
३. श्रीपद्मपुराणस्थे श्रीमद्भागवतमाहात्म्ये-३।२; ४. तत्रैव-३।२७।
५. तत्रैव-३।२८; ६. तत्रैव-३।२९।
७. तत्रैव-३।३७।
८. श्रीस्कन्दपुराणोक्तभागवतमाहात्म्ये-३।१२; ९. तत्रैव-३।१५।
१०. श्रीश्रीधराचार्यकृत'भावार्थदीपिका टीकाया उपक्रमे'।
११. श्रीमद्वल्लभाचार्यकृत'तत्त्वार्थदीपनिबन्धे' भागवतार्थप्रकरणे, कारिका-२।
१२. तत्रैव, कारिका-३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्मिन् पदे 'सर्वेति' सङ्ग्रहादस्य विविधवेदान्तानां, केवलाद्वैतविशिष्टाद्वैतशुद्धाद्वैत-द्वैताद्वैतप्रभृतीनां मिथः समन्वयोऽपि न शक्यस्वीकरणः। किञ्च, 'पिबत भागवतं रसमालयम्'[१] इत्यत्र, 'लीलाकथारसनिषेवणमन्तरेणे'[२]त्यत्र च रसपदस्य प्रयोगात् 'जन्माद्यस्य यतः'[३] इति ब्रह्मसूत्रग्रन्थस्थद्वितीयसूत्रमनूद्य, 'जन्माद्यस्य यतोऽन्वयादिरतश्चार्थेष्वभिज्ञः स्वराडि'[४]त्यनेन ग्रन्थारम्भसामर्थ्याद् रसभाष्यताऽप्यस्य वेदान्तसूत्राणामविरुद्धैवेति सिद्धम्।

अथ प्रकृतमनुसरामः,

वेदान्तस्य पृथक् तुर्यं प्रस्थानं तत्त्वदर्शनम्।
सद्धर्मभक्तिशास्त्रञ्च श्रीमद्भागवतं स्थितम्।।
किन्त्वत्रास्ति पुराणत्वं बहुविद्यात्वमप्यतः।
संश्लिष्टं दर्शनं गूढं विवेक्तव्यं प्रयत्नतः।।

दर्शनं प्रत्येकं प्रमाणप्रमेयाचारभेदेन मुख्यतस्त्रिधा प्रवर्तते, ज्ञानमीमांसायास्तु प्रमाणप्रघट्ट एवान्तर्भावात्। श्रीमद्भागवतं च प्रमेयप्रधानं सत्तत्त्वप्रतिपादनपरं भगवल्लीलाकथारसमधुरमपूर्वं शास्त्रं तथाऽप्यत्र प्रमेयप्रमाणादीनां स्फुटं प्रतिपादनमद्वैतवेदान्तानुगुणं किञ्चिद् वैशिष्ट्यमवगाहमानञ्चोपलभ्यते। प्रमाणानां निबन्धनञ्चात्रैकादशस्कन्धे त्रेधा—

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्।
प्रमाणेष्वनवस्थानाद् विकल्पात्स विरज्यते[५]।।इति।
प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा।
आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह[६]।।

इत्यात्मकञ्च, पुनः—

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम्।
आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये[७]।।

---

१. श्रीमद्भागवते-१।३।३; २. तत्रैव-११।४।४०।
३. ब्रह्मसूत्रे, प्रथमाध्याये द्वितीयसूत्रम्; ४. श्रीमद्भागवते-१।१।१।
५. तत्रैव-११।१९।१७; ६. तत्रैव-११।२८।९।
७. तत्रैव-११।२८।१८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्येवमिति, श्रुतिर्निगमो वेति संज्ञया शब्दप्रमाणं तदनु प्रत्यक्षमैतिह्यमनुमानञ्चेत्याहत्य चतुर्णामङ्गीकारोऽत्रावसीयते। न च, निगमेनात्मसंविदेति द्वितीयस्थल उक्तत्वाद् आत्मसंविदाख्यं पञ्चममपि कल्पनीयमिति जातु भ्रमितव्यम्, तस्य प्रत्यक्ष एवान्तःपातात्, यथाहुर्भागवतभावार्थदीपिकाकाराः श्रीश्रीधरस्वामिनः —

आत्मसंविदा स्वानुभवेन[१]

प्रत्यक्षं स्वानुभवः[२]। इति।

अपि चात्मसंविदेति पृथगुपादानात्प्रत्यक्षेण तद् व्यतिरेक इति टीकाग्रन्थो न मूलमाटीकत इति चेन्मुग्धैः कैश्चिदुट्टङ्क्येत, तदपि न चतुरचेतोहरम्, प्रथमपदेन विषयेन्द्रियसम्पर्कजस्यैव स्थूलबोधस्य द्वितीयेन चात्मविमर्शाख्यस्य सूक्ष्मबोधस्योद्दिष्टत्वात्, अद्वैतप्रस्थानवदत्र श्रीमद्भागवतप्रस्थानेऽपि प्रकारान्तरेणेन्द्रियजन्यं तदजन्यमिति प्रत्यक्षद्वैविध्यकक्षीकारादित्युक्तचातुर्विध्यमेव साधीयः।

अथ किं तावदत्र प्रमाणसामान्यलक्षणं तद्विना विवक्षितेऽर्थे प्रमाणप्रवृत्त्यशक्यत्वादिति चेच्छ्रूयताम्—

न न्यरूपीद्यपि स्पष्टं कण्ठतो मुनिनाऽमुना।
शुकतातेन शास्त्रेऽस्मिन् प्रमाणस्याथ लक्षणम्।।
तथापि ग्रन्थनिर्मन्थप्रक्रियोत्थं प्रकल्प्यते।
मूलानुसारि तट्टीकाकृद्भिरप्यनुमोदितम् ।।

तदित्थम्—

''सदसतोः सदसद्रूपेण ज्ञापकं प्रमाणम्'' इति लक्षणमाविष्कर्त्तुं शक्यते। अयमाशयः—तद्वति तत्प्रकारकं ज्ञानं प्रमा, यथा रजतत्ववति रजते रजतप्रकारकं ज्ञानम्, प्रकृते वस्तुरूपब्रह्मणि वस्तुरूपत्वज्ञानम्। एतदेव सतः सद्रूपेण ज्ञानम्। तथैव, अतद्वत्यतत्प्रकारकं ज्ञानमपि प्रमैव। यथाऽरजतत्ववति शुक्तिकादौ पूर्वमिदं रजतमित्याकारकं भ्रान्तबोधोत्पत्त्या पश्चादाप्तवाक्येन स्वयं तदभ्युपगमेन वा तन्निरस्यत इति भ्रमभङ्गे नेदं रजतमिति शुक्तिकेयमिति बोधोऽपि यथार्थपरत्वेन प्रमैव, दार्ष्टान्तिके अवस्तुभूते प्रपञ्चे पूर्वं मोहादेतत्सत्यमित्यभ्युपेयते, अविद्याकामकर्मजन्यभोगरागादिवासनादिमहिम्ना, परस्तात्, ''त्वय्यद्वितीये

१. श्रीमद्भागवते ११।२८।९ इत्यत्र भावार्थदीपिकाख्यश्रीधरीटीका।

२. तत्रैव-११।२८।१८ इत्यत्र भावार्थदीपिकाख्यश्रीधरीटीका।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवन्नयं भ्रमः''[१], ''मायामात्रमिदं राजन् नानात्वभ्रममात्मनि,''[२] ''नानात्वभ्रममात्मनि''[३], ''संसृतिर्न तु वास्तवी''[४] त्यादिरूपेण नैतत्सत्यमिति यज्ज्ञानमुत्पद्यते तस्यापि प्रमात्वं वक्तुमुचितमेव। एतदेव, ''असतोऽसद्रूपेण ज्ञानम्''। इत्थमत्र प्रमात्वं द्विविधम्—सतः सज्ज्ञानमसतश्चासज्ज्ञानमिति। एतयोरुभयोर्यत्करणं साधकतममन्तःकरणवृत्तिरूपं चक्षुरादीन्द्रियरूपञ्च तदुभयमपि यथायथं प्रमाणभेदेषूपयुज्यमानत्वाद् भागवते प्रमाणमिति निसृष्टार्थः। एतदेव कारिकामुखेनाभिदध्महे—

प्रमा सदसतोर्ज्ञानं सदसद्रूपकञ्च यत्।
प्रमाणञ्च तदुद्भासवृत्तिरिन्द्रियमेव च।।

इति वैशद्यं विस्तरञ्चास्मदीये सन्दर्भान्तरे द्रष्टव्यम्[५]।

श्रीमद्भागवते शब्दप्रमाणस्वरूपम्—

श्रीमद्भागवतशास्त्रे शब्दसन्दर्भाः प्रसङ्गानुगतास्तत्र तत्र विप्रकीर्णा उपलभ्यन्ते। तेषु केचन शब्दस्य स्वरूपनिरूपकाः। केचिच्छब्दार्थसम्बन्ध-प्रतिपादकाः, अन्ये शब्दवृत्त्यभिव्यञ्जनपराः शिष्टा विशिष्टाश्च श्रुतिरूपशब्दस्य प्रमाणत्वबोधका इति पर्यायेणात्र विव्रियन्ते। अथ प्रथमं शब्दस्वरूपविमर्शो यथा—

''शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम्।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत्[६]।।

अत्राहुः भावार्थदीपिकाकाराः—शब्दब्रह्मेति। स्वरूपतोऽर्थतश्च दुर्विज्ञेयम्। तच्च सूक्ष्मं स्थूलं चेति द्विविधम्। तत्र सूक्ष्मं तावत्स्वरूपतोऽपि दुर्ज्ञेयमित्याह—प्राणेन्द्रियमनोमयम्। प्रथमं प्राणमयं पराख्यम्, ततो मनोमयं पश्यन्त्याख्यम्, तत इन्द्रियमयं मध्यमाख्यं तस्य वाग्व्यञ्जकत्वेन वागिन्द्रियप्रधानत्वात्। किञ्च, अनन्तपारम्। समष्टिप्राणादिमयस्य निर्विशेषस्य च तस्य कालतो देशतश्चा-

---

१. श्रीमद्भागवते-१०।५९।३०; २. तत्रैव-१२।४।२५।
३. तत्रैव-११।११।२१; ४. तत्रैव-११।११।२।
५. 'श्रीमद्भागवताभिमतं प्रमाणसामान्यलक्षणं प्रमाणप्रयोजनञ्च' (विन्ध्येश्वरीप्रसादमिश्रो विनयः) 'सारस्वती सुषमा' (सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य शोधत्रैमासिकी) स्वर्णजयन्त्यङ्के प्रकाशितम्।
६. श्रीमद्भागवते-११।२१।३६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिच्छेदात्, अर्थतोऽपि दुर्ज्ञेयत्वमाह—गम्भीरं निगूढार्थमतो दुर्विगाह्यं मतिप्रवेशानर्हम्'[१]।।

वयन्त्वत्र, श्रीमद्भागवते शब्दब्रह्म परब्रह्मेति ब्रह्मणोऽपि व्यावहारिकं द्विधात्वं, 'द्वे ब्रह्मणी वेदितव्ये''[२] इति श्रुत्युक्तिवद् यथा—

शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु।[३]
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम्'।[४]

शब्दे ब्रह्मणि निष्णातो न निष्णायात् परे यदि।
श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः[५]।। इति।

तत्र शब्दब्रह्म वेदात्मकं, परब्रह्म च, 'यतो वाचो निवर्तन्ते'[६] 'न तत्र वागगच्छती'[७] त्यादिश्रुतिसहस्रोपलक्षितं सदसतः परं वेदादिभिर्मृग्यमिति विवेकः। तत्रापि शब्दब्रह्मणः स्वरूपत्रयम्—आधिभौतिकमाधिदैविकमाध्यात्मिकञ्चेति। तत्र आधिभौतिकम्—प्राणमयम्, आधिदैविकम्—इन्द्रियमयम्, आध्यात्मिकम्—मनोमयम् इत्येवं व्यवस्थितिः। एतदपि क्रमेण—

प्रथममनन्तपारं—ध्वन्यात्मकविच्छित्तिभेदाद् अकारादिवर्णसमाम्नायमयं विविधरूपं गणनानर्हं प्राणवृत्तिबन्धनं वैखर्याख्यं वाचः पदम्।

द्वितीयं, ततः सूक्ष्ममिन्द्रियमयमिन्द्रियाधिष्ठातृदेवतानिर्वर्तितक्रमरूपताकं बुद्ध्युपादानं गम्भीरं निगूढं मध्यमाख्यं वाग्वितानम्।

तृतीयं, वर्णाद्यविभागरूपं ततोऽपि सूक्ष्मतरं मनोमयमन्तःकरणपरिणाममयं केवलं स्फुरणात्मकं सङ्कल्पात्मकम्, अत एव दुर्विगाह्यं तात्पर्यावधारणाक्षमं पश्यन्त्याख्यम्।

यथाह, शाब्दिकधुरीणो हरिवृषभोऽपि—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्[८]। इति।

---

१. तत्रैव, 'भावार्थदीपिका'; २. मैत्रायण्युपनिषदि-६।२२।
३. श्रीमद्भागवते-२।४।१०; ४. तत्रैव-११।३।२१।
५. तत्रैव-११।११।१८।
६. तैत्तिरीयोपनिषदि, ब्रह्मवल्ल्यध्याये तृतीयेऽनुवाके नवमे चानुवाके।
७. केनोपनिषदि-१।३; ८. वाक्यपदीये, ब्रह्मकाण्डे, कारिका-१४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तन्त्रेष्वपि—

"स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरीवाक्प्रयोक्तृणां प्राणवृत्तिनिबन्धना।।
केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते।।
अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी[१]।।

भगवतः सृष्टिलीलायां शब्दब्रह्मणः साक्षान्मूर्त्तिः परमेष्ठी प्रजापतिर्हिरण्यगर्भः, तस्यैव दहराकाशे नादात्मकस्य ओङ्कारस्य प्रस्फोटस्तेन चाक्षरसमाम्नायस्तदनु चत्वारो वेदास्तदङ्गानीतिहासपुराणादीनि च प्रादुर्बभूवुर्यथा भागवत एव—

कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः।
स वै विश्वसृजामीशो वेदादीन् मुखतोऽसृजत्।
एवं व्याहृतयश्चासन् प्रणवस्तस्य दह्रतः।
स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः।
ऊष्माणमिन्द्रियाण्याहुरन्तःस्था बलमात्मनः।
स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः।।
शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः।
ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः[२]।।

अपि च, द्वादशेऽपि स्कन्धे तत्रैव—

"समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते।।

---

१. सिद्धान्तशैवसन्दर्भे अष्टमप्रकरणे (द्रष्टव्यम्—वाक्यपदीये ब्रह्मकाण्डस्य १३१ कारिकायां श्रीसूर्यनारायणशुक्लकृतं भावप्रदीपाख्यं व्याख्यानम् (चौखम्भ-संस्कृत-संस्थान, वाराणसी, षष्ठसंस्करणं, पृ० १४३,१५१)

२. श्रीमद्भागवते–३।१२।३४-४८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः।।
तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह।
ततोऽक्षरसमाम्नायमसृजद्भगवानजः।
अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम्।।
तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान्[१]।।

इत्येवं शब्दब्रह्मणः प्रवृत्तिरनन्तरमनेनैव शब्दात्मकवेदेनार्थात्मिका जगदुत्पत्तिः, यथाऽऽह मनुरपि भगवान्—

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे[२]।।

श्रीमद्भागवतदर्शने जीवब्रह्मणो व्यावर्तिका शक्तिरपीयं पश्यन्त्याख्या अविद्यारूपा वागेव, यथोक्तमेकादशे—

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः[३]।। इति।

अथ परब्रह्म, शब्दागोचरं सर्वकारणकारणमव्यक्तमविवृतमोङ्काररूपं श्रीहरिरेव, यथाहुः श्रीभागवतकाराः—

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम्।
अनादिमध्यनिधनं नित्यं वाङ्मनसः परम्[४]।।
स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक्।
नामरूपक्रिया धत्ते सकर्माकर्मकः परः[५]।।

तत्र व्यक्तस्य शब्दब्रह्मणोऽपि न प्रसक्तिस्तस्यावाङ्मनसगोचरत्वात्, यथोक्तं तत्रैव—

---

१. श्रीमद्भागवते-१२।६।३७-४५; २. मनुस्मृतौ-१।२१।
३. श्रीमद्भागवते-११।१२।१७; ४. तत्रैव-२।१०।३४।
५. श्रीमद्भागवते-२।१०।३६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह।
अहं चान्ये इमे देवास्तस्मै भगवते नमः[१]।।
नमो गिरां विदूराय[२] ....।
...............................वचसाऽनिरुक्तम्[३]।
नैतन्मनो विशति वागुत चक्षुरात्मा
प्राणेन्द्रियाणि च यथानलमर्चिषः स्वाः।
शब्दोऽपि बोधकनिषेधतयाऽऽत्ममूल-
मर्थोक्तमाह यदृते न निषेधसिद्धिः[४]।।

ननु, ''हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यतेत''[५] इत्यत्र,

ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट्।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः।।
शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः।।
स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्।।[६]

इत्यत्र च ओङ्कारस्य परब्रह्मरूपता शक्यानुसन्धाना 'तस्य वाचकः प्रणवः'[७] 'साक्षाद् वाचकः परमात्मनः'[८] इत्यादि भगवत्सम्मतप्रामाणिकवचनेषु निरूपितत्वात्। अपि च—

''ओमित्येतदक्षरमिदं सर्वं, तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव, यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव''[९] इत्यादिभिः श्रुतिमन्त्रवर्णैरपि समर्थितत्वादस्य वेदादीनां बीजरूपता सर्वकारणकारणता अथ च परब्रह्मता निर्बाधैव। श्रीमद्भागवते पुनश्च,

---

१. तत्रैव-३।६।४०;
२. तत्रैव-८।३।१०।
३. तत्रैव-८।५।२६;
४. तत्रैव-११।३।३६।
५. तत्रैव-१२।६।३७;
६. तत्रैव-१२।६।३९-४१।
७. योगसूत्रे-१।२७;
८. श्रीमद्भागवते-१२।६।४१।
९. माण्डूक्योपनिषदि-१।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ततोऽक्षरसमाम्नायमसृजद्भगवानजः।
तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः।
सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया[१]।।

इत्युदीर्य, अक्षरसमाम्नायादनन्तरं सृज्यमानवेदादिभिश्चास्य सहावस्थानत्वादुच्चारणादिपारवश्यात्कार्यत्वमथ चानित्यत्वमप्यस्मिन् दुष्परिहरमित्युभयोर्मध्ये विरोधः कथं सङ्गमनीय इति चेत्तदपि सुकुमारशेमुषीविलसितमेव।

ओङ्कारापरपर्यायः प्रणवो द्विविधः। सर्वकारणरूपोऽव्यक्तः परब्रह्मात्मकः, कार्यरूपः शब्दात्मकश्च। यदाह च स्वयं श्रुतिरपि—

''एतद्वै सत्यकामः परं चापरञ्च ब्रह्म यदोङ्कारः''[२]।। इति।

अपि च,

परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।
प्रकर्षेण नवं यस्मात्परं ब्रह्म स्वभावतः।।
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः।
प्रकर्षेण नवत्वस्य हेतुत्वात्प्रणवः स्मृतः[३]।।

इति सूतसंहितायामपि प्रतिपादितत्वात्। श्रीमद्भागवतभावार्थदीपिकाख्यश्रीधर्य्यामपि—

''इमं स्फोटमव्यक्तमोङ्कारम्''[४]।
''सनातनं सदैकरूपं तस्य ब्रह्मरूपत्वात्''[५]।

इत्थं परापरत्वसन्धानान्नात्र विसङ्गतिरधिकन्तु परिणतप्रज्ञैः स्वयमेव विभावनीयम्।

अथ प्रस्थानेऽस्मिन् शब्दार्थयोर्मिथः सम्बन्धः किंल्लक्षण इति जिज्ञासायामुच्यते—विगलितमोहावरणानां योगिनां ज्ञानिनां भगवद्भक्तानां दृष्ट्या

---

१. श्रीमद्भागवते-१२।६।४३-४४।
२. प्रश्नोपनिषदि, पञ्चमे प्रश्ने, द्वितीयो मन्त्रः।
३. वाक्यपदीये, ब्रह्मकाण्डस्य सूर्यनारायणशुक्लकृतटीकायामुद्धृतौ श्लोकौ।
४. श्रीमद्भागवते-१२।६।४० इत्यत्र 'भावार्थदीपिका'।
५. तत्रैव-१२।६।४१ इत्यत्र 'भावार्थदीपिका'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्यकारणरूपो मोहावृतान्तःकरणानामविद्याकामकर्मनिरतानां संसारिणां कृते प्रत्याय्यप्रत्यायकभावो व्याकृतिपराणां तत्त्वदर्शिनाञ्च कृते वाच्यवाचकरूप इति त्रिधा। तत्सङ्क्षेपेणात्र विव्रियते, यथा कार्यकारणसम्बन्धः—समग्रस्य कार्यात्मकस्य जगत उद्भूतिः कारणात्मना शब्देनैव, ''स भूरिति व्याहरत्स भूमिमसृजत्''[१] इति श्रवणात्, ''शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः। छन्दोभ्य एव प्रथममेतद् विश्वं व्यतर्तत''।।[२] इति स्मरणाच्च। श्रीमद्भागवतेऽपि—स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्। तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह।। धार्यन्ते यैस्त्रयो भावा गुणानामार्थवृत्तयः''[३]।। इति प्रागुदाहृतवचनैरर्थरूपस्य प्रपञ्चजातस्य शब्दकारणता निपुणमुपवर्णिता तथैवात्र स्वामिपादा अपि—

''इदानीं ततः सर्वप्रपञ्चोत्पत्तिप्रकारमाह—तस्य हीति। त्रयस्त्रिसंख्यायुक्ता भावा यैरकारोकारमकारैर्धार्यन्ते तत्कारणत्वात्। तानेवाह—गुणाः सत्त्वादयः, नामानि ऋग्यजुःसामानि, अर्था भूर्भुवः स्वर्लोका वृत्तयो जाग्रदाद्याः''[४]। इति।

अपि चैतस्मादेव प्राचां महर्षीणां वराणां शापानां भविष्यदुक्तीनाञ्च चरितार्थत्वम्, तन्न तिरोहितं श्रीमद्भागवतस्यैवंविधबहुकथानुशीलनजुषां विदुषाम्।

अयमत्राशयः—सर्वेष्वपि शब्देषु अर्थोद्भावनक्षमत्वमिति राद्धान्तः, अज्ञानस्यावरणशक्त्या शब्दानां सर्जनात्मिका स्वाभाविकी शक्तिः प्रायस्तिरोहितैव सन्तिष्ठते। योगेन तपसा भगवद्भक्तिमहिम्ना सा कस्यचित् कृते कदाचित्कस्मिंश्चिदंशे यदा समुद्घाट्यते तदैव वरशापयोरन्वर्थकत्वमुपपद्यत इति सिद्धान्तसारोऽत्र समुन्नेयः।

परमार्थतया समेऽपि शब्दा (लोकिका वैदिका वा) भगवत्पराः; किन्तु विक्षेपाख्ययाऽज्ञानस्य द्वितीयशक्त्या समेषाम् 'अयं घटोऽयं पटः' इत्यात्मकः सङ्केतो लौकिकेन कोशाप्तवाक्यादिसङ्केतग्रहसाधनेन निर्धार्यते, लौकिकैर्व्याकरणादिशास्त्रैर्व्यवस्थीयते, लौकिकैश्च व्यवहारविद्भिरुपादीयते; किन्तु केषाञ्चिन्मन्त्रवर्णानां सच्चिदानन्दस्वरूपाणां श्रीभगवन्नाम्नां च प्रसङ्गे सत्यपि व्यावहारिकप्रत्याय्यप्रत्यायकभावसम्बन्धे उत्कृष्टप्रेमलक्षणभक्तिसम्पन्नानां कृते तत्स्वरूपमाविर्भवन्न बाध्यत इत्यजामिलादिप्रसङ्गाः सविमर्शं विभावनीयाः। इत्थं सङ्क्षेपेण शब्दार्थयोः कार्यकारणभावसम्बन्धः परमार्थतोऽभ्युपगन्तव्य एव।

---

१. तैत्तिरीयब्रह्मणे-२।२।४।२;
२. वाक्यपदीये-१।१२०।
३. श्रीमद्भागवते-१२।६।४१-४२;
४. तत्रैव 'भावार्थदीपिका'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्याय्यप्रत्यायकभावस्तावद् बोध्यबोधकभावो यथा—गौरिति पदेन सास्नादिमतः प्राणिविशेषस्य बोधः। अयञ्च लौकिकेषु शास्त्रेषु बहुविधमाम्नातत्वान्नेह प्रतन्यते, तथैव वाच्यवाचकभावोऽप्यवगन्तव्यः, श्रीमद्भागवते तु—

स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक्।
नामरूपक्रिया धत्ते सकर्माकर्मकः परः[1]।।

इत्येषा भक्तिसिद्धान्तदृष्टिः,

ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा[2]।।

इत्ययञ्च ज्ञानदृष्ट्या सिद्धान्तसार इति दिक्। न च, जातौ शक्तिग्रहो व्यक्तौ वेत्यत्र संशीतिः समुन्नेया, व्यक्तिवादे आनन्त्यव्यभिचारवज्जातिपक्षेऽप्यर्थक्रियाकारित्वविरहस्य केषाञ्चिन्मते लक्षणाया आवश्यकत्वस्य केषाञ्चिच्चाक्षेपाङ्गीकारगौरवस्य दुर्वारत्वात्। अपि च, भागवतदर्शने व्यक्तिवज्जातिरप्यनित्यैव, वस्तुनि परब्रह्मणि उभयोरपि कल्पितत्वात्, यथोक्तं षष्ठे स्कन्धे—

जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः[3]। इति कृतमप्रासङ्गिकेन।

ननु वृत्तिं विना शब्दो नार्थावबोधे पर्याप्नोतीति श्रीमद्भागवते शब्दस्य वृत्तिमधिकृत्य किमपि न प्रसाधितमिति यदि कैश्चिदुच्येत, तदपि न क्षोदक्षमम्, तत्र अभिधाया, गुणवृत्तेर्व्यञ्जनायाश्च सुस्पष्टसङ्केतितत्वात्, यथा च क्रमेण सङ्केतकानि पद्यानि—

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः[4]।

इत्यत्र मुख्यायाः सङ्केतः

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः।
कथं चरन्ति...............................।[5]
सैषा विष्णोर्महामायाऽबाध्ययाऽलक्षणा यया।
मुह्यन्त्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः[6]।।

---

१. श्रीमद्भागवते-३।३२।२६; २. तत्रैव-३।३२।२८।
३. तत्रैव-६।१५।८। ४. तत्रैव-१२।६।४१।
५. तत्रैव-१०।८७।१; ६. तत्रैव-१२।६।२९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यादौ गौणीवृत्तेः संसूचनम्। एवमेव,

ओङ्काराद् व्यञ्जितस्पर्शस्वरोष्मान्तस्थभूषिताम्[१]।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः[२]।।

इत्येवमादौ च व्यञ्जनाया अपि सद्भावोऽवधारयितुं शक्यः। ननु साहित्यिकैराविष्कृतस्य नूतनव्यापारस्य व्यञ्जनाख्यस्य तत्पूर्ववर्तिन्यस्मिन्पुराणमणौ कुतः सङ्गतिश्चेन्न, बीजरूपेण सर्वेषां भावानां सर्वस्मिन्ननेहसि शक्यसम्भवादिति सर्वं निरवद्यम्।

अथेदानीं श्रुतिरूपशब्दस्य प्रमाणरूपता प्रमाणसङ्गतिश्च यथा—प्रमाणमुपक्रम्यते—

एतस्मिन् भागवतप्रस्थाने पूर्वोक्ते मुख्यप्रमाणसङ्ग्रहश्लोके— श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टय[३]मित्यत्र श्रुतिप्रमाणस्य प्रथमतया ग्रहणादस्याभ्यर्हितत्वं स्फुटमवधारयितुं सुलभम्। सर्वे वेदान्ताश्च तामेव परमप्रमाणत्वेन समाम्नासिषुरिति विदन्त्येव विद्वांसः। प्रमाणशरीरञ्चात्र, सदसतोः सदसद्रूपेण ज्ञापकमित्युक्तपूर्वम्। यद्यपि श्रीभगवानेवात्र वस्तुतः परं प्रमाणत्वेन प्रमाणमूलत्वेन चाङ्गीकृतः—

परं प्रमाणं भगवाननन्तः[४]।
नमः प्रमाणमूलाय कवये शास्त्रयोनये।[५]

इत्यादौ विस्पष्टमुक्तत्वात्। किञ्च, 'एष स्वयंज्योतिरजोऽप्रमेयः'[६] इत्यादिभिर्वचनैः श्रीमति भगवति न वस्तुतो लौकिकानां प्रमाणानां प्रसक्तिस्तस्यात्मस्वरूपत्वात्सर्वभूतानामात्मनश्च स्वतःसिद्धत्वादिति। सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति। न हि पूर्वमित्थमहमित्यात्मानमप्रमाय पश्चात्प्रमेयपरिच्छेदाय प्रवर्तते, न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति, तथापि श्रुत्यादिभिरतद्धर्माध्यारोपणमात्रं निवर्त्यते, न चाज्ञातार्थज्ञापकं संसाध्यत इति प्रमाणप्रवृत्तिरत्र व्यावहारिक्येव। अतः श्रीमद्भागवते शब्दविषयेऽपि—

---

१. श्रीमद्भागवते-११।२१।३९; २. तत्रैव-१२।६।४०।
३. तत्रैव-११।१९।१७; ४. तत्रैव-३।२२।२०।
५. तत्रैव-१०।१६।४४; ६. तत्रैव-११।२८।३५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'शब्दोऽपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः'[१]।

इत्युक्त्वा तस्यौपचारिकत्वमेव प्रसाधितम्। विवृतञ्चात्र स्वामिपादैः—शब्दोऽपीति। शब्दोऽप्यात्ममूलमात्मनि प्रमाणं सदर्थोक्तमर्थादुक्तं यथा भवति तथा आह न साक्षात्; कुतः? बोधकनिषेधतया स्वस्यैव बोधकस्य निषेधरूपत्वात्। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह', 'यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि'। 'यन्मनो न मनुते.........' 'न चक्षुषा पश्यति कश्चिदेन-मित्यादिश्रुतेः।

ननु तर्हि नैवाह श्रुतिः किमिदमुच्यते—अर्थोक्तमाहेति। तत्राह—यदृत इति। 'अथात आदेशो नेति नेति', 'अस्थूलमनणु', 'यतो वाचो निवर्तन्ते', 'यद्वाचानभ्युदितम्' इत्यादिनिषेधस्य यदवधिभूतं ब्रह्म ऋते विना सिद्धिर्नास्ति, सर्वस्य निषेधस्य सावधित्वात्[२]। इति।

अतो निगमापरपर्यायस्य श्रुतिप्रमाणस्य मायोपात्तस्यैव जगदादिरूपेण प्रतिभासमानस्य ब्रह्मणः स्वरूपे व्यवहारदशायामेव क्वचिद् कस्मिंश्चिदेव काले सङ्गतिः —

अगजगदोकसामखिलशक्त्यवबोधकं ते।
क्वचिदजयाऽऽत्मना च चरतोऽनुचरेन्निगमः।।[३]

इति श्रुतिस्तुतिप्रसङ्गेऽपि भगवता भागवतकारेण प्रत्यपादि। अर्थात् सृष्ट्यादिसमये मायया क्रीडतो नित्यं चालुप्तैश्वर्यतया भगवतः स्वरूपे कदाचिदेव निगमानामनुचरणं न सार्वकालिकमित्यभ्युपगन्तव्यम्।

अतः "सत्यं ज्ञानमनन्तं ब्रह्म", "यः सर्वज्ञः स सर्ववित्" इत्यादि-भिर्वचनैः सत्स्वरूपस्यैव ब्रह्मणः पारमार्थिकत्वमभिसन्धायासतश्च प्रपञ्चस्य प्रातिभासिकत्वमेव श्रुतीनां वास्तविकोऽभिप्रायः।

'पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः।
सदसतः परं त्वमथ यदेष्ववशेषमृतम्[४]।।

इति श्रीमद्भागवते निगमनुतिः। अत्राहुः भावार्थदीपिकाकृतः—

१. श्रीमद्भागवते-११।३।३६।

२. तत्रैव-११।३।३६ इत्यत्र 'भावार्थदीपिका'।

३. तत्रैव-१०।८७।१४; ४. तत्रैव-१०।८७।१७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्नमयादिषूपदिश्यमानेषु यश्चरमो 'ब्रह्मपुच्छं प्रतिष्ठा' इति पुच्छत्वेनोक्तः, स त्वमिति सम्बन्धः। ननु तथाऽप्यन्नमयादिष्वन्वितत्वेऽसङ्गत्वव्याहतिरेव, तत्राह—सदसतः परं त्वमथ यदेष्ववशेषमृतमिति। सदसतः स्थूलसूक्ष्मान्नमयादेः परं व्यतिरिक्तं तत्साक्षिभूतम्। अवशेषमवशिष्यत इत्यवशेषमबाध्यमत एव ऋतं सत्यम्। तर्हि किमर्थं तेष्वन्वय उक्तः? शाखाचन्द्रवच्छुद्धस्वरूपलक्षणार्थम्। तथा हि—'स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः' इत्यादिना स्थूलसूक्ष्मक्रमेण पञ्चकोशानुपदिश्य, 'तस्य पुरुषविधतामन्वयं पुरुषविधः' इति पुनः पुनस्तदन्वितत्वेनालक्ष्य 'ब्रह्मपुच्छं प्रतिष्ठा' इति सर्वसाक्षिशुद्धस्वरूपनिरूपणमित्यनवद्यम्[१]।

एवमेव प्रकारान्तरेण समर्थयामासुः सुबोधिनीकृतः श्रीमद्वल्लभाचार्याः —

अत्र देहे पुरुषविधोऽन्वयः, यश्च भगवान् अन्नमयादिषु चरमः........ ततोऽत्र देहे कश्चिदान्तरो वर्तते य एवंविधो यदुपरि समागता अन्नरसादयो भवन्ति। अन्यथा भस्मोत्कर एव राशीभूताः स्युः। नन्वन्नमयान्वय एव भगवतो भवतु, को विशेष इति चेत्, तत्राह—अत्रान्नमयादिषु यश्चरम इति। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेषु चरम आनन्दमयः, स तु सर्वान्तरः, आनन्दमयत्वादेव न तस्य प्रयोजनमन्यदस्ति। किञ्च, यत्किञ्चिज्जगति कार्यं तस्य सर्वस्य त्वमेव नियन्ता तदाह—सदसतः परं त्वमिति। यत्सदसतः कार्यकारणयोः परं नियन्तृत्वेन विचारितं ब्रह्म तत्त्वमेवेत्यर्थः।[२]

पद्धत्याऽनया सतः परमात्मनस्तत्त्वमुपपद्यते श्रुतिवचनैरिति पूर्वोक्तलक्षणांशानुगतप्रमाणत्वमेतेषां सङ्गच्छते तथैव,

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'[३] इत्याद्युक्तिभिर्यदाद्यन्तवत्तदसदिति बोधोत्पादनाल्लक्षणस्य द्वितीयांशेऽप्यचरितार्थतेति सुवचम्। इत्थं सतः सद्रूपेणासतश्चासद्रूपेण बोधनत्वादस्य प्रमाणरूपतेत्यवसेयम्।

यत्तु वेदेष्विन्द्रादिदेवतोपासनद्वारेण यज्ञादिभिर्वर्णाश्रमाचारादिधर्मविधानैश्च स्वर्गाद्यामुष्मिकं पुत्राद्याप्तिरूपमैहिकसुखमेवोद्दिष्टं न परमार्थवस्तुनिरूपणमिति केचिदाचक्षीरंश्चेत्तदसत्—

---

१. श्रीमद्भागवते-१०।८७।१७ इत्यत्र 'भावार्थदीपिका'।

२. तत्रैव- श्रीसुबोधिनीटीका।

३. तैत्तिरीयोपनिषदि-२।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम्।।
एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि।।
कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः।
अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदन्ति ते।।
न ते मामङ्ग जानन्ति हृदिस्थं य इदं यतः।
उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः।।
ते मे मतमविज्ञाय परोक्षं विषयात्मकाः।
यजन्ते देवता यज्ञैः पितृभूतपतीन् खलाः।।
उपासते इन्द्रमुख्यान्देवादीन्न तथैव माम्।
इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि।।
एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणाम्।
मानिनां चातिस्तब्धानां मद्वार्ताऽपि न रोचते[१]।।

इति ग्रन्थोक्तभगवद्वचनैर्वेदार्थानभिज्ञानां कामकामानां श्रुतिपरमार्थावबोधने भ्रान्तत्वान्नात्र पूर्वोक्तप्रमाणसङ्गतेर्बाधः।

ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात् कुतोऽस्य वैयर्थ्यमिति चेदुच्यते— वेदोक्तफलश्रुतिरियं भैषज्यरोचनमिव बहिर्मुखानां नृणां मोक्षविवक्षयाऽवान्तरफलैः कर्मसु रुच्युत्पादनमात्रम्। यथा—

'शिखा ते वर्धते वत्स गुडूचीं श्रद्धया पिब'।
'पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान्'।।

इत्यादिभिः प्रलोभनैः पिता माता वा तनयमौषधपानाय प्रेरयति, तथैवात्रापि वेदोक्तयागादीनां फलपरतां निरूप्य तद्द्वारेणान्तःकरणशुद्धिं कामयमाना श्रुतिर्भगवत्यपि मोक्षमेव पुरस्कुरुते। कथं तर्हि कर्ममीमांसका वेदस्य फलपरत्वमेवामनन्तीत्याह—एवमिति। व्यवसितं वेदस्य वास्तविकमभिप्रायं ये

---

१. श्रीमद्भागवते ११।२१।२३-३४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुबुद्धयः फलमुग्धास्ते न जानन्ति कुसुमितां फलप्ररोचनां प्रत्येव परमार्थ-बुद्धित्वात्। अत्र किं कारणं कश्च श्रुतीनां वास्तविकोऽर्थ इत्यभिप्रेत्य वदति स्वयं भगवानेव—

वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे।
परोक्षवादा ऋषयः परोक्षं मम च प्रियम्[१]।। इति।

अयम्भावः—कर्मज्ञानोपासनमिति त्रिकाण्डत्वं व्यश्नुवानानां वेदानां ब्रह्मात्मविषयत्वमेव किन्तु शुद्धान्तःकरणैरेवैतद्बुध्यते तैरेव बोद्धव्यमपि सामान्यैरितरैरनधिकारिभिर्वृथा कर्मत्यागेन भ्रंशप्रसङ्गादिति। ननु जैमिन्यादयो वेदज्ञाः किमिति तथा न वदन्तीति तद्रहस्यमाह भगवान्—वैदिकै ऋषिभिस्तेषां तत्त्वं परोक्षपद्धत्या निरूपितं यतो देवाः प्रत्यक्षद्विषः परोक्षप्रियाः, अहमपि च परोक्षप्रिय एवास्मीति यथाऽऽह स्वयं श्रुतिरेव—

"परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः"[२]।। इति।

एवं रीत्या श्रुतिरूपशब्दप्रमाणस्य, सद्रूपपरमात्मनोऽसद्रूपस्य च संसारस्य तत्तद्रूपतानिरूपण एव परमतात्पर्यम्।

वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहम्[३]।

इति श्रीमद्भगवद्गीतोक्तवचनसङ्गत्या वस्तुतो भगवानेव वेदार्थमपि सम्यग्वेत्ति, नान्यः। यथोक्तं तेनैव श्रीमद्भागवतेऽपि—

किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्।
इत्यस्या[४] हृदयं लोके नान्यो मद्वेद कश्चन[५]।।

अतः स्वयं स एव एतान् प्रश्नान् यथायथमुत्तरयन् प्रोवाच—

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम्।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्।।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति[६]।

तात्पर्यमस्य विवृण्वन्तः श्रीश्रीधरस्वामिनो निगदन्ति—

---

१. श्रीमद्भागवते-११।२१।३५;
२. बृहदारण्यकोपनिषत्-४।२।२।
३. श्रीमद्भगवद्गीता-१५।१५;
४. वेदभारत्याः।
५. श्रीमद्भागवते-११।२१।४२;
६. श्रीमद्भागवते-११।२१।४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अर्थतोऽपि (श्रुतेः) दुर्ज्ञेयत्वमाह—किमिति। कर्मकाण्डे विधिवाक्यैः किं विधत्ते? देवताकाण्डे मन्त्रवाक्यैः किमाचष्टे? प्रकाशयति। ज्ञानकाण्डे किमनूद्य विकल्पयेन्निषेधार्थमित्येवमस्या हृदयं तात्पर्यं मत् मत्तोऽन्यः कश्चिदपि न वेद। ननु तर्हि त्वं मत्कृपया कथय, ओमिति कथयति—

मामेव यज्ञरूपं विधत्ते, मामेव तद्देवतारूपमभिधत्ते, न मत्तः पृथक्। यच्चाकाशादिप्रपञ्चजातं, 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादिना विकल्प्यापोह्यते, निराक्रियते, तदप्यहमेव न मत्तः पृथगस्ति। कुत इत्यपेक्षायां सर्ववेदार्थं सङ्क्षेपतः कथयति—शब्दो वेदो मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य 'नेह नानास्ति किञ्चन' प्रति प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति[१]।" इति श्रीमद्भागवतप्रस्थाने श्रुतिप्रमाणस्य स्वरूपं सङ्गतिश्च दिङ्मात्रमत्र विवेचिते विदुषां मनोमोदायेति शम्।

●

१. तत्रैव 'भावार्थदीपिका'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निपातार्थनिर्णयसमीक्षणम्

डॉ. परमहंसमिश्रः 'हंसः'

ए-३६, बादशाहबाग, वाराणसी

❀ ❀ ❀

निपातार्थनिर्णयसन्दर्भेऽस्मिन् सर्वप्रथमं निपातशब्द एव समाकृषति विमर्शम्। कश्चिदपि पदार्थपारदृश्वा निपातशब्दनिष्पत्तिप्रसङ्गे प्रागेव विप्रष्टुं शक्नोत्येव यत् कथं निपतन्ति पदानि प्रयोगेष्विति? किं ते निपात्यन्तेऽदृश्येन हेतुना केनापि। कथमेतदकस्मात् सम्पद्यते? निपतनं नामापि किमेतत्? पारतन्त्र्य-प्रथाप्रथितैषा प्रथा किमेषा? स्वातन्त्र्यतो वा घटते निपतनमिदं किमिति? किमुद्देश्यकमिदं निपतनं निपातनं वेति? उच्चैः स्थानात् पतनमेव निपातो भवति। किं तत्स्थानम्? नि+पत धातूपसर्गाभ्यां निष्पन्नेऽस्मिन् पदानामुच्चावचेष्वर्थेषु निपातनकर्तृत्त्वस्य कर्त्ता च को भवितुमर्हति? कर्तृत्वं कुत्र वर्त्तते? किं स्वयं पदेऽथवा कस्मिंश्चिदज्ञातादृश्यकर्त्तरीति जिज्ञासाः स्वभावत एवोद्यन्त्येव।

प्रसङ्गेऽस्मिन् स्मरामि महामाहेश्वरस्य श्रीमतोऽभिनवगुप्तपादाचार्यस्योक्ति-मेकाम्—

'तेन बोधमहासिन्धोरुल्लासिन्यः स्वशक्तयः ।
आश्रयन्त्यूर्मय इव स्वात्मसङ्घट्टचित्रताम्'[१] ।।

वस्तुतस्सिन्धोरूर्मय इव बोधादुल्लसनशीलाः शक्तय एव नामाख्यातोपसर्गनिपातादिपदप्रयोगहेतुभूताः प्रयोक्तुरात्मशक्तयः स्वात्मनः सङ्घट्टनादेव वैचित्र्यतामाश्रयन्ति। शब्दार्थेषु ग्राह्यग्राहकात्मना तत्तत्परामर्शरूपतायां च परिस्फुरन्ति।तत्र मन्ये, निपातानां पातनमपि शक्तिसमुच्छलनरूपमेव। यथा घोर-तयोऽपराशक्तयः पुद्गलान् विषयेष्वेवाधस्तात् सम्पातयन्ति, तथैव विवक्षायां समुच्छलिताः समुन्मिषिताश्च विमर्शशक्तिप्रवाहशाखास्वरूपा इच्छाज्ञानशक्तयः सङ्घट्टिताः संत्यः शब्दार्थबोधसौविध्योद्देश्यसमायोजनसम्प्रेषणसम्प्रज्ञानसन्दर्भान् समभिव्यञ्जयितुं पदांशान् पातयन्ति। परिस्थितिवशादेते विभिन्नेषु तत्तद्भावभावितेषु

---

१. श्रीतन्त्रालोके-३।१०२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निपातेषु भाषायां परिभाष्यन्ते विद्वद्भिरिति। परिणामतोऽर्थावबोधरूपस्य भावस्य तत्र पूर्णता परिदृश्यते। लिखितमेतदेव प्रविभाव्य माहेश्वरेणाभिनवेन—

"कामस्य पूर्णतातत्त्वं सङ्घट्टे प्रविभाव्यते"[1]।। इति।

अत: प्रथमं निबन्धेऽस्मिन् वाक्तत्त्वमेव प्रविविच्यते—

विजयतां विश्वस्मिन् वाक्तत्त्वम्। वाचश्चिन्मयत्वं दिव्यत्वं च दर्शयता आथर्वणेन महर्षिणा समुदीरितं यत्—

देवीं वाचमजनयन्त देवास्तां विश्वरूपा: पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मान् उपसुष्टुतैतु।।

इयं वाग् देवी अस्ति। दिवु-क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धात्वर्थसमुन्मेषे सर्वार्थसम्पादनसामर्थ्यं वाचि निहितं निश्चितं समुपलक्ष्यते। भगवती श्रुतिर्विवृणोति—एतां देवा अजनयन्त। तन्त्रशास्त्रे देवा इन्द्रियवर्ग:। करणेश्वर्य एव विश्वस्मिन् शारीरिकीं वाचं निष्पादयन्ति। ऋते करणेश्वर्या वाचश्चमत्काररूपं भावसम्प्रेषणमसम्भवम्। सम्प्रेषणीयता चिदाकाशे चेतसश्चमत्कृतिमयी चपलारूपिणी क्षणप्रभा विद्युच्छशक्तिरेव। शतह्रदा सती मातृका जनयति शब्दान्। शब्देषु ज्ञानरूपिणी शक्तिरेव शाश्वतं समुल्लसति। वेदव्याहृतिरियं मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी ज्ञानानां चिन्मयातीता, शून्यानां शून्यसाक्षिणी। इयमेव ज्ञानरूपिणी शक्ति: शब्देषु शाश्वतं समुल्लसन्ती अर्थसत्तां स्फारयति विस्तारयति सम्प्रेषयति च कर्णकुहरेषु। सर्वत्र विश्वस्मिन् तरङ्गायिता विशिष्टे स्तरे यन्त्रैश्च सुग्राह्या वेद्यतया वेद्या भवति इयमेव वाग्देवी।

परावाक् परमात्मन: परोक्षतां, तस्यान्तरिकं रहस्यरूपत्वं च स्वात्मन्येव धारयन्ती, पश्यन्तीरूपे च दार्शनिकार्थगर्भत्वं निष्पादयन्ती, मध्यमाक्रमेण शब्दार्थसम्बन्धान् आतन्वती, वैखरीरूपेण भावसम्भूतिपरम्परां परत्र सम्प्रेषयन्ती विश्वं सूक्ष्मतया स्थूलतया स्वात्मसात् कुर्वती भाषायां बीजमन्त्रार्थरहस्यरूपान् समुल्लासयति, सहैव पशूनां वाग्व्यवहारेऽपि सम्पूर्णतया प्रतिष्ठिता उभयथा चमत्कारं व्यनक्ति—

देवीं वाचमजनयन्त देवास्तां विश्वरूपा: पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु[2] ।।

---

१. श्रीतन्त्रा० ३।१७०।

२. शु० य० काण्वसंहिता-११।१८।१९२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्येषा देव्यथर्वशीर्षतः समुन्मिषन्ती श्रुतिरेतस्या धेनोर्दुग्धरूपेण रसास्वादने समर्थाया एतस्याः कृपया जीवने सार्थक्यसमन्वितां दिव्यामूर्जस्वलामूर्जां, जयार्थं जागरूकतया जीवितुं च समाह्वयति। शुक्लयजुर्वेदकाण्वसंहितायाम् आजङ्गमीति क्रियास्थाने 'आगनीगन्ति' इति सम्पूर्णा क्रियैव निपातरूपेण समापतिता नूत्नं निपातोदाहरणं प्रस्तौति[१]।

छन्दस्वत्याः सरस्वत्याः संस्कारेण समन्विता संस्कृतभाषा व्याकरणप्रधाना। व्याकरणं कथं संस्कृतभाषां व्याकर्तुं शश्वद् यतते? अस्य प्रश्नस्योत्तरं स्वयं महामाहेश्वरो भगवान् पाणिनिरेव ददाति। स लिखति—स्वतन्त्रः कर्ता। इदं सूत्रं स्वातन्त्र्यवादस्य प्रतिष्ठापकं सूत्रम्—कर्त्तुः स्वातन्त्र्ये या शक्तिः समुल्लसति सैव विमर्शरूपिणी शक्तिः। विमर्श एव स्वातन्त्र्यम् स्वातन्त्र्यमेव कर्त्तुरानन्दः।[२] अनेनैवानन्देन सदान्दोलितः कर्त्ता शाश्वतं विम्रष्टुं शाश्वतं स्रष्टुं समर्थो भवति। बहवो भाषावैज्ञानिकाः कथयन्ति भाषायाः स्रोतसः परिज्ञानं नैवाद्यावधि समाविष्कृतम्; किन्तु केवलं तन्त्रशास्त्रमेवोत्तरयति यद् भाषाया मूलं निश्चप्रचं विमर्शशक्तिरेव।

जगच्चित्रं समालिख्य स्वात्मतूलिकयात्मनि ।
स्वयमेव तदालोक्य प्रीणाति परमेश्वरः ।।

श्लोकमाध्यमेन समुद्घोषयति महार्थमञ्जरीकारो महेश्वरानन्दो यत् स्वात्मफलके स्वात्मतूलिकया जगच्चित्रस्य रचनं तस्य दर्शनं तेन सम्प्रीणनं च विमर्शस्यैव चमत्कार इति। तथैव—

चिदाकाशमये स्वाङ्गे विश्वालेख्यविधायिने ।
सर्वाद्भुतोद्भवभुवे नमो विषमचक्षुषे[३] ।।

इत्युक्त्यनुसारं सर्वाद्भुतानामुद्भवभूमिर्विमर्श एव। विमर्शशक्त्यैव विषमचक्षुर्भगवान् शिवः स्वात्मानं विश्वरूपेण विस्तारयति, स्वयमेव तस्मिन् प्रतिष्ठते, विमर्शशक्त्यैव सर्वप्राथम्येन छन्दस्वत्याः संस्कारसम्पन्नतासंवलितां संस्कृतां वाग्रूपेण परा-पश्यन्ती-मध्यमा-वैखरीक्रमेण भाषां समवतारयति। एवं संस्कृतभाषाया शब्दार्थसम्बन्धे सर्वत्र स्वयं समुज्जृम्भते। एतदेव भाषास्रोतसो रहस्यम्।

एतादृशी संस्कृतभाषा प्रकाशरूपा चिच्छक्त्या समन्विता आमर्शकतया ज्ञानशक्त्या च समन्विता सर्वाकारयोगिनीं क्रियाशक्तिं स्वात्मनि सम्यगधिष्ठाय प्रवर्त्तिता निजानन्दविश्रान्ता शाश्वतीयं देवभाषा।

---

१. शु०य०काण्वसंहिता-३१।२।१६।

२. श्रीतन्त्रसारः (महामाहेश्वरोऽभिनवः) पृ० २१, चौखम्भा-सुरभारती प्रकाशनम्।

३. शिवदृष्टिः, मङ्गलश्लोकः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महामाहेश्वरेण पाणिनिना नटराजनादनिर्बन्धिन्याः ढक्काया नादं श्रुत्वा नादशक्तियोगादेव नादानुसन्धानसाहाय्येन माहेश्वराणां सूत्राणामाविष्करणं कृतम्। नादनिनादनादिनीं वीणावादिनीं स्मारं स्मारं समग्रामष्टाध्यायेषु सङ्ग्रथितां व्याकरणविद्यां वैखरीविद्यया व्यञ्जीत्। इत्येषा सुव्यक्ता साक्षात् सरस्वती सुरभारती शैवस्वाभाव्यं विभासयन्ती मातृकारूपे व्यवततार। महामाहेश्वरः श्रीमदभिनवो मातृकारूपां सरस्वतीं स्तौति—

आदिमुखा कादिकरा टादिपदा पादिपार्श्वयुङ्मध्या।
यादिहृदया भगवती संविद् सरस्वती जयति[१]।।

मातृकारूपेण समभिव्यक्ता सरस्वतीयं सुरभारती निखिलविश्वरहस्य-गर्भगभीरतायाः प्रातीक्यं परातन्वती समुल्लसति। मातृकैव भाषा-वाङ्मयव्याकरण-मूलिका चेति।

संस्कृतभाषायाः शारीरिकं तन्त्रं सुबन्त-तिङन्त-कृदन्त-तद्धित-समास-लिङ्गवचनविशेषणोपसर्गाव्ययादीनामवयवानां समायोजनिकया शक्त्या सन्तन्यते। एतेष्ववयवेषु अव्ययतन्त्रे निपातानां समुन्मेष एवात्र विशेषतो विमृश्य इति निबन्धविषयानुदेशसाकाङ्क्षतो जागर्त्तितराम्।

निपातानां सम्बन्धे शास्त्रेषु सम्यक्तया सविस्तरं प्रतिपादितं वर्त्तते। भर्तृहरिर्विवृणोति निपातमेवम्—

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः[२]।।

श्लोकेऽस्मिन् निपातानामनियतस्वरूपत्वमेवोपसर्गवदिति द्योतितम्। केचिन्निपाता द्योतकाः केचिद् वाचकाः। केचिद् आगमवत् सम्भूय वाचकाः। केचिदर्थवन्तः केचिदनर्थवन्तश्च भवन्ति, अनर्थकानां निपातानामागमवत् प्रवृत्तिर्भवति। ते सम्भूयार्थस्य वाचका भवन्तीति। विशिष्टार्थाभिधायिनां निपातानां गुणैः सह सम्बन्धो भवति। यद्यपि द्योतकत्वमुपसर्गेऽपि भवति; किन्तु उपसर्गाः स्वतन्त्रप्रयोगानर्हा भवन्ति। निपातानां प्रयोगो नामाख्यातपदयोर्नाङ्गत्वेन भवत्यपि तु स्वतन्त्रप्रयोगो भवति निपातानामिति। नैरुक्तिकं निर्वचनमप्यत्र विचारणीयमेव। यास्कः कथयति निपातविषये—

"अथ निपाताः। उच्चावचेष्वर्थेषु निपतन्ति"[३]।

---

१. श्रीतन्त्रालोके (अष्टमे भागे), रहस्यपञ्चदशिका, पृ. ५५९।
२. वाक्यपदीयम् (वाक्यकाण्डम्) १९२; ३. निरुक्ते-१।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाट्यशास्त्रे समुदीरितम्—

प्रातिपदिकार्थयोगाद् धातुच्छन्दोनिरुक्तयुक्त्या च यस्मान्निपतन्ति पदे, तस्मात् प्रोक्ता निपातास्तु[१]।

बृहद्देवतायां लिखितं वर्तते निपातविषये—

इयन्त इति संख्यानं निपातानां न विद्यते।
वशात् प्रकरणस्यैवैते निपात्यन्ते पदे पदे[२] ।।इति।

ऋक्प्रातिशाख्येऽपि निपातसम्बन्धे सन्दृब्धम्—

निपातानामर्थवशान्निपातनादनर्थकानामितरे च सार्थका:[३]।
नेयन्त इत्यस्ति संख्येह वाङ्मयमिताक्षरे चाप्यमिताक्षरे च ये।
इममर्थं भतृहरि: स्फोरयति निपातसम्बन्धिनीषूक्तिषु।।

काशिकायां विश्लिष्टं वर्त्तते यद् निश्चित: पातो येषामिति निपाता:। अर्थाभिधानेषु स्वक्रियायामसमर्थाश्चादयोऽव्यया: सिद्धा:। तथा चाह नामाख्यात-प्रयोगेष्वर्थादभिन्ना निपतन्ति निपाता:[४]।

वस्तुत: पदानां चत्वार एव भेदा भवन्ति—१. नाम, २. आख्यात:, ३. उपसर्ग:, ४. निपातश्चेति। निपातसम्बन्धेऽत्र श्रीमतां डॉ. हरिश्चन्द्रमणित्रिपाठिनां सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्रकाशननिदेशकानां कृति: '**निपातार्थनिर्णय:**' इति शुभाभिधेया सम्यगवलोकिता मया। समुद्रमन्थनवत् सम्यगालोडितेयं वारुणी रचना शेषशेमुषीसंविरज्जुवज्रदृढया शक्त्या, सम्प्राप्तानि च हालाहलहल्लोहलकल्लोलरहितानि पीयूषसंवलितानि विविधान्यमूल्यानि रत्नानीति दृढं वक्तुं शक्यते। शताधिकाभिराप्तोक्तिप्रमाणितेयं कृति: साम्प्रतं स्वत: प्रामाण्यं भजते। चमत्कृतिमयी सूक्ष्मेक्षिकाशक्तिरत्र समुल्लसति। शक्तेन सूक्ष्मतया समीक्षितविषयानुशीलनसामर्थ्येन संवलिता निपातशक्तिपातसुधाधवलितैतेषां विद्वद्वरेण्यानां प्रतिभाविभाऽत्र स्वाभाव्यभव्यतयाऽवलोकयितुं शक्यते।

सर्वप्राथम्येन किमप्यस्मदीयमिति हृदयोद्गारत: प्रागेव समुपोद्घातसन्दर्भे सुधीभिरेभिर्वारुणा निपाता एव स्मारिता:। वरुणस्तु पीयूषरसात्मकं तत्त्वमेव वर्षति।

---

१. नाट्यशास्त्रे, १५; २. बृहद्देवता २।९२।
३. ऋक्प्रातिशाख्ये-१२।२६, पृ० २१९ (सं.सं.वि.वि., वाराणसी)।
४. का० १।३।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वस्तुतो वरुणस्तु शब्दार्थसम्बन्धसुधासमुद्रस्याधिष्ठातृदेव एव। शब्दार्थयोः शक्तिपातसन्निहितार्थप्रथनमेव रसवद्भावभव्यतामाविष्करोति। योजनिकया शक्त्याऽर्थावबोधसम्बोधसम्बन्धे निपाता विबोधयिषामेव विस्तारयन्ति। व्याकरणदृशा व्युत्पन्नाः सिद्धाश्च शब्दा वाक्यविन्यासोपन्यस्ताः प्रयोक्तुः वैचारिकतामेवाभिव्यञ्जयन्ति। तत्र शब्दार्थसमभिव्याहारव्यवहारवेद्यतोद्योतनं भाषायाः सामर्थ्ये निर्भरं भवति। विचारका व्याहरन्ति यत् चिदाकाशतो भाववारिराशिसंवाहिका काचिद् वारुणीवारिदमालैवार्थराशिं वर्षति। तत एव निपतन्ति निपाता अन्वर्थतो वागर्थसौदामिनीचमत्कृतिचमत्काररूपा एव।

प्राणिनां प्राणापानवाहक्रमे सूर्यसोमतत्त्वयोरुन्मेषसमुल्लासविलासक्रमे सूर्यतः शब्दाः सोमतश्चार्था निष्क्रामन्तो मिलित्वा वाचां चिन्मयत्वं सम्पादयन्ति। तत्र सोमतत्त्वसम्पर्काद् हरिश्चन्द्रमणिस्रवदमृतमयी सरस्वती निपातार्थनिर्णये सर्वत्र सहृदयैः साक्षात्कर्तुं शक्यते। सारस्वतोऽयं प्रवाहः परमाम्बायाः पराकालिक्याः प्रसादेन शौक्ल्यसमृद्धिसमिद्धप्रातिभप्रतिभूतिसम्भूतिभाषां वरिष्ठानां सारस्वतसपर्यायां सम्पूर्णतया समर्पितजीवनानां वाग्वारुणीवरदानवरेण्यानां मणिमहोदयगुरुवर्याणां शक्तिपातेनैव प्रवाहित इति स्पष्टमेव। **श्रीमन्तः कालिकाप्रसादशुक्लमहोदया** वाग्वारुणीवेधसः केचिद् देवरूपा एवासन्। अतः कृतिरियं सर्वशुक्लायाः सरस्वत्या वरदानरूपिण्येवेति नास्ति संशीतिलेशः।

वाग्देव्या वाङ्मयविकासक्रमे, नामाख्यातोपसर्गनिपातेति पदानां चातुर्विध्यं शास्त्राचार्यैस्सुपरीक्षितमेव। चतुर्विधपदविभागरूपसिद्धान्तस्य विकासक्रमं विचारयता विदुषांद् वरेण्येन मणिमहोदयेन सम्यगेव प्रतिपादितं यद् एष विकासक्रमः संहिताकालतोऽपि प्राक्कालिकोऽस्तीत्यनुमीयते। स्कन्दस्वामिनो दुर्गाचार्यस्य सम्मतं प्रस्तुवता मणिमहोदयेन निपातार्थनिर्णयस्य प्राक्कालीनं सूत्रमेवाविष्कृतं यत् "कस्यचिच्छब्दग्रामस्यार्थतिरोहणं हि नामातिसुविपुलकालव्यवहारसापेक्षम्"। तदद्यापि पुराविद्भिर्नाधिगतं यद् वैदिककालादपि प्राक् कस्मिन् कालखण्डे पदविभागविकासक्रमेऽर्थतिरोहितिरुपपन्नतया भवितुं लग्ना।

निपातार्थप्रामाण्यमुपपादयता मणिमहोदयेन ऋग्प्रातिशाख्यं नारायणभट्ट-शौनकादयश्च सम्यक् स्मृतिपथमानीता इति। तेषां सदुक्तिभिः प्रमाणयितुं च प्रायत्यत यन्निपातानां परामर्शोऽर्थौपयिक एव। महामुनिपाणिनिदृशा निपातानामपि चातुर्विध्यं ख्यापयता सुगभीरशास्त्रार्थशैलीं परिशीलयता श्रीमणिमहोदयेन निपातानां क्रमिका व्याकरणसिद्धान्तदृष्टिः सुपरीक्षितेति। एवमेव निपातानां द्योतकत्व-वाचकत्वपक्षयोश्च कार्यकारणतार्थभूयस्त्वनामपदव्यवहारतत्त्वद्योतकमूलकत्वादि-विविधा पक्षाश्च सम्यक्तया समीक्षिता दृश्यन्ते। एवमेव क्रमशः शास्त्रान्तरप्रयोग-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रामाण्यसमुपस्थापनद्वारा निपातानां विभक्तिभाक्त्वं नामाख्यातनामधातुमूलकत्वं विभक्तिप्रतिरूपकत्वं स्वरधातूपसर्गोपश्लेषजन्यस्वभावसमृद्धिं च प्रतिपादयता विद्वद्वरेण्येन महदायाससाध्याध्यवसायमाध्यमेन व्याकरणशास्त्रे पथिकृतत्त्वमेव प्रास्थाप्यत। सत्यमेव समुदीरितं विदुषा यत्—''अनुसन्धानप्रबन्धममुं निर्मातुकामेन मया महदसौविध्यमनुभूतम्......... मधुकरवृत्त्याश्रितेन संस्कृतवाङ्मयाकर-ग्रन्थरत्नान्येव विशेषतः समालोडितानीति''।

तत्र प्रथमेऽध्याये निपातानामैतिहासिकविकासक्रमेण सहैव भाषा-शास्त्रार्थविकासक्रमश्च वर्ण्यविषयत्वेनाङ्गीकृताविति। अध्यायेऽस्मिन् संस्कृतभाषाया मौलिकोद्गमस्थाननिर्धारणे विविधान् विचारान् सम्यग्रूपेण परीक्ष्य ऋग्वेद एव मूलमुद्गमस्थानमिति दृढं सिद्धान्तितम्। वैखरीरूपेण वाग्व्यापारे सुव्यक्ता वाग् ऋग्वेद एव प्रामाण्यपुरःसरं विश्वभाषाविद्भिर्निर्धार्यते। सर्वप्राचीनो वाग्देव्याः शब्दविग्रह ऋग्वेद एव। एतस्मादपि प्रागृग्यजुःसामसमन्विता श्रुतिर्व्यासद्वारा विभाजनात् प्राक् श्रुतिपारम्पर्यप्रवाहरूपिणी गुरोर्गुर्वन्तरक्रमेण शिष्यप्रशिष्यक्रमं स्वीकृत्य पारस्परिकविचारसम्प्रेषणसामर्थ्यशालिनी युगान्तं यावत् प्रचलिताऽऽसीत्। भावानामादानप्रदानानुसन्धाने नामाख्यातोपसर्गाणां सम्बन्धे न कापि नियामिका शक्तिरभविष्यत्। निपातानां स्वच्छन्दतया निपतनेऽपि तत्र महत्सौकर्यसौविध्य-सन्दर्भसमाहितिः प्रचलिताऽभविष्यदिति वक्तुमितिहास एव आधारभूतप्रमाणम्।

अस्यामवस्थायां संस्कृतभाषाया मूलगुद्गमस्थानमस्मद्दृशा नूनं तपस्यमानानां महर्षीणां मस्तिष्केऽभ्यानर्षितब्रह्मप्रकाशरश्मिद्रवसुधासम्भाररूपमेव भवितुमर्हति। शतपथब्राह्मणे ऋषित्वसन्दर्भे सन्दृब्धमस्ति यत्—'तदेनान् तपस्यमानान् ब्रह्म अभ्यानर्षत्। तदेतेषां ऋषित्वं सिद्धम्'। 'ऋषयो मन्त्रद्रष्टारः' इत्युक्तावपि मन्त्रदर्शनपरम्परायां संस्कृता दैवी वाग्रूपेणैवावातीतरत्। अस्मादेव कारणादियं दैवी वागित्युच्यते। अत एव वक्तुं शक्यते यत् संस्कृताया नामाख्यातोपसर्गनिपात-प्रपातेषु काचिद् विचित्रा दिव्यता शाश्वतं समुल्लसति।

यत्किञ्चिद् भवेद् ऋग्वेदे मातृकाशरीरिणी सरस्वती शश्वद् ऋच एव रौति। मातृका एव लिपिः। एतदेव हृदि निधाय महाकविना कालिदासेन समभिव्याहृतम्—

''लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्''[१]।

आधुनिकैर्वैदेशिकैः स्वदेशीयैश्च वैदेशिकशिरोमणिभिर्भाषावैज्ञानिकैर्विविधा अप्रकल्प्यप्रकल्प्याः कल्पनाः प्रकल्पिता भारतीयैर्मनीषिभिर्मनीषिताः प्रातिशाख्य-

१. निपातार्थनिर्णयः, पृ० ३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रमोपबृंहिताः पतञ्जलिमहाभाष्यपुलकायिता व्याकरणसिद्धान्तसमर्थिताः शब्दार्थ-सामरस्यसङ्कल्पिता विचारा एव सर्वैः स्वीकर्त्तुं योग्य निष्कर्षतो मान्याः सन्तीति।

भारतीया दृष्टिः संस्कृतामेव मौलिकीं भाषां स्वीकरोति। अत्रत्या एव यायावराः संन्यासिनोऽधीतिबोधाचरणप्रचारणोद्देश्येन प्रेरिता विश्वस्मिन् संस्कृतवाङ्मयविस्तारमकुर्वन्। अत्रत्या वणिजो वाणिज्यव्यवसायाध्यवसायसिद्धा वाग्विपणनेऽपि नैपुण्येन पूर्णतया प्रमाणीभूता विश्वस्मिन् संस्कृतामपि प्रसारितवन्तः। एतद्देशीयैरग्रजन्मभिर्वाङ्मयविस्तारेण सह वृत्तवैदग्ध्यप्रबुद्धा विश्वं चारित्रिकशिक्षयापि समनुगृहीतवन्तः। एतदेवोद्दिश्य लिखितं मनुना—

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः'[१] ।।

तथ्यमेतदाधृत्य वक्तुं शक्यते यद् विश्वभाषापरिवारे संस्कृतैव सर्वप्राचीनतया प्रतिष्ठिता मौलिकी भाषा। भारतीयवाग्धारा स्रोतस्विनीव सारस्वतसमुद्रगामिनी सुरनिम्नगाऽऽस्ते। यूरोपादिदेशीया वाग्धारा अस्या एव स्रोतस्विन्याः प्रवाहप्रणालिकाः कालक्रमेण विलसन्तीति निश्चप्रचम्।

आचार्यश्चतुरसेनशास्त्री स्वकीये 'भारत महान्' इति लोकविश्रुते ग्रन्थे लिखति यत् ''कश्यप(कैस्पियन)समुद्रतटे कश्यपो मरीचिपुत्रो न्यवसत्। तेषु देशेषु विभिन्नानि पुराणकालिकानि स्थानानि सम्प्रति कालक्रमात् परिवर्त्तितानि। चाक्षुषे मन्वन्तरे भरता ग्रीसादिदेशान् विजित्य तत्र राज्यं स्थापितवन्तः। आर्याणामात्मीये ईरानदेशे बहूनि देवनामप्रभावितानि स्थानानि सन्ति। सर्वे समुपासका देशा जातयश्च प्राग् भारतीयसंस्कृतिसंस्कारसम्पन्ना आसन्।

आङ्ग्लभाषायां संस्कृतशब्दानां प्राचुर्यं समुद्घोषयति यद् आङ्ग्लभाषाया अपि प्रसविनी संस्कृतैवासीत्। तद्यथा—

मिन्स-मनस्, मिन्स्टर-मन्दिर, सावरेन-स्वराजम्, विक्ट्री-विजयश्री, सेन्ट-सन्त, प्रीष्ट-पुरोहित, मिसेज-महिषी, सितार-सप्ततार, ड्रम-डमरु, फोनीसियन-फणीसियन (एको वैदिकजातिसमुदायविशेषः), बैबीलोनियन—बाहुबलिनः, रशिया—ऋषिदेशः, अटलांटिक-अतलान्तकः, पैसिफक-प्रशान्तः, हंगरी-शृङ्गेरी, अडोर-आदर, मैन-मानवः, ड्यूटी-दायित्वम्, अलेक्जेन्डर-अलक्षेन्द्रः, ग्रीस-गिरीशः, पाथ-पथिन्, काउ-गौः, इण्टरनल-आन्तरिकः, माइण्ड-मनस्, वायस्-वाणीप्रभृतयस्तद्भवतत्समशब्दाः समुद्घोषयन्ति यत् सम्पूर्णेषु यूरोपीयेषु भूभागेषु प्राक् संस्कृतभाषायाः प्रचार आसीदेवेति। पनामासमुद्रमेलापकस्थले यज्ञभस्मनः

---

१. मनुस्मृतिः-२।२०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राप्तिः, राज्ञो दशरथस्य शिलाताम्रपत्रादीनि प्रमाणानि संस्कृतभाषाया एव मौलिकतां ख्यापयन्ति।

मालिनीविजयोत्तरतन्त्रे तृतीयाधिकारे वर्णानां बीजयोनिविभेदभिन्नानां सृष्टिसन्दर्भे भगवान् चन्द्रशेखरः समुदीरयति यत्—

अघोरो भगवदिच्छाशक्त्या सम्प्रबुद्धः सन् योनिं (स्पर्शान्तःस्थोष्मवर्णराशिं) विक्षोभ्य स्वशक्तिभिस्तत्समानश्रुतीन् वर्णान् असृजत्।[1] योनिवर्णप्रसारस्येदमेकं शास्त्रीयमुदाहरणम्। तैर्वर्णैरिव शास्त्राणि वेदाश्च पुनः पुनः सम्भवन्ति[2]।

सत्यमेव लिखितं विदुषा मणिमहोदयेन यद्, "एवंविधायां संस्कृत-भाषायामाविष्कृताः सर्वज्ञानशाखाः स्वीयामात्मोपलब्धिं ख्यापयन्ति। वैदिक-साहित्येऽपि शब्दसाध्वसाधुविज्ञानस्य, अर्थराशेः सङ्कोचविस्तारस्य, वर्णागमस्य, वर्णविकारस्य, वर्णनाशस्य, वर्णविपर्ययस्य, धात्वर्थस्य, धात्वर्थातिशयस्य च पार्यवाणिको निर्णयस्तत एवोररीक्रियते। वस्तुतः सर्वविधानां निर्णयानां कृते श्रुतिरेव स्वतः प्रमाणीभूतेति"।

तथैव संस्कृतभाषायां लिखितानि पुष्कलशास्त्राण्यपि स्वतः प्रमाणानि। यतस्ते अघोरादिशक्तिशक्तीश्वरैरेव प्रवर्त्तितानि सन्ति। नामाख्यातोपसर्गनिपात-पदानां विभाजनमपि सर्वप्राथम्येन 'चत्वारि वाक्-परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः' इति[3] ऋग्वेदवचन एव सम्प्राप्यते। अस्मिन्नेव सन्दर्भे विद्वद्वरेण्येन लेखकेनैकः सिद्धान्त एव प्रतिष्ठापितः, तद्यथा—

"पदविभागोऽयं निश्चप्रचं विज्ञानसम्मतः। अस्य विमर्शनमृग्यजुर्वाजस-नेयिप्रातिशाख्येष्वथ च बृहद्देवता-अर्थशास्त्र-मीमांसा-नाट्यशास्त्रादिग्रन्थेष्वप्या-साद्यते। एवं संस्कृतवाङ्मयस्य प्रथिततरासु सर्वास्वपि ज्ञानशाखासु पदचातुर्विध्यस्य सिद्धान्तः सिद्धान्तितो वर्त्तते"।

अनन्तानामनन्तार्थानां च निपातानां स्वभावविषये उपसर्गविभक्तिप्रत्यय-स्वरप्रतिरूपकाश्च निपाता भवन्तीति सिद्धान्तमाश्रित्य प्रातिभपरामर्शप्रमाणै-कनिपुणेन मणिमहोदयेन भूरिश आयाससाध्यमहाप्रयासाद् निपातानां वर्गीकरणं कृतम्। तद्यथा—

१. उपसर्गप्रतिरूपकाः, २. विभक्तिप्रतिरूपकाः, ३. तिङ्प्रतिरूपकाः, ४. स्वरप्रतिरूपकाः, सोदाहरणभेदप्रभेदाश्च सक्षमतया समीक्षिता दृश्यन्ते। एतदतिरिक्तं स्वोपज्ञाश्च मिथुनीभूता धातुक्रोडीकृता नामक्रोडीकृतादयो निपातभेदाः प्रस्तूय स्वकीयं प्रावीण्यवैलक्षण्यं प्रतिष्ठापितमिति दृढं वक्तुं शक्यते[4]।

---

१. मालिनीविजयोत्तरतन्त्रम्-३।२६-२७; २. तदेव-३।२९।
३. निपातार्थनिर्णयः, पृ० ४; ४. तदेव, पृं०७-१५ आदिषु पृष्ठेषु द्रष्टव्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मनोभावमूलकेषु निपातेषु प्रयोगविषयको राद्धान्तिको निर्णयोऽप्यत्र प्रतीकतया विभ्राजते। हर्षातिरेकीयादयश्च चतुर्दशविधा निपाता आवैदिकसाहित्यं भोजदेवादिसाहित्यवाङ्मयपर्यन्तं सम्यक् परामृष्टाः सन्ति। वैदिकलौकिक-संस्कृतसाहित्यशास्त्रीयभाषयोर्निपातकृतभेदनिरूपणप्रसङ्गे परिवृढस्य विदुषोऽदूष्यं वैदुष्यं सर्वविमृश्यतयाऽवलोक्यते।

एवमेव निपातार्थनिर्णयस्य द्वितीयेऽध्याये निपाताव्ययोपसर्गेषु विद्यमानानां विसंवादा अपि सुष्ठु परामृष्टाः सन्ति। वैदिकभाषायां प्रातिशाख्ययास्कादिप्रयुक्त-निपातनिर्वचनं विधाय पाणिनिप्रयुक्तव्याकरणव्योम्नि च प्रौढतया सङ्ग्रह-ग्रहिलतागाम्भीर्यं भाषावगाहनगरिष्ठता च प्रदर्शिता वर्त्तते सत्त्वासत्त्वगन्धिनां निपातानां तुलाबोधके चित्रे चित्रायितं वैचित्र्यमेतयोर्निपाताव्ययविसंवादयोः स्वाध्यायिनां कृते महत्सौविध्यनिर्भरमिति। प्रसङ्गेऽस्मिन् प्रमाणतया नारायणभ-ट्टोऽप्युद्धृतः। केवलं विसंवाद एव नैव; किन्तु तेषामन्योन्यसंसक्तवृत्तिमत्त्वं च विचारितं विदुषा लेखकशिरोमणिना मणिमहोदयेन।

तृतीयेऽध्याये निपाता द्योतका वाचका वेति प्रसङ्गे प्रकृतितत्त्वविचारक्रमे भृशं परामृष्टं निपातानामर्थवाचकताविषये। स्वात्मनो विचारान् प्रमाणयितुं शाकटायन-यास्क—पाणिनिप्रामाण्यं प्रस्तुवता विदुषा तत्पश्चाद्भाविनां विचारा अपि प्रौढतया समुपस्थाप्य समीक्षिताः सन्ति।

चतुर्थेऽध्याये उपसर्गाणां पदविज्ञानस्य यादृशं विवेचनं कृतं वर्त्तते, तदन्यत्र दुर्लभमेव, उपसर्गाणां प्रयोगविज्ञानं प्रतिपाद्य तेषामर्थविकासक्रमोऽपि प्रदर्शितो वर्त्तते।

निपातानामर्थविकासक्रमं प्रदर्शयता विदुषा विभिन्नेषु रूपेषु निपातानां का स्थितिर्वर्त्तते, तस्याः सोदाहरणविमृष्टिः प्रस्तुता वर्त्तते। वक्तुं शक्यते यद् **निपातार्थनिर्णयनाम्नीयं** रचना निपातशक्तिपातसंश्लेषणविश्लेषणविमर्शविषये सर्वातिशायिनी कृतिरूपेण संस्कृतसाहित्ये प्रतिष्ठापिता वर्त्तते। सम्पूर्णा कृतिर्मया सम्यग् विमर्शविषयीकृता। सर्वत्र समानरूपेण विदुषो मणिमहोदयस्य रहस्यग्राहिणी शक्तिः समर्थतया समुन्मिषतीति सम्यगनुभूतम्। प्रौढिपुरस्सरां प्रत्यन्तप्रस्थान-प्रतिष्ठितां निपातनिर्णयार्थं सम्प्राप्तप्रतिरूपां प्रव्यक्तप्रविवेकां रचनां प्राप्य संस्कृतसुरभारती सुप्रसन्ना मणिमहोदयं दिव्येन यशःकायेन 'नास्ति येषां यशःकाये जरामरणजं भयम्' इति वरदानेनानुगृह्णातीत्यनुभवामि स्वतश्चाशीः-पीयूषवसेनाभिषिञ्चामीति शम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अष्टाध्याय्यां स्मृतानामाचार्याणां परिचयः

डॉ० गिरिजेशकुमारदीक्षितः
उपाचार्यः, व्याकरणविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

❀ ❀ ❀

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।१।।
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणमामि मुनित्रयम् ।।२।।

पाणिनिविनिर्मिताऽष्टाध्याय्येव व्याकरणस्य मूलमिति सर्वेऽपि शाब्दिका जानन्ति स्वीकुर्वन्ति च। तत्राऽष्टाध्याय्यां पाणिनिप्रणीतानि षण्णवत्युत्तरैकोनचत्वारिंशच्छतसंख्याकानि (३९९६) सूत्राणि विद्यमानानि सन्तीत्यपि नाविदितं शाब्दिकसम्प्रदायनिष्णातानां सुधीजनानाम्। तत्रैतादृशी जिज्ञासा यदा जायते यदेतादृशाः कियन्तोऽन्ये सन्ति विद्वांसः प्रमाणभूता आचार्या ये नामग्राहपुरस्सरं पाणिनिनाऽष्टाध्याय्यां स्मृतास्तदा सूक्ष्मेक्षिकया पर्यालोचनानन्तरं प्रतीयते यदेवम्भूताः केवलं दशसंख्याकाः सन्त्याचार्या येषां नामानि तत्तत्सूत्रेषु पाणिनिना सादरं गृहीतानि सन्ति। तेषां नामानि यथा—

१. आपिशलिः, २. काश्यपः, ३. गार्ग्यः, ४. गालवः, ५. चाक्रवर्मणः, ६. भारद्वाजः, ७. शाकटायनः, ८. शाकल्यः, ९. सेनकः, १०. स्फोटायन इति।

अत्रोपरिनिर्दिष्टानामेतेषां समेषामाचार्याणां पौर्वापर्यक्रमो यतः सुस्पष्टो नास्त्यतो वर्णक्रमानुरोधेनात्रैते निर्दिष्टाः सन्ति। अतः परमिदानीं तेषां समेषामत्र निर्दिष्टानामाचार्याणां यथाक्रमं यथामति यथाशास्त्रञ्च सङ्क्षेपेण परिचयः समुपस्थाप्यते।

१. आपिशलिः (३०० वि.पू.)

अस्य वैयाकरणस्योल्लेखोऽष्टाध्याय्याम्—"वा सुप्यापिशलेः"[१] इत्यत्रैकस्मिन्नेव सूत्रे साक्षादवलोक्यते। अपरत्र "क्रौड्यादिभ्यश्च"[२] इत्यत्र क्रौड्यादि-

---

१. पा०सू० ६।१।९२; २. तदेव-४।१।८०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गणपाठेऽपि पाणिनिना आपिशलिपदस्य समावेशो विहितः।[2] अन्यत्र काशिकायां[1] न्यासे[2] महाभाष्ये[3] महाभाष्यप्रदीपे[4] तन्त्रप्रदीपादिग्रन्थेषु[5] अपि वैयाकरणस्यास्योल्लेखोऽवाप्यते। एकस्मिन् स्थले काशिकायामापिशलिशब्दस्य व्युत्पत्तिरपि प्रदर्शिता वर्तते। तद्यथा—आपिशलस्यापत्यमापिशलिराचार्यः[6]। अत इञ्[7]। इति।

आचार्यः पाल्यकीर्तिः शाकटायनव्याकरणस्यामोघानाम्न्यां वृत्तौ[8] 'अष्टका आपिशलपाणिनीयाः' इत्येवं लिलेख। अनेनेदमनुमीयते यत् पाणिनिव्याकरणवद् आपिशलिव्याकरणमपि अष्टस्वध्यायेषु विभक्तमस्ति। अस्य कृतयो वक्ष्यमाणाः सन्ति। तद्यथा—

१. आपिशलिव्याकरणम्, २. धातुपाठः, ३. गणपाठः, ४. उणादिसूत्रम्, ५. शिक्षा, ६. कोषः, ७. अक्षरतन्त्रम्, ८. सामप्रातिशाख्यमिति।

२. काश्यपः (३००० वि.पू.)

अस्य वैयाकरणस्योल्लेखः पाणिनिना सूत्रद्वये कृतः। तत्र प्रथमं सूत्रम्—तृषिमृषिकृषेः काश्यपस्य''[9], द्वितीयञ्च सूत्रम्—''नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्''[10] इति। तत्र प्रथमे सूत्रे स्वतन्त्रेण काश्यपस्योल्लेखो द्वितीये सूत्रे च गार्ग्यगालवाभ्यां सह काश्यपस्योल्लेखोऽस्ति। काश्यपव्याकरणमद्यावधि नोपलब्धम्। यजुर्वेदप्रातिशाख्ये[11] काश्यपमतानामुल्लेखो दृश्यते। अस्य विदुषः कृतयो निम्नलिखिताः सन्ति।

१. काश्यपकल्पः, २. काश्यपीयसूत्रम्, ३. काश्यपसंहिता, ४. छन्दः-शास्त्रम्, ५. शिल्पशास्त्रम्, ६. अलङ्कारशास्त्रम्, ७. पुराणञ्चेति।

३. गार्ग्यः (३१०० वि.पू.)

अस्य वैयाकरणस्य पाणिनिना त्रिषु सूत्रेषूल्लेखः कृतः। तत्र प्रथमं सूत्रम्-''अङ्गार्ग्यगालवयोः''[12] इति। अत्र गालवेन सहास्योल्लेखः। द्वितीयं सूत्रम्—''ओतो गार्ग्यस्य''[13] इति। अत्र स्वतन्त्ररूपेणास्योल्लेखः। तृतीयञ्च सूत्रम्—नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्''[14] इति। अत्र काश्यपगालवयोर्नामभ्यां सहास्योल्लेखोऽस्ति।

---

१. काशिका, पा०सू०४।२।४५; २. न्यासः, पा०सू०४।२।४५।
३. महाभाष्यम्, पा०सू०४।२।४५; ४. महाभाष्यप्रदीपः, पा०सू०५।१।२१।
५. तन्त्रप्रदीपः-७।३।८६; ६. काशिका, पा०सू० ६।२।३६।
७. पा०सू०४।१।९५; ८. तदेव-३।२।१६१।
९. तदेव-१।२।२५; १०. तदेव-८।४।६७।
११. यजु०प्राति० ४।५; १२. पा०सू०७।३।९९।
१३. तदेव-८।३।२०; १४. तदेव-८।४।६७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दानां निरुक्तिप्रसङ्गे शाकटायनेन सहास्यापि विदुषो नाम विशेषेण दृश्यते। शाकटायनमतानुसारं सर्वे संज्ञाशब्दा धातुजा (व्युत्पन्ना) भवन्ति। गार्ग्यमतानुसारं न सर्वे धातुजा (व्युत्पन्ना) भवन्ति, अपि तु अनेकेऽव्युत्पन्ना अपि सन्ति[१]। प्रातिशाख्येऽपि[२] अस्य विदुषः चर्चा वर्तते।

अयं गार्ग्यशब्दो गोत्रप्रत्ययान्तः। एतेनास्य पितुर्नाम गर्ग इति निश्चीयते। गर्गश्च वैयाकरणभरद्वाजपुत्र आसीत्। यद्यपि गार्ग्यव्याकरणमुपलब्धं नास्ति, तथापि पूर्वोक्तप्रमाणैरेतस्य व्याकरणं सर्वाङ्गपूर्णमिति ऐतिहासिकाः स्वीकुर्वन्ति। अस्य कृतयो वक्ष्यमाणाः सन्ति। तद्यथा—

१. निरुक्तम्, २. सामवेदपदपाठः, ३. सामतन्त्रम्, ४. भूवर्णनम्, ५. तक्षशास्त्रम्, ६. तन्त्रशास्त्रम्, ७. देवर्षिचरितम्, ८. लोकायतशास्त्रञ्चेति।

४. गालवः (३१०० वि.पू.)

पाणिनिना चतुर्षु सूत्रेषु गालवस्योल्लेखः कृतः। तत्र प्रथमं सूत्रम्—"इको ह्रस्वोऽङ्यो गालवस्य"[३] इति। द्वितीयं सूत्रम्—"तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य"[४] इति। तृतीयं सूत्रम्—"अड् गार्ग्यगालवयोः"[५] इति। अत्र गार्ग्येण सहास्योल्लेखः। चतुर्थञ्च सूत्रम्—"नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"[६] इति। अत्र गार्ग्यकाश्यपयोर्नामभ्यां सहास्योल्लेखोऽस्ति।

भाषावृत्तौ[७] पुरुषोत्तमदेवः "इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्" इति गालवव्याकरणविषयकं गालवमतं समुपस्थाप्य 'दध्यत्र' इत्यस्य स्थाने 'दधियत्र' 'मध्वत्र' इत्यस्य स्थाने 'मधुवत्र' इत्येवमुदाहरति।

एतेनेदमनुमीयते यत् पाणिनिनाऽपि कदाचिद् गालवमतमभिलक्ष्यैव, 'भ्वादयो धातवः' इत्यस्य स्थाने "भूवादयो धातवः"[८] इत्येवं सूत्रं प्रणीतमिति। यद्यपि तत्र तत्र टीकाग्रन्थेषु 'भूवादयो धातवः' इत्यस्य भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी, भूवौ आदी येषां ते भूवादयः, भूप्रभृतयो वासदृशाश्च ये ते धातुसंज्ञका भवन्तीत्येवं रीत्या व्याख्यानं विधाय सम्यक् समाधानं विहितम्, तथापि पाणिनिना गालवप्रभावेणेत्थमाचरितमित्यपि कैश्चित् स्वीक्रियते।

---

१. तत्र नामानि सर्वाण्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके। (निरुक्तम्-१।१२)। अन्यत्र निरुक्तम्-१।३,१३।३१।

२. ऋ०प्रा० १।१५;६।३६;११।१७,२६;१३।३१, वा०प्रा० ४।१६७।

३. पा०सू० ६।३।६१;

४. तदेव-७।१।७४।

५. तदेव-७।३।९९;

६. तदेव-८।४।६७।

७. भा०वृ० ६।१।७३;

८. पा०सू० १।३।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाभाष्यकारो महर्षिः पतञ्जलिः—'कुतोऽयं वकारः'? इत्येवं सन्दिह्य 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते'[१] इत्येवं समाधानवाक्येनोपसंहरति।

महाकविः कालिदासोऽपि कुमारसम्भवस्य तृतीये सर्गे मन्ये गालवमतमनुसृत्यैव "त्रियम्बकम्" इति प्रयुक्तवान्। तद्यथा—

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम्।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श[२]॥

गालवस्यान्याः कृतयो निम्नलिखिताः सन्ति। तद्यथा—

१. गालवसंहिता, २. ब्राह्मणग्रन्थः, ३. क्रमपाठः, ४. शिक्षा, ५. निरुक्तम्, ६. दैवतग्रन्थः, ७. शालाक्यतन्त्रम्, ८. कामसूत्रम्, ९. भूवर्णनमिति।

५. चाक्रवर्मणः (३००० वि.पू.)

अष्टाध्याय्यां पाणिनिना "ई चाक्रवर्मणस्य"[३] इति सूत्रेऽस्य वैयाकरणस्य नाम गृहीतम्। उणादिसूत्रेषु "कपश्चाक्रवर्मणस्य"[४] इति सूत्रेऽप्यस्योल्लेखोऽवाप्यते।

एतदतिरिक्तं भट्टोजिदीक्षितेन स्वकीये शब्दकौस्तुभेऽस्य वैयाकरणस्य मतं नामोल्लेखपुरस्सरं समुपस्थापितम्।[५] अयं कश्यपमुनेः पौत्र इत्यैतिहासिकाः स्वीकुर्वन्ति। चक्रवर्मणोऽपत्यं पुमान् 'चाक्रवर्मण' इति व्युत्पत्त्याऽस्य पितुर्नाम चक्रवर्मेति निश्चीयते। चाक्रवर्मणस्य व्याकरणविषयकमेकमपि सूत्रं कुत्रापि नोपलभ्यते। अस्य महानुभावस्य कृतिविषयेऽपि किमपि प्रमाणं नास्ति।

६. भारद्वाजः (३००० वि.पू.)

अष्टाध्याय्यामस्य वैयाकरणभारद्वाजस्य नामोल्लेखः पाणिनिना "ऋतो भारद्वाजस्य"[६] इत्येकस्मिन्नेव सूत्रे कृतो विद्यते। यद्यपि "कृकणपर्णाद् भारद्वाजे"[७] इति सूत्रेऽपि 'भारद्वाज' इत्यस्योल्लेखो दृश्यते; किन्तु तत्र भारद्वाजशब्दः

---

१. महाभाष्यम्, पा०सू०१।३।१; २. कुमारसम्भवम्-३।४४।

३. पा०सू०६।१।१३०; ४. पञ्च०उणा०३।१४४। दश०उणा०७।११।

५. यत्तु कश्चिदाह चाक्रवर्मणव्याकरणे द्वयपदस्यापि सर्वनामताभ्युपगमात् तद्रीत्यायं प्रयोग इति तदपि न, मुनित्रयमतेनेदानीं साध्वसाधुविभागः। तस्यैवेदानीन्तनशिष्टैर्वेदाङ्गतया परिगृहीतत्वात्। दृश्यन्ते हि नियतकालाः स्मृतयः। यथा—कलौ पाराशरी स्मृतिरिति। शब्दकौ०१।१।२७।

६. पा०सू०७।२।६३; ७. तदेव-४।२।१४५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशिकास्थव्याख्यानप्रामाण्येन भारद्वाजदेशवाची एव गृह्यते, न त्वाचार्यवाचीति। तद्यथा—"कृकणपर्णाद् भारद्वाजे"[१] इत्यस्य व्याख्यानप्रसङ्गे काशिकायाम्—'भारद्वाजशब्दोऽपि देशवचन एव न गोत्रशब्दः'"[२] इत्यवाप्यते। अतो भारद्वाजशब्देनानेनाचार्यभारद्वाजस्य ग्रहणं न भवति। तस्मादेकत्रैवास्य महानुभावस्य स्मरणं पाणिनिना कृतमिति सम्पन्नम्।

शास्त्रेष्वनेके भारद्वाजा वर्णिताः सन्ति। तद्यथा—१. सुकेशभारद्वाजः, २. गर्दभीविपीतभारद्वाजः, ३. कृष्णभारद्वाजः ४. द्रोणभारद्वाजश्चेति।

इत्थं भारद्वाजबाहुल्यादत्र कस्य भारद्वाजस्य ग्रहणमभीप्सितमिति जिज्ञासायामैतिहासिकैरुच्यते यद् बार्हस्पत्यभरद्वाजस्य पुत्रो द्रोणभारद्वाज एवात्र भारद्वाजपदेन व्यवहृत इति। अस्य विदुषो वैयाकरणस्य नाम भाषिकसूत्रे[३] प्रातिशाख्ये[४] चापि दृष्टिपथमायाति।

अस्य कृतयो वक्ष्यमाणाः सन्ति। यथा—

१. भारद्वाजव्याकरणम्, २. भारद्वाजवार्तिकम्, ३. आयुर्वेदसंहिता, ४. अर्थशास्त्रमिति।

७. शाकटायनः (३००० वि.पू.)

पाणिनिनाऽष्टाध्याय्यामस्य वैयाकरणस्य नाम्नो ग्रहणं त्रिषु सूत्रेषु कृतमस्ति। तत्र तावत् प्रथमं सूत्रम्—"लङः शाकटायनस्य"[५] इति। द्वितीयं सूत्रम्—"व्योर्लघुप्रयत्नतरः शाकटायनस्य[६]" इति। तृतीयञ्च सूत्रम्—"त्रिप्रभृतिषु शाकटायनस्य"[७] इति।

शाकटायनमतानुसारं सर्वे शब्दा धातुजा अर्थात् व्युत्पन्ना भवन्ति[८]। अत्रार्थे काशिकायामपि जयादित्यः शाकटायनं निर्दिशति। तद्यथा—

नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्[९]।।इति।

---

१. पा०सू० ४।२।१४५;
२. काशिका, पा०सू०-४।२।१४५।
३. भा०सू० २।१९,३।९;
४. तै०प्रा० १७।३,मै०प्रा०२।५।२।
५. पा०सू० ३।४।१११;
६. तदेव-८।३।१८।
७. तदेव-८।४।५०।
८. तत्र नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्च। (निरु०१।१२)
९. काशिका, पा०सू०३।३।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पङ्क्तेरस्या अर्थं विवृण्वता जिनेन्द्रबुद्धिना न्यासे लिखितं यत्—'तदेवं निरुक्तकारशाकटायनदर्शनेन त्रयी शब्दानां प्रवृत्तिः। जातिशब्दाः, गुणशब्दाः, क्रियाशब्दा इति, न सन्ति यदृच्छाशब्दा इति। अथवा जातिगुणशब्दानामपि क्रियाशब्दत्वमेव, धातुजत्वात्। ततश्चैकैव शब्दानां प्रवृत्तिः—क्रियाशब्दा इति[१]।

व्युत्पत्तिप्रदानेऽयं महान् निपुणः। एकस्य प्रातिपदिकस्य व्युत्पत्तिरयमनेकैर्धातुभिः प्रदर्शयति। ऋक्तन्त्रे[२] प्रातिशाख्ये[३] चास्य विदुषो वैयाकरणस्य नाम्नश्चर्चा बाहुल्येन दृश्यते। काशिकाकारोऽपि—'अनुशाकटायनं वैयाकरणाः'[४], 'उपशाकटायनं वैयाकरणाः'[५] इत्युदाहृत्यास्य नाम सादरं गृह्णाति।

महाभाष्ये महर्षिणा पतञ्जलिनाऽपि शाकटायनस्य जीवनप्रसङ्गमभिलक्ष्यैका विशिष्टा घटना उद्धृता वर्तते। तद्यथा—'अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानं कालं नोपलभते। तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं नोपलेभे[६]।

प्रायः सर्वेऽपि आचार्या स्वीकुर्वन्ति यदुपसर्गा विंशतिसंख्याकाः सन्ति। किन्तु शाकटायनमते—'अच्छ, श्रद्, अन्तर' इत्येते त्रयोऽतिरिक्ता उपसर्गाः सन्ति। एवं शाकटायनमते त्रयोविंशतिसंख्याका उपसर्गा भवन्ति। अत्रार्थे बृहद्देवतायां शौनकः शाकटायनं निर्दिशति। तद्यथा—

अच्छ श्रदन्तरित्येतान् आचार्यः शाकटायनः।
उपसर्गान् क्रियायोगान् मेने ते तु त्रयोऽधिकाः[७]।। इति।

अष्टाध्याय्याम् "नडादिभ्यः फक्"[८] इति सूत्रान्तर्गते नडादिगणपाठे पाणिनिना शकटशब्दस्य पाठः स्वीकृतोऽस्ति। तथा च शकटशब्दात्फकि कृते, आयन्-आदेशे च कृते शाकटायनशब्दस्य सिद्धिर्भवति। एवं रीत्या शाकटायनस्य पितुर्नाम 'शकट' इत्यनुमीयते। अनन्तदेवमतानुसारमयं काण्वस्य शिष्य आसीत्। तद्यथा शुक्लयजुःप्रातिशाख्यभाष्ये—'असौ पदस्य वकारो न लुप्यते। असस्थाने स्वरे परे शाकटायनस्याचार्यस्य मतेन। काण्वशिष्यः सः, पुराणे दर्शनात्। तेन

---

१. न्यासः,पा०सू०३।३।१;　　२. ऋक्तन्त्रम्-१।१।
३. ऋ०प्रा०१।१६,१३।३९, वाज०प्रा०३।९,१२,८८;४।५,१२९,१९१।
४. काशिका,पा०सू०१।४।८६;　　५. तदेव-१।४।८७।
६. महाभाष्यम्, पा०सू०३।२।११५;　　७. बृहद्देवता-२।९५।
८. पा०सू०४।१।९९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शिष्याचार्ययोरेकमतत्वात् काण्वमतेनाप्ययमेव। यद्वा शाकटायन इति काण्वाचार्यस्यैव नामान्तरमुदाहरणम्'[१] इति। यद्यपि साम्प्रतं शाकटायनप्रणीतं व्याकरणं नोपलभ्यते, तथाप्यन्यत्र समुपलब्धैः प्रमाणैर्निश्चीयते यदस्य व्याकरणे लौकिकानां वैदिकानाञ्च शब्दानां विस्तृतमन्वाख्यानमासीत्।

अस्यान्याः कृतयोऽधोनिर्दिष्टाः सन्ति। तद्यथा—१. दैवतग्रन्थः, २. निरुक्तम्, ३. कोषः ४. ऋक्तन्त्रम् ५. लघु-ऋक्तन्त्रम्, ६. सामतन्त्रम्, ७. पञ्चपाद्युणादिसूत्रम्, ८. श्राद्धकल्पश्चेति।

८. शाकल्यः (३१०० वि.पू.)

अस्य शाकल्यस्य नाम पाणिनिनाऽष्टाध्याय्यां चतुर्षु सूत्रेषु गृहीतम्। तत्र तावत् प्रथमं सूत्रम्—"सम्बुद्धौ शाकल्यस्येतावनार्षे"[२] इति। द्वितीयं सूत्रम्—"इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च"[३] इति। तृतीयं सूत्रम्—"लोपः शाकल्यस्य"[४] इति। चतुर्थञ्च सूत्रम्—"सर्वत्र शाकल्यस्य"[५] इति। एतदतिरिक्तं शौनकप्रातिशाख्ये[६] कात्यायनप्रातिशाख्ये[७] चास्य वैयाकरणस्य चर्चा वर्तते।

अयं शाकलनाम्नाऽपि व्यवहृतः। प्रमाणञ्चात्र महर्षिपतञ्जलेर्महाभाष्यम्। तत्र महाभाष्ये शाकल्यनियमानामुल्लेखः पतञ्जलिना शाकलनाम्ना कृतः। तथा च वार्तिकम्—सिन्नित्यसमासयोः शाकलप्रतिषेधः''[८] इति। पाणिनिनाऽष्टाध्याय्यामपि "शाकलाद्वा"[९] इति सूत्रे शाकलशब्दस्योल्लेखः कृतः। अत्र सूत्रे "सङ्घाङ्कलक्षणेष्वञ्यञिञामण्"[१०] इति सम्पूर्णं सूत्रमनुवर्त्य—'शाकलशब्दात्सङ्घादिषु प्रत्ययार्थविशेषणेषु वाऽण्प्रत्ययो भवति तस्येदमित्येतस्मिन् विषये' इति सूत्रार्थः क्रियते। तथा च 'शकलस्य गोत्रापत्यम्' इत्यर्थे "गर्गादिभ्यो यञ्"[११] इत्यनेन यञि कृते 'शाकल्यः' इति निष्पद्यते। अनन्तरं शाकल्यशब्दाद् गर्गादियञन्तात् "कण्वादिभ्यो गोत्रे"[१२] इति प्रोक्तार्थेऽणि कृते "आपत्यस्य च तद्धितेऽनाति"[१३] इत्यनोपत्ययकारस्य लोपे शाकलशब्दात् "तदधीते तद्वेद"[१४]

---

१. शुक्लयजुःप्रातिशाख्यभाष्यम्-४।१२९; २. पा०सू० १।१।१६।
३. तदेव-६।१।१२७; ४. तदेव-८।३।१९।
५. तदेव-८।४।५१; ६. ऋक्प्राति०३।१३, २२;४।१३;१३।३१।
७. वाज०प्राति० ३।१०; ८. महाभाष्यम्, पा०सू० ६।१।१२७।
९. पा०सू० ४।३।१२८; १०. तदेव-४।३।१२७।
११. तदेव-४।१।१०५; १२. तदेव-४।२।१११।
१३. तदेव-६।४।१५१; १४. तदेव-४।२।५९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यनेन कृतस्याणप्रत्ययस्य "प्रोक्ताल्लुक्"[१] इत्यनेन लुकि 'शाकलाः' इति, तेषां सङ्घः 'शाकलः' 'शाकलकः' वेति व्युत्पत्त्या शाकलशाकल्ययोर्न कश्चन भेद इति निश्चीयते। प्रातिशाख्ये[२] अपि 'शाकल' इति नाम्नाऽयं वैयाकरणः स्मृतो वर्तते।

ऐतिह्यविदोऽपीदमेव निर्धारयन्ति यत् शाकलः शाकल्यश्चैक एवेति। अस्यापि विदुषो व्याकरणं वैदिकलौकिकोभयशब्दव्युत्पादकमासीत्। यद्यपीदानीं शाकल्यव्याकरणं नोपलभ्यते, तथापि कवीन्द्राचार्यकृतग्रन्थसूच्याम्[३] (गायकवाड़-ग्रन्थमालायां प्रकाशितायाम्) शाकल्यव्याकरणस्य नामावलोक्यते।

एतेषामन्ये ग्रन्था निम्नलिखिताः सन्ति। तद्यथा—

१. शाकलचरणम्, २. ऋग्वेदपदपाठः, ३. माध्यन्दिनपदपाठश्चेति।

९. सेनकः (२९५० वि.पू.)

अष्टाध्याय्यां पाणिनिना केवलमेकस्मिन्नेव सूत्रे "गिरेश्च सेनकस्य"[४] इत्यत्रास्य वैयाकरणस्य नाम गृहीतमस्ति। एतदतिरिक्तमस्य विदुषो वैयाकरणस्य सम्बन्धे कुत्रापि किमपि नोपलभ्यते।

१०. स्फोटायनः (२९५० वि.पू.)

पाणिनिनाऽष्टाध्याय्यामस्य वैयाकरणस्योल्लेखः केवलमेकस्मिन् सूत्रे "अवङ्स्फोटायनस्य"[५] इत्यत्र कृतो वर्तते। 'स्फोटोऽयनं पारायणं यस्य स स्फोटायनः = स्फोटप्रतिपादनपरो वैयाकरणाचार्यः'[६] इति काशिकाव्याख्यानावसरे पदमञ्जर्यां हरदत्तः। व्याकरणे स्फोटस्य चास्ति महन्महत्त्वमिति समेऽपि विद्वांसो जानन्त्येव। स्फोटवाट एव वैयाकरणानां प्रधानवादः। वैयाकरणानां शब्दनित्यत्वेऽयं स्फोट एव हेतुः। पदमञ्जर्यां हरदत्तकृतमुपर्युक्तं व्याख्यान-मनुसृत्यैव मन्ये एवमुच्यते यत् स्फोटप्रवर्तकः स्फोटायन एव।

अस्य विदुषो ग्रन्थप्रणयनादिविषये किमपि कुत्रापि नावलोक्यते।

एवमष्टाध्याय्यां स्मृतानामाचार्याणां सङ्क्षिप्तं विवरणमत्र यथामति समुपस्थापितम्। मन्येऽनेन सङ्क्षिप्तेनापि विवरणेन विद्यानुरागिणो जिज्ञासवश्च नूनमेवोपकृता भविष्यन्तीति शम्।

●

---

१. पा०सू० ४।२।६४; २. ऋ०प्रा०१।६४;११।१९,६२।
३. कवीन्द्राचार्यकृता ग्रन्थसूची, पृ० ३; ४. पा०सू० ५।४।११२।
५. तदेव-६।१।१२३; ६. पदमञ्जरी, पा०सू० ६।१।१२३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शाब्दबोधविमर्शः

डॉ० रमाकान्तपाण्डेयः
विभागाध्यक्षः, व्याकरणस्य
संन्यासीसंस्कृतमहाविद्यालये
वाराणसी

❀ ❀ ❀

समस्तमपि पाणिनिव्याकरणं भागद्वये विभक्तं विद्यते। तत्र प्रथमः प्रक्रियाभागः, द्वितीयस्तु दर्शनभागः। शाब्दबोधशक्तिलक्षणप्रभृतिविचारा दर्शनभाग एव प्राप्यन्ते। तत्र न केवलं वाक्यवाक्यार्थविचारो मीमांसाशास्त्र एव; अपि तु पाणिनिव्याकरणेऽपि वाक्यवाक्यार्थविचारा वर्तन्ते। तत्र वैयाकरण-सिद्धान्तप्रतिपादनप्रसङ्गे जिज्ञासा समुदेति यत् के च ते सिद्धान्ता इति। तज्जिज्ञासायां प्रथमं तावद् वाक्यस्फोट एव मूर्धन्यतमः सिद्धान्तः प्राप्यते। तस्य प्रामुख्यं महावैयाकरणेन नागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायां प्रत्यपादि।

तत्र वाक्यस्फोटो[१] मुख्यः। तत्र वाक्यञ्च तत् स्फोटो वाक्यस्फोट इति कर्मधारये वाक्यमेव स्फोट इत्यर्थः प्रतीयते।

अन्यदर्शनशास्त्रापेक्षया व्याकरणदर्शने किमपि वैशिष्ट्यं प्रतिभाति। यतो हि व्याकरणदर्शने शब्दो वाक्यमित्यपि भवति। अर्थात् प्रत्यये, प्रकृतौ, एकस्मिन् शब्देऽपि वाक्यत्वव्यवहारो वरीवर्ति।

तत्र मानन्तु—उच्यतेऽर्थबोधनाय प्रयुज्यत इति विग्रहे वच्-परिभाषणे इत्यस्माद् धातोः कर्मण्यर्थे 'ऋहलोर्ण्यत्'[२] इति सूत्रेण ण्यत्प्रत्यये उपधावृद्धौ चजोरिति कुत्वे शब्दस्य संज्ञायां वाक्यशब्दो निष्पद्यते। शब्दसंज्ञाया अभावे कुत्वनिषेधे सति 'वाच्यः' (अर्थः) एवं रूपं भवति।

---

१. वैयाकरणसि०लघुमञ्जूषा, पृ०१;   २. पा०सू० ३।१।१२४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनया व्युत्पत्त्या प्रतीयते यदर्थविषयकबोधजनकः शब्दो वाक्यम्। एवञ्च पदे, पदैकदेशे, प्रत्यये, प्रकृतौ च सर्वत्र वाक्यत्वव्यवहार इति व्याकरणस्य विशिष्टा पद्धतिः। एवञ्च 'शब्दो वाक्यम्' इति पक्षे वाक्यार्थबोधः शाब्दबोध एव।

स च शाब्दबोधः क इति जिज्ञासायां व्याकरणशरणिः समुपस्थाप्यते। शाब्दबोधप्रसङ्गे शक्तिग्रह आवश्यको यत् कस्य शब्दस्य कस्मिन्नर्थे शक्तिरिति, एवञ्च शब्दानां शक्तिग्रहः केनोपायेन भवतु। ते चोपायाः कतिविधाः सन्तीत्यत्र न्यायमुक्तावल्यां प्रतिपादितं विद्यते—

शक्तिग्रहो व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः[१]।।

प्रथमतः शक्तिग्रहो वृद्धव्यवहाराद् भवति। सर्वेषूपायेषु वृद्धव्यवहार एव शिरोमणिः। तद्यथा गृहीतशक्तिकेन केनचिदुत्तमवृद्धेन 'घटमानय' इति वाक्यप्रयुक्ते प्रयोज्यवृद्धो घटमानयति। ततः 'पटं नय' इत्युक्ते प्रयोज्यवृद्धः पटमपसारयति। एतादृशं प्रयोज्यप्रयोजकवृद्धव्यवहारं विलोक्य जिज्ञासुर्बालोऽन्वयव्यतिरेकाभ्यां 'घटमानय' इत्यादिवाक्यानां घटकर्मकानयनरूपेऽर्थे शक्तिं गृह्णाति। अयमेव बोधः शाब्दबोध इत्युच्यते। अत एवालङ्कारिकेण आचार्यमम्मटेन काव्यप्रकाशे प्रोक्तम्—

शब्दवृद्धाभिधेयाँश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया।।
अन्यथाऽनुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्।
अर्थापत्त्याऽवबोधेत सम्बन्धं त्रिप्रमाणकम्[२]।।

जिज्ञासुर्बालः प्रमाणत्रयेण शब्दार्थयोर्वाच्यवाचकभावात्मिकां शक्तिं गृह्णाति। प्रयोज्यप्रयोजकवृद्धव्यवहारमवलोक्य व्युत्पित्सुर्बालः प्रथमतो घटानयनं प्रत्यक्षेण पश्यति। वाक्यं शृणोति। श्रुत्वाऽनुमिनोति यदयं प्रयोज्यवृद्धो घटकर्मकानयनविषयकज्ञानवान् तादृशचेष्टादिमत्वाद् इत्याद्यनुमानेन प्रथमतो वाक्ये वाक्यार्थनिरूपितां शक्तिं गृह्णाति। एवं क्रमेण जायमानो बोध एव शाब्दबोधः।

---

१. न्यायसिद्धान्तमुक्तावली, पृ०१०५।

२. काव्यप्रकाशः, पृ०२२२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थापत्तिप्रमाणद्वाराऽपि शब्दार्थयोर्वाच्यवाचकभावात्मकः सम्बन्धो ग्रहीतुमशक्यः।

अर्थापत्तिर्नाम—"अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनमर्थापत्तिः"[१]। घटमानयेत्यत्र घटकर्मकमानयनमित्यर्थोऽनुपपन्नः, शक्तिमन्तरा, अतस्तदुपपादकीभूतस्य वाच्यवाचकभावस्य सम्बन्धस्य कल्पना क्रियते। एवञ्चार्थापत्त्याऽपि शक्तिः ग्रहीतुं शक्यते। शब्दप्रयोज्यो बोधः शाब्दबोध इति व्युत्पत्तिरपि गतार्था भवति। सोऽयं शाब्दबोधो व्यापारमुख्यविशेष्यकः फलमुख्यविशेष्यको वेति, द्वैतं दार्शनिकानां निकाये। तत्र व्यापारमुख्यविशेष्यकशाब्दबोधो भट्टोजीदीक्षितप्रभृत्याचार्यैरङ्गीक्रियते। फलमुख्यविशेष्यकशाब्दबोधो नव्यन्यायशिरोमणिभिर्नागेशैरङ्गीक्रियते। तत्रादौ भट्टोजीदीक्षितमतमालोच्यते। वाक्यस्फोटस्य मुख्यत्वाद् वाक्यजन्यशाब्दबोधे पदार्थनिर्वचनमप्यावश्यकं विद्यते। अतस्तत्र धातोः फलं व्यापारश्चार्थः। तथोक्तं वैयाकरणभूषणग्रन्थे—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।

अत्र प्राङ्नव्यमतभेदेन मतभेदो विराजते। तत्र प्राचीनमते फलव्यापारयोरिति द्विवचनेन फलनिरूपिता व्यापारनिरूपिता धातोः पृथक् शक्तिः, अत एव फले स्तोकादिरूपकर्मणोऽभेदेन ग्रामादिकर्मणश्च भेदसम्बन्धेनान्वयः। अतः "स्तोकं पचति" इत्यादिवाक्यानां प्रयोगः स्वयमेव सुसम्पन्नतामेति।

यद्यपि फले व्यापारे च पृथक्शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकस्य, फलोद्देश्यकव्यापारविधेयकस्य च बोधस्यापत्तिः समापतति। यतो हि उद्देश्यविधेयभावेनान्वयप्रयोजिकायाः पृथगुपस्थितेः सत्त्वात्। अत एव महावैयाकरणा नागेशभट्टाः फलविशिष्टव्यापारे व्यापारविशिष्टे फले च धातूनां शक्तिमङ्गीकुर्वन्ति। विशिष्टवाचकत्वे उद्देश्यविधेयभावान्वयरूपदोषो नास्ति, पृथगुपस्थितेः सत्त्वात्। अस्मिन् पक्षेऽपि फलविशिष्टव्यापारे शक्तौ तु फलस्य पदार्थैकदेशत्वेन तत्र पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिविरोधात् कर्माद्यनन्वयापत्तिः, तन्न्यायास्वीकारे नित्यो घट इति प्रयोगापत्तिः, तस्मात् प्राचीनमतमेव ज्यायः। उद्देश्यविधेयभावेनान्वयनियामकव्युत्पत्तौ धातुभिन्नत्वविशेषणदानेनादोषात्।

---

१. काव्यप्रकाशः, पृ० २२३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च, नव्यमते व्यापारविशिष्टफलत्वफलविशिष्टव्यापारत्वमिति शक्यतावच्छेदकेऽतिगौरवम्। प्राचीननये तु व्यापारत्वं फलत्वञ्च शक्यतावच्छेदकमिति न दोषः, एकवृन्तगतफलद्वय इति न्यायेन, फले व्यापारे च खण्डशः शक्तिरित्याधुनिकमतम्।

मीमांसकास्तु फलमात्रं धात्वर्थ इति स्वीकुर्वन्ति। तेषां मते व्यापारः प्रत्ययार्थः, तत्तु न समीचीनम्, "लः कर्मणि चाकर्मकेभ्यः"[1] इति सूत्रविरोधात्। न हि कुत्रचिद् व्यापारः प्रत्ययार्थत्वेन दृष्टः, अत एवोक्तम्—

'फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति वदन्ति, तन्न, लः कर्मणि इत्यादिसूत्रविरोधात्। न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते'[2]।

कर्ता कर्म संख्या काल इति तिङर्थः, तत्र कर्तृकर्मणोः फलव्यापारयोर्विशेषणम्, संख्याकर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि विशेषणम्। कालस्तु प्राधान्याद् व्यापारे विशेषणम्, प्रथमान्तार्थस्याभेदसम्बन्धेनाख्यातार्थेऽन्वयः, क्रियाभेदाय कालस्तु इत्यादिवचनानुरोधेन। आश्रयस्य समवायेन व्यापारेऽन्वयः। एवञ्च 'देवदत्तस्तण्डुलं पचति' इति वाक्यस्य देवदत्तैककर्तृकस्तण्डुलनिष्ठकर्मतानिरूपको विक्लित्त्यनुकूलो वर्तमानकालिको व्यापार इति शाब्दबोधः प्राङ्मते सम्पद्यते।

अत्र बीजन्तु 'भावप्रधानमाख्यातं सत्त्वप्रधाननामानि'[3] इति निरुक्तम्। तत्र भावप्रधानत्वन्नाम तिङर्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यताकबोधजनकत्वम्। सत्त्वप्राधान्यञ्च सत्त्वं द्रव्यं तन्निष्ठमुख्यविशेष्यताकबोधजनकत्वम्। एवं क्रमेण निरुक्तप्रामाण्यात् प्राचीनैर्व्यापारमुख्यविशेष्यकं बोधमङ्गीकुर्वन्ति।

नागेशास्तु कर्तृप्रत्ययसमभिव्याहारे व्यापारमुख्यविशेष्यकं बोधमङ्गीकुर्वन्ति। कर्मप्रत्ययस्थले फलविशेष्यकं बोधं स्वीकुर्वन्ति। अत एव कारकप्रकरणे प्रौढमनोरमायां 'हरिं भजति'[4] इत्यत्र हरिविशिष्टं भजनमिति वाक्यार्थः, 'हरिः सेव्यते' इत्यत्रापि एवमेवेति प्रतीकमादाय धात्वर्थ एव विशेष्यः। इयाँस्तु विशेषः—तत्र फलांशो विशेष्यः, कर्तरि तु व्यापारांशो विशेष्य इति शब्दरत्ने प्रपञ्चितम्। अत एव 'हरिः सेव्यते' इत्यादौ नागेशमते, हरिकर्मिका व्यापारानुकूला प्रीतिरिति शाब्दबोधः सञ्जायते। तत्र किं प्रमाणमिति जिज्ञासायां भाष्यमेव

---

१. पा०सू० ३।४।६९;
२. परमलघुमञ्जूषा, पृ० १०३।
३. प्रौढमनोरमा, कारकप्रकरणे;
४. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रमाणत्वेन नागेशैरुपन्यस्यते। तत्र 'सुपमात्मनः क्यचि' इति सूत्रे भाष्ये भाष्यकृता उक्तं यत्[१] पुत्रमिच्छति इत्यर्थे क्यच्प्रत्ययो भविष्यति, इष्यते पुत्र इत्यर्थे क्यच्प्रत्ययो न भविष्यति, भिन्नार्थत्वात्। यदि कर्तरि कर्मणि उभयत्र व्यापारविशेष्यक एव बोधः स्यात्, पुत्रकर्मिकेच्छानुकूलव्यापार एवंरूपः, तदा भाष्योक्तभिन्नार्थत्वोक्तिर्व्यर्था स्यात्। अतः 'पुत्रमिच्छति' इत्यत्र पुत्रकर्मिकेच्छानुकूलव्यापार एव बोधः, इष्यते पुत्र इत्यादौ पुत्रकर्मिका व्यापारानुकूलेच्छा एवं बोधः, अतो भिन्नार्थत्वं भाष्यं सङ्गच्छते।

नागेशमते इदं दूषणं समायाति यत् कर्मप्रत्यये फलस्य प्राधान्ये तत्रैव कालान्वयः स्यात्। तथा सति व्यापारविगमेऽपि, फलस्य सत्त्वदशायां पपाच इति प्रयोगः स्यात्। एतन्निवारणायोच्यते यत् फलस्य प्राधान्येऽपि साकाङ्क्षत्वाद् विशेषणीभूते व्यापार एव कालस्यान्वयः, अत एव भूषणे उक्तम्— "क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका"[२] इति।

नागेशमतेऽपरोऽपि दोषः समापतति यत् 'पच्यते तण्डुलः' इत्यत्र फलविशेष्यकबोधस्वीकारे प्रधानीभूतधात्वर्थाश्रयत्वात् तण्डुलस्य कर्तृत्वापत्तिः। प्रधानीभूतधात्वर्थाश्रयत्वमेव कर्तृत्वमिति। एतन्निवारणायोच्यते यद् नेदं कर्तृत्वलक्षणं यत् प्राधानीभूतधात्वर्थाश्रयत्वमिति, अपि तु कर्तृप्रत्ययसमभिव्यावहारे प्राधानीभूतधात्वर्थाश्रयत्वं कर्तृत्वमिति लक्षणम्। 'तण्डुलैः पच्यते' इत्यादौ कर्तृप्रत्ययसमभिव्याहाराभावेन नागेशमते नास्ति दोषः।

यद्यपि नागेशभट्टमते "भावप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानि" इति निरुक्तस्य विरोधः समायाति, तथापि भावप्रधानमित्यत्र भावपदेन फलं व्यापारश्चोभयं गृह्यते। एतावता कुत्रापि नास्ति विरोध इति।

नैयायिकमतम्

तार्किकाः प्रथमान्तार्थमुख्यविशेष्यकबोधमङ्गीकुर्वन्ति, प्रथमान्तार्थस्यैव लोके प्राधान्यात्। तन्मते कृतिराख्यातार्थः, फलं व्यापारश्च धात्वर्थः, कृतेः समवाय-सम्बन्धेन, प्रथमान्तार्थेऽन्वयः। तद्यथा—'देवदत्तः ग्रामं गच्छति' इत्यादिवाक्यस्य, देवदत्तनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् देवदत्त इति बोधः सञ्जायते।

---

१. महाभाष्ये, पृ० १०३।

२. वै०भूषणसारे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किन्तु एतन्मते प्रथमान्तार्थस्य प्राधान्ये तत्रैव संख्याया अन्वयः स्यात्। तथा च 'चन्द्र इव मुखं दृश्यते' इत्यत्र चन्द्रस्यापि प्रथमार्थत्वेन, तत्रापि संख्यान्वयापत्तिस्तथा 'चन्द्र इव मुखे दृश्येते' इत्यादौ सख्यायाश्चन्द्र एवान्वयः, न तु मुखे। एतन्निवारणाय नैयायिकैः कार्यकारणभावस्थले इतराविशेषणत्वं निवेश्यते, तत्तु महद्गौरवम्।

इतराविशेषणत्वनिवेशेन कथञ्चिद् निर्वाहेऽपि 'पश्य मृगो धावति' इत्यादौ नैयायिकमते एकवाक्यताहानिः। अत्र हि भाष्यकृता एकवाक्यता स्वीकृता। एकवाक्यता व्यापारमुख्यविशेष्यकबोध एव भविष्यति। तथा च उत्कटधावनस्यैव प्रतिपिपादयिषत्वेन धावनस्यैव कर्मतासंसर्गेण दर्शनक्रियायामन्वयः। एवञ्च वैयाकरणानां मते मृगकर्तृकं धावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति एकवाक्यतया बोधः। प्रथमान्तार्थवादिमते तु धावति इत्यपेक्षया मृग इति प्रथमान्तं पश्य इत्यपेक्षया त्वमिति प्रथमान्तं धावनाश्रयो मृगो दर्शनाश्रयस्त्वमिति बोधः। अत्र बोधे भाष्यविरोधः स्पष्ट एव।

नैयायिकमते धावनस्यैव मृगविशेषणतया भाने एकत्र विशेषणतयाऽन्वितस्यापरत्र विशेषणत्वायोग इति न्यायेन, दर्शनेऽन्वयानुपपत्तौ प्राधान्याद् मृगस्यैवान्वयः स्यात्। एवं सति मृगस्य दर्शनक्रियाकर्मत्वेन द्वितीयापत्तिः। एवं स्थिते अप्रथमासामानाधिकरण्यात् शतृप्रत्ययापत्तिश्च, एवमपि द्वितीयाया दुर्वारत्वेन, 'पश्य मृग' इति वाक्यस्यैवासम्भवापत्तेः।

न च 'पश्य मृगो धावति' इदमेव वाक्यस्वरूपं स्यात्। वाक्यार्थबोधाय त्वमिति अध्याहार्यः। त्वमिति अध्याहारे वाक्यभेदप्रसङ्गरूपो दोषस्तदवस्थः स्यात्। अतो नैयायिकमतानुरोधिशाब्दबोधो न समीचीनतां भजते। तस्माद् भावप्रधानमाख्यातमिति निरुक्ताद् भूवादिसूत्रस्थक्रियाप्रधानबोधकभाष्याच्च क्रियाप्राधान्यमेव निश्चीयते।

तत्र हि[1] का तर्हि वाचोयुक्तिः, पचति, भवति, त्वं पचसि भवसि पक्ष्यति भवति, एषैषा वाचोयुक्तिः—पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति इत्युक्तम्। अत्र पचति भवति इत्यत्र पाककर्तृका भवनक्रिया इत्येव बोधः, नैयायिकसम्मते प्रथमान्तार्थमुख्यविशेष्यकबोधे तु भाष्योक्तबोधस्यासिद्धिः स्यात्। यतो हि पाकक्रियायाः प्रथमान्तार्थकत्वाभावात् कर्तृत्वानापत्तेः। अतो व्याकरण-

१. भूवादयो धातवः सूत्रस्थभाष्ये।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिद्धान्तसम्मतो व्यापारमुख्यविशेष्यकबोध एव स्वीकरणीय इति। अस्मिन्नेव क्रमे शाब्दबोधविषयककार्यकारणभावोऽपि विचारणीय इति जिज्ञासायां सत्यां कार्यकारणभावो विचार्यते। तत्र घटादिपदात् पटादिविषयकशाब्दबोधवारणाय तत्पदजन्यतद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति, तत्पदजन्यतद्विषयकोपस्थितिः कारणमवश्यमेवाङ्गीकरणीयम्। घटपदात् पटोपस्थितेरभावान्न तद्विषयको शाब्दबोधः।

'एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति' एवंविधया घटपदादेः समवायेन तत्सम्बन्ध्याकाशविषयकोपस्थितिबलादाकाशविषयकशाब्दबोधवारणाय तत्पदजन्यतद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणमिति स्वीकारे आकाशस्य वृत्तिज्ञानाधीनोपस्थितेरभावान्न शाब्दबोधापत्तिः। एतादृशकार्यकारणभावस्वीकारेऽपि घटपदाद्, यथा घटत्वप्रकारकघटविशेष्यकशाब्दबोधो जायते, तथैव घटप्रकारकघटत्वविशेष्यको बोधो कथं न जायत इति जिज्ञासायामपरः कश्चन विशिष्टः कार्यकारणभावः कल्प्यते। तद्यथा—तत्पदजन्यतत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्पदनिष्ठतत्प्रकारकतद्विशेष्यकोपस्थितिः कारणम्। तथा च घटादिपदाद् घटप्रकारकघटत्वविशेष्यकोपस्थितेरभावान्न तादृशशाब्दापत्तिः। अत्र पक्षे वृत्तिज्ञानमावश्यकं प्रतिभाति। तत्र घटकीभूता केति जिज्ञासायां समासेन तत्स्वरूपमुच्यते "पदपदार्थसम्बन्धत्वमेव वृत्तिः"[१]।

सा वृत्तिस्त्रिधा—शक्तिः, लक्षणा, व्यञ्जनेति। तत्र शक्तेः किं स्वरूपमिति जिज्ञासायां प्रथमतो नैयायिकमतं प्रस्तूयते। नैयायिका ईश्वरेच्छारूपां शक्तिमङ्गीकुर्वन्ति। सा चेच्छा द्विविधा—आद्या पदप्रकारिकाऽर्थविशेष्यिका, द्वितीया अर्थप्रकारिका पदविशेष्यिका चेति। अत एवोक्तं विद्यते यत्—

'अस्माच्छब्दादयमर्थो[२] बोद्धव्यः' इत्याकारा, 'इदं पदममुमर्थं बोधयतु' इत्याकारा वेश्वरेच्छा शक्तिः, सैव सम्बन्धः। यद्यपि नैयायिकसम्मतेश्वरेच्छाशक्तिर्विषयतासम्बन्धेन पदेऽर्थे बोधे च विद्यते। एतावता कः शक्यः किं शक्तमिति ज्ञातुमशक्यम्, तथापि बोधनिष्ठजन्यतानिरूपितजनकतावत्त्वसम्बन्धेन शक्तिविषयो वाचको बोधविषयत्वसम्बन्धेन, शक्तिविषयो वाच्य इति नातिप्रसङ्गः कुत्रापि।

खण्डनम्

नैयायिकसम्मतेश्वरेच्छायाः शक्तित्वं न सम्भवति। यदा इच्छायाः सम्बन्धत्वं सिद्ध्येत्, तदैव तस्याः शक्तित्वं स्यात्। यतो हि आधाराधेयभाव-

---

१. परमलघुमञ्जूषायाः टी० पृ० ४५; २. तत्रैव, पृ० ३०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नियामक एव सम्बन्धो भवति। प्रकृते च इच्छीयविषयताश्रयबोधनिष्ठजन्यता-निरूपितजनकताख्यविषयतासम्बन्धेनायमर्थः—इच्छावान् अयं शब्दो न इच्छावान् इति व्यवहारस्यादर्शनाद् इच्छायाः सम्बन्धत्वाभावः। तत्र सम्बन्धो नाम सम्बन्धिभ्यां भिन्नो द्विष्ठो विशिष्टबुद्धिनियामकश्चेति। अत्र सम्बन्धलक्षणेंऽशत्रयम्, तत्र द्विष्ठः सम्बन्ध इति भर्तृहरेः सिद्धान्तः, अन्यच्च नैयायिकादीनां बोध्यम्।

तद्यथा—घटवद्भूतलमित्यत्र घटभूतलयोर्यः संयोगाख्यः सम्बन्धः, स घटभूतलोभयसम्बन्धिभ्यां भिन्नः, उभयनिष्ठः, घटनिरूपितो यः संयोगस्तदाश्रयो भूतलमिति विशिष्टबुद्धिरपि, अतः संयोगसम्बन्धः सुतरां सिद्ध्यति। प्रकृते संयोग इव नैव सम्भवति; यतो हि घटशब्द इच्छावान्, घटपदार्थों वा इच्छावान् इति व्यवहारो कुत्रापि न प्राप्यते। अत ईश्वरेच्छायाः सम्बन्धत्वनिरासे जाते शक्तित्वाभावः स्वतः एव सिद्ध्यति।

किञ्च, ईश्वरेच्छायाः शक्तित्वं कथमपि न सम्भवति, यतो हि घटपदस्यापि पटे शक्तत्वप्रसङ्गात्। घटपदात् पटो बोद्धव्य इतीच्छाया विषयतया पटेऽपि सत्त्वात्। यदीश्वरेच्छीयघटपदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं शक्तिरिति, न पटेऽतिप्रसङ्गः। किञ्च, यदीश्वरेच्छाशक्तिः स्वीक्रियते, तदा दण्डाद् घटो जायतामिति इच्छाविषयत्वेनैव वह्निज्ञानं स्यात्। एवं रीत्या व्याप्त्युच्छेदः स्यात्, संयोगादिसम्बन्धेन घटादिसम्बद्धानां चक्षुरादीनां घटादिबोधकत्वदर्शनात्। अत्रापि प्रमाणप्रमेययोः सम्बन्धान्तरमेवोचितम्। किञ्च, ईश्वरेच्छायाः शक्तिस्वीकारे आत्माश्रयो दोषः। आत्माश्रयत्वं नाम "स्वस्य[१] स्वावच्छेदकत्वम्"। नैयायिक-सम्मतेश्वरेच्छाया विस्तृतं स्वरूपमिदमस्ति—"इदमभिन्नशब्दनिष्ठजनकतानिरूपित-जन्यतावद्बोधविषयतावानर्थः"[२] इति।

शक्तिसम्बन्धेन बोधं प्रति शब्दः कारणम्। अत्र कारणता जनकतारूपैव, शक्तिरूपः सम्बन्धोऽपि जनकताघटित एव। अतो जनकतावच्छेदकता जनकता जाता। अतः स्वस्य स्वावच्छेदकत्वेनात्माश्रयदोष इति। अत ईश्वरेच्छा इच्छा वेति नैव शक्तिः।

कौण्डभट्टप्रभृत्याचार्याणां मतम्

प्राङ्नव्यमतभेदेन व्याकरणशास्त्रे द्विविधा प्रवृत्तिर्वरीवर्ति शास्त्रकाराणाम्। तत्रादौ प्राच्यमतमुपस्थाप्यते। प्राचीनैः पदार्थनिरूपिता पदनिष्ठशक्तिर्बोधजनकता-

१. वैयाकरणसि०लघुमञ्जूषाटीका रत्नप्रभा-२०। २. परमलघुमञ्जूषा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रूपेति स्वीकृता। तत्र विषये कौण्डभट्टेन प्रतिपादितम्—

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा[1]।।

कारिकार्थस्तु इन्द्रियाणामित्यत्र निष्ठत्वं षष्ठ्यर्थः, स्वविषयेषु इत्यत्र निरूपितत्वं सप्तम्यर्थः। इन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता, सा यथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिः। योग्यतायामनादित्वञ्च 'इन्द्रियजन्यज्ञानप्रतियोगिकध्वंसव्याप्यत्वम्'[2] व्याप्य-व्यापकभावो कालिकसम्बन्धेन बोध्यः। एवञ्चात्र योग्यताशब्देन बोधजन-कताऽङ्गीक्रियते। एतावता प्राचीनमते शक्तिर्बोधजनकतारूपैव ग्राह्या।

प्राचीनसम्मतबोधजनकतारूपा शक्तिरपि नाङ्गीकर्तुं शक्या, सम्बन्धाभावात्। न हि बोधजनकतासम्बन्धेन पदं पदार्थवदिति विशिष्टबुद्धिः सञ्जायते। वृत्तिता-नियामकसम्बन्धेनैव वृत्तिपदेऽर्थे भवितुमर्हति; किन्त्वत्र बोधजनकतारूपा शक्तिः स्वरूपसम्बन्धेन पदे सत्त्वेऽपि पदार्थे निरूपकतासम्बन्धेन सा शक्तिर्विद्यते। स निरूपकतासम्बन्धो वृत्तितानियामकसम्बन्धो नास्ति। तस्मात् सम्बन्धान्तरमेव कल्पनीयम्। अत एव नागेशेन मञ्जूषायां प्रत्यपादि—

'सम्बन्धान्तरमेव शक्तिः, स च सम्बन्धो वाच्यवाचकभावापरपर्यायः'[3]।

स च वाच्यवाचकभावोऽखण्डः। स्वरूपसम्बन्धेन पदेऽर्थे सन्तिष्ठते। एतावता द्विष्ठः सन् सम्बन्धतां भजते। एवं क्रमेण, यथा वृत्तिः शाब्दबोधे कारणीभूता विद्यते, तथैवाकाङ्क्षायोग्यता-सन्निधिप्रभृतीनि सहकारिकारणानि विद्यन्ते। तत्राकाङ्क्षात्वन्नाम 'पदार्थानां परस्पराकाङ्क्षा'[4] यथा—नीलो घट इति। नीलपदार्थो घटपदार्थमाकाङ्क्षते, घटपदार्थो नीलपदार्थमाकाङ्क्षते, अत एव परस्परसाकाङ्क्षत्वादभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्ननीलनिष्ठप्रकारतानिरूपित-घटत्वावच्छिन्नविशेष्यताकशाब्दबोधो जायते।

योग्यता—'परस्परान्वयप्रयोजकधर्मवत्त्वम्'[5] न्यायबोधिनीटीकायामपि लक्षणं कृतं विद्यते। तद्यथा—'बाधाऽभावो योग्यता'।[6] अत एव 'वह्निना सिञ्चति' वाक्यमिदमप्रामाणिकम्, योग्यताया अभावात्।

---

१. वै०भूषणसारे शक्तिप्रकरणे;
२. भूषणटीका शक्तिप्रकरणम्।
३. वै०सि०लघुमञ्जूषा, शक्तिप्रकरणम्;
४. तर्कसङ्ग्रहः, शब्दखण्डम्।
५. तर्कसङ्ग्रहः, शब्दखण्डम्;
६. न्यायबोधिनीटीका।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं रीत्या शाब्दबोधः सर्वेषां दार्शनिकानां मते सञ्जायते। मीमांसका भावनामुख्यविशेष्यकशाब्दबोधमङ्गीकुर्वन्ति। तेषां मते भावना एव धात्वर्थः। तद्यथा—'देवदत्तः ओदनं पचति' इत्यादिवाक्यस्य देवदत्तैककर्तृका ओदनकर्मिका विक्लित्त्यनुकूला वर्तमानकालिकी भावना इति बोधस्तेषां मते भवति। एवं क्रमेण सर्वत्र शास्त्रे शाब्दबोध ऊहनीय इति शम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मशास्त्रेषु बालानामधिकाराः

डॉ. बनारसीत्रिपाठी
उपाचार्यः, संस्कृतविभागे
दीनदयाल-उपाध्यायगोरखपुरविश्वविद्यालयस्य, गोरक्षपुरम्

❀ ❀ ❀

साम्प्रतं मानवाधिकारविषये सर्वे जना जागरूका दृश्यन्ते। अस्मिन् भूमण्डलीकरणसमय एव—''यत्र विश्वं भवत्येकनीडम्'' इत्युक्तिरियं सार्थवती प्रतीयते। सूचनातन्त्रस्य अपूर्वविकासेन विश्वमिदं नास्माकं कृतेऽगम्यम्। संयुक्तराष्ट्रसङ्घस्य प्रस्तावानुसारं सर्वैर्देशैर्मानवाधिकाराः स्वकीयेषु संविधानेषु व्यवस्थापिताः। पुराकालादेवास्माकं संस्कृतौ सन्ततेर्महन्महत्त्वं स्वीकृतं विद्यते। सूत्रकारा उपदिशन्ति—'प्रजातन्तुं मा व्यवच्छेत्सीः' इति। अस्माभिरविदितं नास्ति यत् सूर्यवंशीया राजानः प्रजायै एव गेहमेधिनो भवन्ति स्म। कौषीतकिब्राह्मणोपनिषदो ह्यद्योक्तिरपि निभालनीया—

अङ्गादङ्गात्सम्भवसि हृदयादधि जायते।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्।।२।।

अपत्यमहिमामण्डितं बालसौन्दर्याभिपूजितं श्लोकद्वयमिह समुपस्थाप्यते—

१. अन्तःकरणतत्त्वस्य दम्पत्त्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ।। (उत्तररामचरितम्-३।१७)

२. आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा कलुषीभवन्ति ।।
(अभिज्ञानशाकुन्तलम्-७।१७)

मानवाधिकारेषु बालकानामधिकारा नोपेक्षिताः सन्ति। तान् परिरक्षितुं न केवलं प्राप्तविकासानाम्, अपि त्वन्येषामपि देशानां प्रतिश्रुतिः चिन्ता चावलोक्यते। पुराकाले विषयममुमधिकृत्य धर्मशास्त्रेषु धर्मशास्त्रकारैः, नयनिर्धारकैः, व्यवहारविद्भिश्च केचन उपाया विहिताः। इह चिन्त्यं यत्को बालः? अत्र नारदो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रवीति[1]—जन्मप्रभृति षोडशवर्षपर्यन्तं वयो बाल्यावस्था कथ्यते। तन्मते तु बालस्य शिशुरेवापरपर्यायः। अष्टवर्षपर्यन्तं गर्भस्थः शिशुरिव स मन्यते, तथा यदा षोडशवर्षदेशीयो भवति, तदा बालः पौगण्डो वाऽभिधीयते। देवयाज्ञिकनिबन्धेऽत्र विशेषो दृश्यते—

"शिशुरादन्तजननाद् बालः स्याद् यावदाशिखः ।
कथ्यते सर्वशास्त्रेषु कुमारो मौञ्जिबन्धनात् ।।
आ पञ्चवर्षात्कौमारं पौगण्डो नवहायनः[2] ।।

निर्णयसिन्धौ स्पष्टीकृतम्—

प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः।
कुमारकस्तु विज्ञेयो यावन्मौञ्जीबन्धनम्[3] ।।

इति कौटलीयार्थशास्त्रे (१।१५) प्रतिपादितम्। षोडशं वयोऽभिव्याप्य ब्रह्मचर्यं रक्ष्यम्। विद्याग्रहणार्थं धर्मग्रहणार्थञ्चेयमवस्था अतीवोपयुक्ता। इहैव जयमङ्गलाक्रोडपत्रे एतद्विषयकः श्लोकोऽप्युद्धृतः—

आ षोडशाद् भवेद् बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्ध्वं वर्षीयान्नवतः परम्[4] ।।

अन्यत्र विष्णुगुप्तो वदति—बालद्रव्यं ग्रामवृद्धा वर्धयेयुः, आ व्यवहार-प्रापणात् (अर्थशास्त्रम्-२।१)। अपरत्र (३।३०) स एव प्रतिपादयति—'यद् द्वादशवर्षा स्त्री प्राप्तव्यवहारा, षोडशवर्षः पुमान्' इति। अनेन निश्चेतुं शक्यं यत् स्त्रीणां कृते जन्मतो द्वादशवर्षपर्यन्तमेव बाल्यावस्था, पुरुषाणां च कृते जन्मतः षोडशवर्षाणि यावत्।

अत्रेदं विचारणीयमस्ति यद् धर्मशास्त्रानुसारं कानि कृत्यानि बालकानामधिकाररूपेण वर्णयितुं शक्यन्ते। धर्मशास्त्रेषु व्यवहारशास्त्रेषु कुत्रचित् कण्ठतो बालाधिकारा वर्णिताः, कुत्रचिच्च सङ्केतेन तेषामभ्युदयार्थं विहितानि कृत्यान्यपि वाक्छलेन अधिकारा भवितुमर्हन्ति। कस्यापि देशस्य समाजस्य च

---

१. नारदस्मृतिः-४।८५।
२. निर्णयसिन्धुः, पृ०४०२।
३. निर्णयसिन्धुः, पृ० १९४।
४. अर्थशास्त्रस्य टीका-जयमङ्गलाक्रोडपत्रम्, पृ०४२२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भारं निर्वोढुं बालका एव समर्था भवन्ति। तेषामभ्युदयाय सौख्याय च यदस्माभिः क्रियते, तत्सर्वं स्वाभाविकाधिकारपदेन व्यवह्रियते। वक्ष्यमाणरीत्या इहाधिकारा वर्ण्यन्ते। बालकान् संस्कर्त्तुं नैके संस्कारा धर्मशास्त्रेषु विहिताः, येषां साहाय्येन बालाः समाजोपयोगिनं स्वरूपमाप्नुवन्ति। न केवलं जन्मत एव, अपि तु प्रागपि गर्भावस्थायां ते संस्कारमपेक्षन्ते, यथा उत्तररामचरिते जृम्भकास्त्रानालक्ष्य रामो भणति—सर्वथेदानीं त्वत्प्रसूतिमुपस्थापयन्ति (१।१५)। अत्रोक्तं मनुना—वेदविहितैः कर्मभिर्द्विजातीनां क्रमेण गर्भाधानादयः शारीरिकाः संस्कारा विधातव्याः। एभिरिह परत्र च शुचिरायाति। जातकर्मादिसंस्कारैर्बैजिकं गार्भिकं च पापमपमृज्यते[१]।

शाबरमतानुसारं संस्कारः किमपि वस्तु कामपि व्यक्तिं वोद्दिश्य प्राप्त्यर्हतामानयति[२]। संस्कारतत्त्वे हारीतस्य मतमुद्धृत्य प्रतिपादितं यद्यदा व्यक्तिर्गर्भाधानसंस्कारद्वारा यौनसम्बन्धं प्रवर्तयति, तदा स गर्भस्थं शिशुं वेदज्ञानार्हं करोति। पुंसवनद्वारा च बालकरूपतामानयति। सीमन्तोन्नयनद्वारा पित्रोः पापान्मोचयति तम्। जातकर्मनामकरणान्नप्राशनसमावर्तनादिभिः संस्कारैश्च मोचयति तं पापान्तरेभ्यः। चिरकालादेव संस्कारः पुरुषस्य गुप्तयोग्यतायाः साधका मन्यन्ते[३]।

बालकानामधिकारविषये प्रामुख्येन शिक्षाग्रहणमुपवर्ण्यते। पिता स्वपुत्रं शिक्षयेत्, ततो बालो गुर्वाश्रमं गच्छेत्। पिता एव पुत्रमुपनयति स्म। गुर्वाश्रमं गत्वोपनीता ब्रह्मचारिणो योग्यतानुसारं षोडशवर्षपर्यन्तमतो वाऽभ्यधिकं कालं यावत् शिक्षां प्राप्नुवन्ति स्म। यद्याचार्यगृहं निवसतः कस्यापि बालस्य शिक्षां विनैव वर्षमेकं व्यतीतं भवेत्, तर्हि अनध्यापयन्नाचार्यो बालकस्य सर्वेषां पापानां भोक्ता भवति। मार्कण्डेयोक्त्या प्रतीयते यद् वर्तमानकालिकी मनोविज्ञानानुसारिणी परीक्षेव पुराकालेऽपि शिशोरभिरुचिं परीक्ष्यैव अध्ययनविषयाणां निर्धारणमासीत्। अत एव अग्रतः प्रविन्यस्तेषु शिल्पभाण्डेषु शस्त्रेषु च यत् स्पृशेद् बालः, तदनुसारमेवाध्ययनविषयनिर्धारणं तत्कृते भवेदित्येव निर्णयसिन्धौ प्रतिपादितं विद्यते। तद्यथा—

---

१. मनुस्मृतिः-२।२६-२७।

२. शाबरभाष्यम्, जैमिनीयसूत्रे-३।१।३-संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य...।

३. हारीतः, संस्कारतत्त्वम्, पृ० ८५७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अग्रतोऽथ प्रविन्यस्य शिल्पभाण्डानि सर्वशः।
शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणम् ।।
जीविका तस्य बालस्य तेनैव तु भविष्यति ।। (पृ०१९०)

बालकानां परिवर्द्धनं परिपालनञ्च यथा भवेत् तथा अस्माभिरवश्यमेव करणीयम्। अकार्यं शतमपि कृत्वा शिशुः भर्तव्यः,[1] धनं स्यान्न वा पत्युः कर्तव्यमस्ति यत् सः स्वकीयां पतिव्रतां भार्यां परिपालयेत्। पिता पुत्रं पुत्रश्च पितरौ संवर्द्धयेत्। मातरः स्वपुत्रेभ्यो वस्त्राणि वपन्ति स्म, तान् च सुविचारैः सत्कर्मभिश्च शिक्षयन्ति स्मेति ऋग्वेदे ५।४७।६ वर्णितम्। एवमेव गुरुरपि शिक्षयति स्म (मनु० २।१५९)।

आश्वलायनदक्षेण पोष्यवर्गे बालकाः परिगणिताः[2]। प्रथमतः पितरावेव तत्परिपालनं सम्पादयतः। पुराकाले बालकानामभिरक्षकः पालयिता च राजा एव मन्यते स्म। स्वामिविरहितानां बालकानां परिवर्धनं तु विशेषेण राज्ञां कर्त्तव्यमासीत्।[3] परिपालनेन सहैव तस्य रिक्थमपि राज्ञा संरक्षणीयम्—

बालदायादिकं रिक्थं तावद्राजानुपालयेत्।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः ।। (मनु. ८।२७)

धर्मसूत्रे गौतमेनोक्तम्—'रक्ष्यं बालधनमाव्यवहारप्रापणात्, समावृत्तेर्वा' (१०।४८-४९)। 'अनाथबालस्वामिकं पितृव्यादिभिरन्यायेन गृह्यमाणं तावद्राजा रक्षेद् यावदसौ गुरुकुलात्समावृत्तो न भवति। यस्त्वशक्त्यादिना बाल एव समावर्तते सोऽपि यावदतीतबाल्यो भवति तावत्तस्य धनं रक्षेत्'।[4] मेधातिथिः प्रतिपादयति (मनु० ८।२८)—यः कश्चिदनाथस्तस्य सर्वस्य धनं राजा यथावत् परिरक्षेत्। अनाथबालविषये कौटल्यविधानमस्ति—बालवृद्धव्याधितव्यसन्यनाथांश्च

---

१. मनुस्मृतिः ११।१० पश्चादसंख्याकोऽयं श्लोकः —
वृद्धौ च मातापितरौ साध्वी भार्या शिशुः सुतः।
अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ।।
द्रष्टव्यम् — मेधातिथिः, मनु०४।२५१, मिताक्षरा, याज्ञ०स्मृ०१।१२४, २।१७५।

२. धर्मशास्त्र का इतिहास, पृ०२२१।

३. वसिष्ठधर्मसूत्रम्-१९।३५-३६, विष्णुधर्मसूत्रम्-३।६५, मत्स्यपुराणम्-२।५।६२, अग्निपुराणम्-२२५।२५, अभिज्ञानशाकुन्तलम्-६।२५।

४. कुल्लूकभट्टः, मनु० ८।२७, अत्रैव मेधातिथिः—बालधनं राज्ञा स्वधनवत् परिपालनीयम्। अन्यथा पितृव्यादिबान्धवा मयेदं रक्षणीयमिति विवदेरन्। द्र०, मनु०८।१४८-१४९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राजा बिभृयात्, स्त्रियम् अप्रजातां प्रजातायाश्च पुत्रान्। बालद्रव्यं ग्रामवृद्धा वर्द्धयेयुराव्यवहारप्रापणात्, देवद्रव्यं च (अर्थशास्त्रम्-२।१)। बालधनमन्येन केनापि भुज्यमानमपि तूष्णीं तद्धनं लब्धुं नार्हति[१]; परन्तु यदि स धनस्वामी जडः पौगण्डश्च न भवति, तदीयदर्शनविषये च तद्धनं भुज्यते, तदा स्वामिनो व्यवहारेण नष्टं ततो भोक्तुरेव तद्धनं भवति[२]। निष्कर्षतः कथितुं शक्यते यद् व्यवहारशास्त्रसम्बन्धिभिः सर्वैः सिद्धान्तैः बालानां विकलेन्द्रियाणां प्रक्षिप्ताना-मेवम्भूतानामन्येषामपि सम्पत्ती रक्षिता। केनाप्यन्येन योगेऽपि झटिति अधिकारच्युतिर्नैव जायते। तदर्थं दीर्घावधिः प्रदत्तो दृश्यते।[३]

कौटल्येन कर्मसु मृतानां कर्मचारिणां निराश्रितेभ्यो बालकेभ्यो भक्तवेतनस्य व्यवस्था कृता।[४] महाभारतस्य सभापर्वणि नारदेनोक्तम्—ये जना राज्यार्थे मृत्युं वृण्वते, तेषां दारा बालकाश्च राजभिः परिपालनीया भवन्ति—

क्वचिद्दारमनुष्याणां तवार्थे मृत्युमीयुषाम् ।
व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ।। (५।५५)

अत्र शुक्रस्यापि (२।४०६-४११) सम्मतिर्दृश्यते—

स्वामिकार्ये विनष्टो यस्तत्पुत्रे तद्भृतिं वहेत् ।
यावद् बालोऽन्यथा पुत्रगुणान् दृष्ट्वा भृतिं वहेत् ।।

ब्रह्मचर्यावस्थायां शिक्षाग्रहणकाले जीवनयापनार्थं भिक्षाया अधिकार आसीत्। न तत्र कोऽपि नियमः—कस्माद् भिक्षां गृह्णीयात्, कस्माच्च न; अपि तु सर्वतः प्रतिगृह्णीयात्[५]।

अभ्यवहारे शैथिल्यमधिकृतम्

गौतममतानुसारमुपनयनात्पूर्वं बालको यथेच्छमाचरितुं प्रभवति, यथेच्छं च

---

१. मनु० ८।१४७-१४८, नारदस्मृतिः-४।७९-८०।

२. तत्रैव कुल्लूकभट्टः।

३. याज्ञ० स्मृ० २।२५, मनु० ८।१४९।

४. अर्थशास्त्रम्-४।३..... कर्मसु मृतानां पुत्रदारा भक्तवेतनं लभेरन्। बालवृद्ध-व्याधिताश्चैषामनुग्राह्याः।

५. मनु० (४।२५१)—
गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन् देवतातिथीन्।
सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः।। द्र० मिताक्षरा, याज्ञ० १।२२४, २।१७५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भोक्तुम्। आपस्तम्बेनोक्तम्—यावद् बालस्यान्नप्राशनं न भवति, तावत् सम्भवत्यशुचिः। दक्षेणाप्युक्तम् (१।३।४)—

जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः।
स हि गर्भसमो ज्ञेयो जातिमात्रप्रदर्शकः।।
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते।
अस्मिन् बाले न दोषः स्यात् स यावन्नोपनीयते।।

रागप्राप्तिभोजने कालनियमं प्रतिपादयता कमलाकरभट्टेन मार्कण्डेयमतमुद्धृतम्—ग्रहणकालपर्यन्तं भोजनं सर्वथा निषिद्धमेव; परन्तु बालवृद्धातुराणां तु ग्रहणयामात्पूर्वमेकयामो निषिद्धः। यथोक्तं मार्कण्डेयेन—

सायाह्ने ग्रहणं चेत् स्यादपराह्णे न भोजनम्।
अपराह्णे न मध्याह्ने, मध्याह्ने न तु सङ्गवे।।
भुञ्जीत सङ्गवे चेत् स्यान्न पूर्वं भोजनक्रिया[1]।।इति।

शैथिल्यमिदं माधवीये वृद्धगौतमोऽपि प्रददाति निर्णयसिन्धौ (पृ०४३)। ग्रहणनिर्णयं स्पष्टमेवोक्तं यच्चन्द्रग्रहणे यस्मिन् यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भुञ्जीत। सूर्यग्रहे तु प्रहरचतुष्टयं न भुञ्जीत; परन्तु स्त्री-बाल-वृद्धातुरविषये नायं नियमः। अत्र माधवीये गौतमोक्तिरपि—

सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम्।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना।। इति।

दण्डविधाने शैथिल्यम्

वयः समीक्ष्य धर्मशास्त्रकारैर्बालानां कृते दण्डनिर्धारणेऽपि शैथिल्यं विहितम्। यदा बालश्चौरकर्म करोति, तदा पृष्ठतो दण्डनीयो भवति, रज्ज्वा वेणुदलेन वा ताडनीयो भवति।[2] अल्पापराधं बालं न दण्डयेदित्यपि व्यवस्थासीत्[3]। ऊनैकदशवर्षस्य पञ्चवर्षात्परस्य बालस्य विशुद्धये प्रायश्चित्तं गुरुः

---

१. निर्णयसिन्धुः, पृ० ४४।
२. मनु० ८।२९९-३००, द्र० आपस्तम्ब० १।२।८।२९-३०।
३. अर्थशास्त्रम्-४।८, मन्दापराधं बालं व्याधितं मत्तमुन्मत्तं क्षुत्पिपासाध्वक्लान्तम् अप्रत्याशितम् आमकाशितं दुर्बलं वा न कर्म कारयेत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुहृच्च चरेत्; परन्तु अतो बालतरस्यास्य अपराधो नापराध:, पातकं न वा पातकं भवितुमर्हतीति हरदत्तमतम्।[१] अङ्गिरामते (मिताक्षरा, याज्ञ० ४।२४३) षोडशवर्षान्न्यूनस्य बालस्यापराधाय विहितस्य प्रायश्चित्तस्य अर्धमेव निर्धारितम्। अत्र शङ्खोऽपि द्रष्टव्य:। तन्मते पञ्चवर्षदेशीयो बाल: कयाचित् क्रियया नापि कृतापराधो भवति, न वा दण्ड्य:, न वा प्रायश्चित्तीय:। अधुनाऽपि भारतीयसंविधाने सप्तवर्षदेशीयो बालो दण्डमुक्त एव।

करदाने शैथिल्यम्

अनाथबालकेभ्यो न्यायालयोपस्थितावपि काचिद् बाध्यता नासीत्।[२] तेभ्य: करदानविषयेऽपि विशिष्टा व्यवस्था निर्धारिता। करमुक्तेषु जनेषु बालोऽपि मनुना पठित:। तेनाभिहितं यत् क्षीणकोशेनापि राज्ञा बालस्तु अनुग्राह्य:, न तु दापनीय:। बालस्तु दानमानहितकरणै: पूजनीय एव।[३] युवावस्थाया: प्राग् गुरुकुलेषु निवसन्तो बालका नि:शुल्का: कथ्यन्ते स्म।[४] नावा नदीं पारयितुं बालकेभ्य: शुल्कदाने मुक्तिरासीत्; परन्तु पशुदारकाणां कृते शुल्कव्यवस्था आसीदेव।

बालहत्याविषये किञ्चित्

धर्मशास्त्रेषु बालहत्या नितान्तं घृणास्पदं कर्मेति वर्णितम्। हारीतमते (७।२०३) तु बालघातिन: शूले दण्डनीया:। य: कोऽपि बालकं हन्ति तदर्थं मृत्युदण्डस्य व्यवस्था परिलक्ष्यते।[५] याज्ञवल्क्येऽपि (२।२७२) व्यवस्थेयं दृश्यते। कौटल्यविधानेन प्रजाघातिनी गोभि: पादयितव्या आसीत्[६]। युद्धेष्वपि बालो न हन्तव्य इत्येष सिद्धान्त एव स्वीकृत आसीत्।

बालकानां क्रयो विक्रयश्च गर्हित आसीत्। मैत्रायणीसंहितायाम् (१।१०।११) कन्याक्रयस्य सङ्केतो विद्यते; परन्तु जैमिनीयनये (६।१।१५)

---

१. निर्णयसिन्धु:, पृ०१९४।

२. अर्थशास्त्रम्-३।२०, देवब्राह्मणतपस्विस्त्रीबालवृद्धव्याधितानामनाथानाम् अनभिसरता स्वदु:खनिवेदनाय धर्मस्थानमभिगच्छता कार्याणि धर्मस्था: कुर्यु:।

३. मनुस्मृति:-८।३९४-३९५।

४. गौतमधर्मसूत्रम्-१०।९-१२, आपस्तम्बधर्मसूत्रम्-२।१०।२६।१०-१६, वसिष्ठधर्मसूत्रम्-१।४२-४६, १९।२३-२४।

५. मनुस्मृति:-९।२३२।

६. अर्थशास्त्रम्-४।११—पतिगुरुप्रजाघातिकामग्निविषदां सन्धिच्छेदिकां वा गोभि: पादयेत्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदमनुचितम्। आपस्तम्बधर्मसूत्रे (२।६।१३।१०-११) विस्पष्टीकृतं यद् बालका उपहारे क्रये वा दातुं न शक्याः। मनुः कन्याक्रयणं विक्रयणं वा स्यादुभयमपि प्रतिषेधति।[1] याज्ञवल्क्यस्तु कन्याविक्रयणमुपपातकं मनुते।[2] महाभारतस्य अनुशासनपर्वणि भीष्मोक्तिर्ध्यातव्या—

अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः।
अधर्ममूलैर्हि धनैस्तैर्न धर्मोऽथ कथञ्चन।। (४५।२३)

अनेन सन्ततेर्विक्रयणं निषिद्धम्। न केवलं बालविषय एवापि तु मनुष्य-विषय एष नियमः। बौधायनधर्मसूत्रेऽपि प्रतिपादितं यल्लोभवशाद् ये केऽपि शुल्कं गृहीत्वा स्वकीयां कन्यां विवाहार्थं विक्रीणते, ते पापात्मानः आत्मविक्रयिणो घोरपातकिनश्च सन्ति, ते नरकं गच्छन्ति[3]। बौधायनमते तु यः कन्यां विक्रीणीते, सः स्वपुण्यमेव विक्रीणीते। कौटल्येनापि कृत्यमिदं नानुमतम्[4]।

बालस्य गोत्राधिकारः

एकस्मिन् प्रसङ्गेऽपरार्को भणति—यदा बुद्धिपूर्वकं कश्चित् सगोत्रे सप्रवरे वा उद्वाहयति, तदा स जातिच्युतो भवति। तस्य पुत्रस्तु चाण्डालो भवति; परन्तु गोत्रेण स काश्यपो भवितुं शक्यः (बौधा० ५४)। पितृभ्यां पथि परित्यक्तं बालकं यः पोषयेत्, तस्यैव वर्णस्तस्य जायते। तस्य संस्कारः पालकेन आत्मवत्कर्त्तव्यः[5]।

बालकानां कृते ऋणावधिः

बालानामृणावधावपि व्यवहारेषु शैथिल्यं विलोक्यते। कौण्डिन्यमते तु बालकानां कृते कोऽपि ऋणावधिर्निर्धारितो नास्ति।[6] पितृद्वारा अनैतिकेभ्यः कार्येभ्य ऋणरूपेण गृहीतं धनं प्रति पुत्रस्य दायित्वं नासीत्। अदेयदानं यद् दानं निषिद्धत्वात् पूर्णरूपेण विधिप्रतिकूलमस्ति तथा अदत्तदानं—यत् परित्यक्तुं शक्यं

---

१. मनुस्मृतिः-९।९८।
२. याज्ञवल्क्यस्मृतिः-३।२६।
३. बौधायनधर्मसूत्रम्-१।११।२०-२१, मनुस्मृतिः-३।५१, ५४-५५।
४. अर्थशास्त्रम्-३।६५—आत्मविक्रयिणः प्रजामार्यां विद्यात्। आत्माधिगतं स्वामिकर्माविरुद्धं लभेत, पित्र्यं च दायम्। मूल्येन चार्यत्वं गच्छेत्।
५. महाभारतम्, अनुशासनपर्व-४९।२१-२३, द्र० रामायणम्, अयोध्याकाण्डम्-१००।६०।
६. धर्मशास्त्र का इतिहास, पृ० ७७१, जीमूतवाहनस्य व्यवहारमातृका, पृ० ३४१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तद्दानं तथा चावेदनोपरि न्यायालयेन निषिद्धं कर्त्तुं शक्यते। यतो हि एवम्भूतं दानं तु दातुरयोग्यतायाः परिणाममात्रमेव भवति, यथा कस्यचिदुन्मत्तस्य, प्रक्षिप्तस्य, वृद्धस्य बालस्य वा धनानि सन्ति[१]।

दायाधिकारः

मनीषिणो विभक्तव्यं पितृद्रव्यं दायमाहुः।[२] पितृद्वारागतं मातृद्वारागतं वा द्रव्यं दायशब्देन व्यवहारशास्त्रेषु कथितम्। दीयत इति व्युत्पत्त्या दायशब्दो निष्पद्यते। अत्र ददातिप्रयोगश्च गौणः।

मिताक्षरानुसारं यद्धनं स्वामिसम्बन्धादेव निमित्ताद् यस्य स्वं भवति, तदेव दायशब्देन उच्यते (दायभागः १।३)। तत्रैव (१।४-५) वर्णितं यद्दाये मृतादीनां त्यागो नास्ति। ततश्च पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः। पुत्रस्तु पितुरुत्तराधिकारी भवति। कौटल्यानुसारं (अर्थशास्त्रम्-३।६) तु केवलं जारजबालस्यैव रिक्थाधिकारो नासीत्; परन्तु नेदं स्वीकृतमन्यैः धर्मशास्त्रकारैः। कालिदासमते तु गर्भस्थोऽपि शिशुः पित्र्यं रिक्थमर्हति। (अभिज्ञानशाकुन्तलम्, अङ्कः ६)। जन्मतो बालकः स्वत्वाधिकारी भवतीति मेधातिथिः। मिताक्षराऽपि इदं स्वीकरोति—पुत्रः पित्र्यस्य कुलक्रमागतस्य रिक्थस्य अधिकारी भवति, कन्या चापि। सामान्यतो वयसि एव रिक्थस्य विभागः क्रियते स्म, तथापि अर्थशास्त्रे अतीतषोडशवर्षाः स्वयं विभागं भजन्ते। अप्राप्तव्यवहाराणामृणादिदेयव्ययविशोधितं भागं भ्रातृबन्धुषु मातुलादिषु ग्रामवृद्धेषु वा स्थापयेयुरिति कौटल्योक्तिः (३।५)। तन्मते नियोगविधिना जातस्य बालस्यापि सम्पद्यधिकारो भवति स्म। दायाधिकारवर्णन एव एतदपि स्पष्टीकृतं यद् यदि कोऽपि धर्मानुसारमधिकारी न भवेत्, तर्हि नियोगविधिना क्षेत्रजाय धनं प्रदिशेत्[३]।

सम्पत्तिविभागादूर्ध्वं जातो बालस्तु पित्र्यस्य अधिकारी भवत्येव। औरस-बाल इव दत्तकबालोऽपि पालकस्य कुलं सौविध्यं चाप्नोति[४]। दत्तकस्य बालस्य जनकपितुः पुत्राद्यभावे श्राद्धकरणस्याधिकारश्चासीत्; परन्तु धनग्रहणे स न।

---

१. नारदस्मृतिः-७।९-११।

२. स्मृतिसङ्ग्रहः, स्मृतिचन्द्रिका, पृ० २५५, नीलकण्ठस्य व्यवहारमयूखः, पृ० ९३।

३. अर्थशास्त्रम्-३।६।

४. मनुस्मृतिः-१।१४२, वसिष्ठधर्मसूत्रम्-७।४०-४१, गौतमधर्मसूत्रम्-२८।२७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जनकपालकयोरुभयो: पित्रो: सन्तत्यभावे दत्तकस्य जनकपालकयोरुभयोरपि धनग्रहणं स्वीकृतम्। अनेन सहैव उभयो: प्रतिवार्षिकं श्राद्धकरणेऽपि तस्याधिकारो व्यवस्थापितो वर्तते (धर्मसिन्धु:, पृ० ३७१)।

बालो न साक्षी

बाल: साक्षिकार्यं कर्त्तुं प्रभवति न वेति जिज्ञासायां मानवधर्मशास्त्रे उक्तमिदम्[१]—अप्राप्तव्यवहारत्वाद् बालो न साक्षी कार्य:; परन्तु अन्तर्वेश्मादिकार्ये तु बालादयोऽपि स्थितिविशेषे साक्षिणो भवितुमर्हन्ति। उपप्लुतमनसां बालादीनां साक्ष्येऽनृतं वदताम् अस्थिरा वाग् भवति, अतस्तामनुमानेन जानीयादिति मनुनाऽभिहितम्।

इत्थं बालाधिकारविषये सङ्क्षेपेण किञ्चिद् विचार्य विरम्यत इति शम्।

●

---

१. मनुस्मृति:-८।६६,७०-७१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साक्षिस्वरूपविमर्शः

प्रो० रामकिशोरत्रिपाठी
आचार्यः, वेदान्तविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

साक्षाद् द्रष्टृस्वभावाद्विषयपरिचितौ द्योतयद्वस्तुरूपं
चिद्रूपत्वाच्च सम्यग् जनयति विभवं जीवमध्यस्थमेत्य।
ज्ञातृत्वेनापि भोगेषूपरतमभितं सर्वतन्त्रस्वतन्त्रं
लोकख्यातिं प्रमोषाद्रचयति नियतं साक्षिचैतन्यमेतत्।।

साक्षाद् द्रष्टेति विग्रहे "साक्षाद् द्रष्टरि संज्ञायामि"ति[1] सूत्रेण साक्षादित्यव्ययात् संज्ञाविषयकद्रष्ट्रर्थे इनिप्रत्ययेन निष्पन्नः साक्षिशब्दः प्राधान्येनोपद्रष्टार्थमेव बोधयति। त्रयो हि साक्षाद्द्रष्टारः—दाता ग्रहीता उपद्रष्टा च। तथाप्यत्र संज्ञानिमित्ते विहितेनिप्रत्ययसमवहित उपद्रष्ट्रर्थमेव बोधयति। उक्तञ्च ज्ञानेन्द्रसरस्वतीमहाभागेन—"यद्यपि साक्षाद्द्रष्टारस्त्रयो भवन्ति-दाता ग्रहीता उपद्रष्टा च, तथापि संज्ञाग्रहणात् साक्षिशब्देनोपद्रष्टैवोच्यते"[2]। महाभाष्येऽपि—"त्रिभिः साक्षाद् दृष्टं भवति, यश्च ददाति, यस्मै च दीयते, यश्चोपद्रष्टा। तत्र सर्वत्र प्रत्ययः प्राप्नोति। संज्ञाग्रहणसामर्थ्याद्धनिकान्तेवासिनोर्न भवति"[3]। तच्च द्विधा—ईश्वरसाक्षि जीवसाक्षि च। तत्र शुद्धसत्त्वप्रधानाविद्यारूपया माययाऽऽवृत्तचैतन्यमीश्वरः, तयोपहितचैतन्यमीश्वरसाक्षीत्युच्यते। अन्तःकरणावच्छिन्नचैतन्यं जीव इति मते तदुपहितचैतन्यं जीवसाक्षिपदेन व्यवह्रियते। अविद्यावच्छिन्नजीव इति पक्षे स एव वस्तुप्रकाशकत्वेन साक्षीति कथ्यते। तत्रापि विषयभोगप्रवृत्त्यर्थमन्तःकरणमपेक्ष्यते।

---

१. पा.सू. ५।२।९२।
२. तत्त्वबोधिनी, पा.सू. ५।२।९२।
३. महाभाष्यम्, पा.सू. ५।२।९२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा चान्तःकरणं विषयसम्बद्धं प्रमातृतादात्म्यापन्नं स्ववृत्त्या विषयं सम्बध्नाति। प्रमातृचैतन्यं च विषयस्वरूपं भासयद् बोध्यत्वेन चिनोति।

कर्तव्याकर्तव्यविवेचनक्षममन्तःकरणनिष्ठं सर्वव्यापकञ्च साक्षिचैतन्यमेव कर्माध्यक्षत्वेन नियन्त्रयति कर्मविधिम्। अन्यथा फलेप्सया विहितानि कर्माणि नैरन्तर्येण प्रवर्तेरन्। विहिताविहितकर्मफलानभिलासयाऽपि साक्षाद् द्रष्टृत्वेन सर्वव्यापकत्वेन च स्वर्गाद्यनित्यफलकानि कर्माणि वर्जयित्वा तत्त्वमस्यादिमहावाक्यबोधितजीवात्मनोरभेदबोधे प्रवर्तयति ज्ञानेन्द्रियाणि। तथा च श्रुतिः—"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च"[१]।।

यदाश्रितं सर्वशरीरमूलं समस्तलोकव्यवहारबोधृ।
प्रवर्तकर्मानभिकाङ्क्षकं यत् प्रपञ्चहीनं कथितं हि साक्षि।।

अत्राशङ्क्यते किमस्ति जीवभिन्नं साक्षिचैतन्यम्? सुखादिधर्माणामाश्रयाश्चाहङ्कारादयस्तेषां प्रत्यक्षसाधनमिति चेत्, न, अहङ्कारादिष्वपि जीवत्वप्रतिपादनाज्जीवातिरिक्तसाक्षिचैतन्यस्याप्रयोजकत्वात्। तत् समाधत्ते कूटस्थदीपे स्थूलसूक्ष्मशरीराधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकशरीरद्वयस्य साक्षाद् दर्शकं सत् कर्तृत्वादिविकारशून्यं साक्षिपदमर्हति। लोकेऽपि कर्मफलेषूदासीनं सर्वविज्ञं मध्यस्थमेव साक्षिरूपेण व्यवहरन्ति जनाः। उक्तञ्च—"उत्तमः पुरुषस्त्वन्यः"[२]। स्थूलसूक्ष्मादिदेहद्वयप्रकाशनार्थमपि साक्षिचैतन्यमावश्यकम्। देहद्वयस्यावभासोऽन्तःकरणवृत्त्याऽपि सम्भवतीति चेत्, न, दीपादिगतवृत्तीनामिवान्तःकरणवृत्तेरपि जडरूपत्वात् साक्षिचैतन्यमन्तरा देहद्वयप्रकाशनेऽसामर्थ्यात्। अथ च वृत्तेः पूर्वं देहद्वयस्य न स्पष्टप्रतीतिः। वृत्त्युत्तरञ्च स्थूलोऽहं कर्ताऽहमिति स्पष्टप्रत्ययः। तत्र यदि वृत्तिज्ञानातिरिक्तं साक्षिस्वरूपं न स्वीक्रियेत, तदा सर्वत्र सममेव शरीरद्वयं भासेत।

किञ्च साक्षिचैतन्याभावे वृत्तीनामुत्पत्तिविनाशक्रियाऽपि न सम्भवेत्, स्वस्मिन्नेव स्वोत्पत्तिविनाशसम्भवात्। अयं भावः—यथा घटादिप्रकाशे संशय उदेति कस्यायं प्रकाशः, न तथाऽहङ्कारादिषु। अहङ्कारादीनामस्तित्वे न कस्यचित् संशयस्तेषां नित्यप्रकाशरूपेण साक्षिचैतन्येनैव संसर्गात्। प्रतिमादिध्यानकालेऽपि मूर्तिविषयकवृत्तिधारा प्रवहति। तत्र धाराप्रवाहेऽहमर्थस्य तद्गोचरवृत्तेश्चानुभवाभावान्न तद्विषयकसंस्कारोदयः। तदुत्तरकालेऽप्यहमर्थस्य स्मरणाभावादन्यधाराकालीना-

१. श्वेता० ६।११।
२. गीतायाम्-१५।१७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हङ्कारस्य साक्षिरूपेणानुसन्धानं सम्भवति। तदर्थं यदि धाराकालजन्यानुभव एव स्वीक्रियेत, तदा धाराविच्छेदस्य प्रसङ्गोऽप्यापद्येत, अतः साक्षिस्वरूपं कल्प्यते।

> "वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः।
> बुभुत्सायां तथाज्ञोऽस्मीत्याभासज्ञानवस्तुनः"[१]।।

यदि साक्षिचैतन्यस्यैवाहमर्थवृत्तेरनुभवस्तदा जीवस्य तद्विषयकस्मृत्यादि-योग्यता न स्यादिति तत्समाधत्ते—"अन्योऽन्याध्यासेन जीवैकत्वापत्त्या कूटस्थस्य जीवान्तरङ्गत्वात्"[२]। नन्वस्तु जीवचैतन्यमेव साक्षी किमन्यत् कल्पनेनेत्यत्राह लौकिकवैदिकव्यवहारप्रवर्तकस्य जीवस्यौदासीन्यत्वाप्रयोजकत्वात्। साक्षि हि सर्वकर्मफलानभिकाङ्क्षयोभयविधव्यवहारद्रष्टृत्वेन राजते, न तु कर्मरूपं तत्। तथा च श्रुतिः—"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति"[३]। नाटकदीपे हि नृत्यशालादीपदृष्टान्तेन साक्षिचैतन्यस्वरूपं समाहितम्। यथा नृत्यशालास्थदीपो रङ्गमञ्चस्वामिनं सभ्यान् नर्तकीञ्च प्रकाशयति, तथैव साक्षिचैतन्यमपि। अहङ्कारोऽत्र प्रभुः, विषया हि सभ्याः, बुद्धिश्च नर्तकी, रङ्गमञ्चमिदं जगत्, तेषाञ्च प्रकाशकं साक्षिचैतन्यम्।

> "नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम्।
> दीपयेदविशेषेण तदभावेऽपि दीप्यते"[४]।।

विषयभोगाभिकाङ्क्षया जगति प्रवृत्तोऽहङ्काररूपत्वादभिमानी जीवः समस्त-प्रपञ्चप्रवर्तकत्वात्स्वामीत्युच्यते। नर्तकीसङ्केतानुवर्तिसङ्गीतवदिन्द्रियाणां बुद्ध्यधीन-तया बुद्धिरेवात्र नृत्याङ्गना यथा सङ्केतितं प्रवर्तते सर्वं जगत्। तस्याश्च प्रकाशरूपत्वेऽपि क्रियानुवर्तित्वेन जडरूपत्वात् परप्रकाशाभिदीपनम्। जीवात्मा चाहङ्कारमालिन्येन तमोवृत्तत्वात्तदधिष्ठानभूतकूटस्थचैतन्येन प्रकाश्यते। विषयास्तु सर्वदा तमोवृता एव सन्ति। "सभ्यपुरुषतुल्यान् विषयान् नानाविधविकार-वर्तित्वान्नर्तकीतुल्यां धियं च दीपयन्, दीपसुषुप्त्यादावहङ्काराद्यभावेऽपिदीप्यमानश्चि-दाभासविशिष्टाहङ्काररूपजीवभ्रमाधिष्ठानकूटस्थचैतन्यात्मा साक्षीति"[५]।

---

१. पञ्चदशीकूटस्थदीपे।
२. सिद्धान्तलेशसङ्ग्रहे।
३. श्वेता. उप. ४।६।
४. नाटकदीपे।
५. सिद्धान्तलेशसङ्ग्रहे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साक्षी यदि प्रमाता स्यात् प्रपञ्चदीपनं कथम्।
यः प्रमाता स भोक्ताऽपि भोग्यासक्तितमोवृतः।।

न कुत्रापि विशुद्धात्मा मोहाद् वस्तुप्रकाशकः।
अविद्योपहितः साक्षी सर्वत्रापि प्रदीपकः।।

तार्किकैरपि मन्तव्यः स्वप्ने विषयदीपनात्।
साक्ष्येव ज्ञानसंसिद्ध्यै दीपवत्सर्वभासकः।।

यत्तु तार्किकप्रभाकरौ स्वपरप्रकाशक्षयदीपवदात्मरूपत्वेन प्रकाशात्मनो जीवस्य स्वस्वरूपप्रकाशकत्वे सति विषयप्रकाशने क्षमत्वात् किमन्यत्साक्षिस्वीकारेण तन्न घटादिविषयसमवधान एव दीपादिप्रकाशस्य सम्भवात्। साक्षी च विषयविरहितेऽपि स्वप्नादौ वासनावासितचित्तवृत्तिनिष्ठविषयान् प्रकाशयतीति वैशिष्ट्यम्। अथ च तत् सिद्धान्ततोऽपि दोषः स्यात्। तथा हि तार्किकप्रभाकरौ प्रतिकार्यं भिन्नं कारणं भिन्नश्च कर्तेति मन्येते। तत्र सुखादिकार्याणामपि तत्तत्कालविशेषेण भिन्नत्वाज्जीवात्मनो भेदापत्तिः स्यात्। सुखाद्यनुभवानां कर्तुर्भेदे हि 'योऽहं पूर्वं सुखमन्वभूवं सोऽहमिदानीं दुःखमनुभवामि' इत्यनुभवविरोध आपद्येत। तन्मते पूर्वापरकालिकैककर्तुरभावात्। अथ च नानाकार्यकारणसम्भक्तकर्तृरूपस्य जीवात्मनो विकारित्वे—''दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः''[1]। ''स वा एष महानज आत्माऽजरोऽमरोऽमृतः''[2], ''न जायते म्रियते वा कदाचित्''।[3] इत्यादिश्रुतिस्मृतिविरोध आपद्येत। तत्र केचित् जाग्रत्स्वप्नसुषुप्तिष्ववस्थात्रयविनिर्मुक्तो जीवात्मातिरिक्तः परमेश्वर एव सर्वकर्मणामीक्षणात् साक्षाद्द्रष्टत्वेन साक्षी। ''एवमयं पुरुष आत्मा स्वयंज्योतिः कार्यकारणविलक्षणस्तत्प्रयोजकाभ्यां कामकर्मभ्यां विलक्षणो यस्मादसङ्गो ह्ययं पुरुषः क्षणिकवादिनो बौद्धास्त्वन्तःकरणवृत्तेरेव विषयप्रकाशकत्वमभ्यमन्यन्त। तत्रान्तःकरणस्य हि द्विधा वृत्तिस्तैः स्वीक्रियते—अहंवृत्तिरिदंवृत्तिश्च। तत्रेदंवृत्तिर्मनोरूपा अहंवृत्तिश्च विज्ञानमयत्वाद्विषयप्रकाशिका। ताभ्यां विभक्तमन्तःकरणमपि भिन्नम्। तथा हि इदंवृत्त्यवच्छिन्नान्तःकरणेन विषयग्राहकत्वमहंवृत्त्यवच्छिन्नान्तःकरणेन विषयप्रकाशकत्वम्। किमन्यत्साक्षिस्वीकारेण। तदुच्यते—अन्तःकरणवृत्तेर्जडरूपत्वान्न विषयप्रकाशायोपयुज्यते। तन्नयेऽसद्रूपशून्यस्यैव सकलजगद्विभ्रमहेतुत्वमिति।

१. मुण्ड. उप. २।१।२।
२. बृ.उप. ४।४।२५।
३. गीता. २।२०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदपि न वरं निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेः। अतस्तैरपि शून्यवेद्योपगमे साक्षिस्वरूपं स्वीकार्यम्।

"निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता।
शून्यस्यापिससाक्षित्वादन्यथा नोक्तिरस्य ते"[१]।।

अन्तःकरणस्य सुखदुःखादिधर्माणामवभासकः साक्षी व्यापकीभूतमूलाविद्योपहितचैतन्यरूपस्तूलाविद्योपहितचैतन्यरूपो वा नाद्यः, मूलाविद्योपहितचैतन्यस्य साक्षिस्वीकारे देवदत्तीयान्तःकरणप्रकाशकः साक्षी यज्ञदत्तीयान्तःकरणस्याप्यवभासकः स्यात्, व्यापकोपाधिनोपहितया तस्यापि व्यापकत्वात्। तूलाविद्योपहितचैतन्यमिति चेन्नाविद्यास्वरूपत्वेन तस्यापि व्यापकतया तदुपहितचैतन्यस्यापि व्यापकत्वात्। अतोऽन्तःकरणोपहितचैतन्यमेव जीवसाक्षीति। अविद्योपहितचैतन्यमीश्वरसाक्षित्वेनाभिमतम्। तत्रेश्वरस्य सर्वज्ञतया तत्साक्षिणश्च सर्वविषयावभासकत्वम्।

विषयाणां साक्षिभासकत्वप्रकारः

ज्ञेयं सर्वं बहिष्ठं हृदयपरिवृतं चित्प्रमातृस्वरूपं
तच्चेन्द्रियप्रणाल्या विषयमुपगतं ज्ञातृताभावनेत्थम्।
वृत्तिश्चात्र प्रमाणं तदपि जडतया न प्रकाशक्षमत्वं
चैतन्यं साक्षिरूपं भवति जगतो वस्तुभासे निमित्तम्।।

समेषां जागतिकपदार्थानां प्रमातृप्रमाणप्रमेयेष्वन्तर्भावः। तथा चोक्तम्— "त्रिविधं चैतन्यं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं चेति"[२]। तत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यमन्तःकरणवृत्त्यवच्छिन्नं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं प्रमातृचैतन्यम्। यथा घटशरावमणिकमल्लिकोदञ्चनादिभिर्वस्तुतोऽपरिच्छिन्नमपि वियत् परिच्छिद्यते, एवमनवच्छिन्नमपि चैतन्यमवच्छिद्यते, वस्तुतश्चैतन्यमेव नान्यत्। नन्वन्तःकरणस्य वृत्तेरेवासम्भवात् तदवच्छिन्नं चैतन्यं प्रमाणं चैतन्यमित्युक्तिरयुक्तेति चेत्, न, विषयावबोधेऽन्तःकरणस्य तैजसरूपत्वात्। तथा हि सवितृकिरणवच्छीघ्रप्रसरोपपत्तिबोधनवदन्तःकरणमपि परिणमते। स च परिणामो वृत्तिरूपः—"तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते"[३]।

---

१. चित्रदीपे।
२. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे; ३. सिद्धान्तलेशसङ्ग्रहे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सा च वृत्तिर्जडरूपत्वाद्विषयावरणमेवापसारयति, न तु प्रकाशनाय क्षमते। विषयतादात्म्यापन्नमन्तःकरणमपि न, तस्यापि जडत्वात्। न चान्तःकरणावच्छिन्नप्रमातृचैतन्यं तस्यापि जडरूपान्तःकरणोपाधिनोपहितत्वात्। अत एवाह—साक्षिणैव विषयप्रकाशकत्वमिति। अज्ञानावृताः सर्वे जडपदार्था न स्वतः प्रकाशन्ते। तद्गोचरवृत्त्याऽऽवरणनाशे सति प्रकाशपुञ्जब्रह्मरूपेण साक्षिणा प्रकाशतामर्हन्ति। अत एव साक्षिभास्यत्वमुक्तं सर्वविषयाणाम्। ब्रह्मरूपत्वेनैव प्रकाशकत्वं साक्षिचैतन्यस्य। उक्तञ्च—''सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपद्यते''। तथा च श्रुतिः—''आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः''[1]। भाष्ये हि—''प्राज्ञः परमेश्वरः सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात्''[2]। यथा घटादयो जडाः स्वगोचरवृत्त्याऽनावृतावरणाः साक्षिचैतन्येनावभासन्ते, तथैव वृत्तिरपि जडा न स्वतो भानयोग्या। तथा च तदर्थं वृत्त्यन्तरानुसरणेऽनवस्था स्यात्। वृत्त्यभावे भानाभाव इत्युभयतः पाशा रज्जुरित्याह। यद्यपि ब्रह्मातिरिक्तं सर्वमेव जडम्, तथापि प्रत्यक्षतोऽनुभूयमानवैलक्षण्येन कस्यचित् किञ्चित्स्वभावविशेषादिकमास्थेयम्। यथा घटदीपकौ द्वावपि जडौ, तथापि घटस्य स्वभाने आलोकचक्षुःसन्निकर्षाद्यपेक्षा, प्रदीपस्य तु आलोकानपेक्षा, स तु घटं प्रकाशयन् स्वात्मानमपि प्रकाशयति। एवमेव वृत्तिरपि विनैव वृत्त्यन्तरं तदर्थं जाता तं प्रकाशयन्ती स्वात्मानमपि प्रकाशयति।

यत्रान्तःकरणं वृणोति परतश्चैतन्यरूपं महत्
भोगासक्तविमोहवृत्तिनिचयो जीवत्वमापद्यते।
तत्राज्ञानविरोधनाद्धि जगतो बोधो न सम्भाव्यते
चैतन्येन हि साक्षिणा द्युतिवशाद्द्योत्यत्वमासाद्यते।।

अन्तःकरणावच्छिन्नप्रतिबिम्बस्थानीयचैतन्यं जीव इति पक्षेऽन्तःकरणोपहितचैतन्यं साक्षि। तत्र जीवात्मनो जडेनान्तःकरणावृततया न विषयप्रकाशाय क्षमते। अन्तःकरणस्य तैजसरूपत्वात्तद्वृत्तिद्वारा तदवच्छिन्नजीवात्मरूपप्रमातृचैतन्यस्य विषयदेशप्रापणमेव सम्भवति, न तु वस्तुप्रकाशनम्। तत्र जडाऽपि वृत्तिः स्वावच्छिन्नचैतन्यांशेन विषयं प्रकाशयति। प्रकाश्यमानविषयसंसक्तसाक्षिचैतन्यद्वारा हि विषयावबोधः प्रमातुरिति प्रथमः पक्षः। जडवृत्त्यवच्छिन्नचैतन्यस्य प्रकाशक्षयत्वे साक्षिचैतन्येनैव विषयप्रकाशनं विषयावबोधश्चेति द्वितीयः पक्षः।

१. बृ.उप. ४।३।७।

२. शा.भा.,ब्र.सू. १।३।४२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा चोक्तम्—"अन्तःकरणावच्छिन्नो जीव: प्रतिबिम्बस्थानीय: परिच्छिन्नस्तत्संसृष्टमेव विषयं प्रकांशयेत्"[१]। अन्तःकरणस्य वृत्तिद्वयम्—सङ्कल्पविकल्पात्मिका वृत्तिर्मन:, निश्चयात्मिका वृत्तिश्च बुद्धि:। ताभ्यां भिन्नमन्तःकरणमुभयमाश्रयते। तत्र सङ्कल्पविकल्परूपवृत्तेर्जडत्वात्तदुपहितमन्तःकरणमपि जडम्। निश्चयात्मकवृत्तेर्बुद्धिरूपत्वेन प्रकाशक्षमत्वात्तदुपहितमन्तःकरणमपि प्रकाशकम्। उक्तञ्च ज्ञानस्य ब्रह्मरूपत्वेन स्वप्रकाशत्वम्। ब्रह्मरूपता च—"सत्यं ज्ञानमनन्तं ब्रह्म"[२] इति श्रुतिगम्या। तत्त्वदीपिकायामपि—"स्वतःसिद्धसाक्षिप्रसादादेवोपलब्धिवदनुपलब्धेरपि सिद्धानवस्थादुःस्थताऽभावात्"[३]।

अविद्याप्रतिबिम्बोऽयं जीवो वाचस्पतेर्नये।
वृत्त्या विषयमाश्रित्य प्रकाशं क्षमते स्वयम्।।

अविद्याप्रतिबिम्बितचैतन्यं जीव इति पक्षे ईश्वरवत्सर्वगतो व्यापकश्च जीवात्मा वृत्तिमन्तराऽपि विषयसंसृष्टोऽविद्यावृतत्वात् स्वयमप्रकाशमानत्वेन विषयविशेषे वृत्त्युपरागेण विषयं प्रकाश्य तदनन्तरं सर्वानपि विषयान् स्वयमेव प्रकाशयति। तत्रापि वृत्तिरपेक्ष्यते। वृत्तिमन्तरा विषयावरणभङ्गो न सम्भवति। ननु जीवात्मनोऽविद्यावृतत्वेन विषयसंसृष्टतया विषयावभास: स्यादिति चेत्, न, विषयसंसृष्टमात्रेणैव विषयप्रकाशत्वे सार्वकालिकविषयावभासकत्वमापद्येत, जीवात्मनो विषयै: सह सदैव संसृष्टत्वात्। अत एवाह—"अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ आवरणभङ्गजनकत्वमित्यावरणाभिभवार्था वृत्तिरित्युच्यते"[४]। अत्र पक्षेऽतिरिक्त: साक्षी न स्वीक्रियते, जीवस्यैव साक्षिरूपत्वात्। उक्तञ्च—"अविद्योपाधिको जीव एव साक्षाद्द्रष्टत्वात् साक्षी"[५]।

जीवो यदि भवेत् साक्षी भोक्ताऽन्य: कल्पयेत्तदा।
नहि विषयसंसक्तो मध्यस्थरूपतां व्रजेत्।।

ननु जीवस्य साक्षित्वस्वीकारे "एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा"[६], "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते"[७] इति

१. विवरणटीकायाम्।
२. तै.उप. २।१।१।
३. तत्त्वदीपिकायाम्।
४. वेदान्तपरिभाषायां विषयपरिच्छेदे;
५. सिद्धान्तलेशसङ्ग्रहे।
६. श्वेता. उप. ६।११;
७. मु.उप. ३।१।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रुत्योर्विरोधः। जीवात्माऽविद्यावृतोऽप्यन्तःकरणेन परिच्छिन्नत्वात् सर्वभूताभिव्यापनेऽप्रभुः, साक्षी च ब्रह्मरूपत्वात्सर्वभूताभिव्यापको भवति, अविद्योपाधिनोपहितत्वेनेश्वरवज्जीवस्यापि सर्वव्यापकत्वात्। तथा चोक्तम्—"ब्रह्मणो जीवभावाभिप्रायेण साक्षित्वप्रतिपादकः"। द्वा सुपर्णेति श्रुतिदोषोद्धारस्तु "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्"[१] इति सूत्रे विहितो भगवत्पादेन। तत्र हि पैङ्गिरहस्यब्राह्ममुद्धृत्य सत्त्वभूतमन्तःकरणं भोक्तृरूपेण क्षेत्रज्ञञ्च साक्षिरूपेण स्वीकृतम्। "यदि शरीरं गुहा यदि वा हृदयम्", उभयथाऽपि बुद्धिक्षेत्रज्ञौ गुहां प्रविष्टावुपपद्येते।[२] तथा च श्रुतिः—"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे"[३]।

प्रातिभासिकरजतादीनां साक्षिण्यध्यासप्रकारः

उपादानाभावे प्रभवति कथं शुक्तिरजतं
निमित्तं सर्वेषां कथयति मिथः सृष्टिचयने।
विलक्षण्यं तत्र प्रचयति लोकोत्तरमिदं
सदाऽविद्यावृत्तेः परिणतिरिदं भाति रजतम्।।

मूलाविद्याविधानं सकलमपि जगद् ब्रह्मणो व्याप्तिसृष्टं
तूलाविद्यानिमित्तं प्रभवति हि सदा शुक्तिरूप्यप्रतीतौ।
वृत्तौ काचादिदोषाद्रजतपरिवृतं चित्स्वरूपस्य भानं
साक्षिण्यध्यासहेतुश्च कलयति मिथो विश्वरूपावसक्तम्।।

व्यावहारिकवियदादिभ्यो विलक्षणमिदं प्रातिभासिकरजतम्। व्यावहारिकविषयप्रत्यक्षं हि विषयावच्छिन्नचैतन्येन सहान्तःकरणावच्छिन्नचैतन्यस्याभेदः पूर्वमेवोक्तम्। व्यावहारिकविषयाणां ब्रह्मप्रमां यावज्जायमानत्वात् स्वस्थित्या चैतन्यावच्छेदकत्वं तेषाम्। प्रातिभासिकस्य तु व्यवहारकालेऽपि सत्ताभावात् कथं प्रत्यक्षमित्युच्यते। काचादिदोषदूषितनेत्रयोः पुरोऽवस्थितशुक्त्यादिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति, तस्यां च वृत्ताविदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। "तत्र पूर्वोक्तरीत्या वृत्तेर्निर्गमनेनेदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं चाभिन्नं भवति"[४]।

---

१. ब्र.सू. १।२।११।
२. शा.भा.सू.ब्र. १।२।११।
३. कठ. उप. १।३।१।
४. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्राविद्यायाः परिणतिः शुक्तेर्विवर्तश्चेदं रजतम्। अविद्यैव प्रातिभासिक-रजताकारेण तज्ज्ञानाकारेण रजताकारवृत्तिरूपेण च परिणमते। परिणाम-स्योपादानसमसत्ताककार्यापत्तितया नेत्रनिष्ठकाचादिदोषयुक्तैव परिणमते, यादृक्-सत्ताकमुपादानं तादृक्सत्ताककार्यापत्तिदर्शनात्। उपादानविषयसत्ताककार्यापत्तिर्विवर्त इति वचनात्। शुक्तेर्या व्यावहारिकी सत्ता तद्विषया प्रातिभासिकी सत्ता रजतस्येति कृत्वा शुक्तेर्विवर्तमित्युच्यते। एवमेव पारमार्थिकसत्ताकस्य ब्रह्मण उपादानस्य सत्ताया विषये व्यावहारिकी वियदादेः प्रातिभासिकी च शुक्तिरजतादेः सत्ते, अत उभयं ब्रह्मण्यध्यस्यते।

नन्विन्द्रियाणामनिर्वचनीयरजतेन सह सन्निकर्षाभावात् करणासहकृतेन साक्षिणा तत्प्रकाशकत्वायोगात् प्रातिभासिकरजतस्य प्रत्ययः कथमित्युच्यते, यथा न्यायनये आत्मनो गुणत्वेनात्मनिष्ठसुखादीनां ब्रह्मणोऽहं सुखी मम देहो सुखीत्येवमनुभवाच्छरीरनिष्ठत्वेनोपलभ्यस्तथा चैतन्यमात्रस्य रजतं प्रत्यधिष्ठानतया सुखाद्युपलब्ध्यवच्छेदकत्ववदिदमवच्छिन्नचैतन्यस्य प्रातिभासिकरजतस्याधिष्ठानत्वेन इदमोऽवच्छेदकतया च रजतस्य पुरोवर्तित्वेन प्रत्यक्षम्। उक्तञ्च विवरणकारेण— ''इदमाकारावच्छिन्नसाक्षिचैतन्यसमाश्रितस्य रजतस्य शुक्तिकासम्भेदोऽप्यविद्यात्मक इति, सुखादिवदनन्यवेद्यत्वमिति भावः''[१]। विषयचैतन्यस्य तदन्तःकरणोपहित-चैतन्याभिन्नतयेदमवच्छिन्नचैतन्याध्यस्तरजतादेः साक्षिण्यपहस्ततया सुखादिव-दनन्यवेद्यत्वेन केवलसाक्षिवेद्यता शुक्तिरजतस्य।

ननु सुखादिमानसप्रत्यक्षवच्छुक्तिरजतस्यापि साक्षिमात्रवेद्यत्वेऽहं सुखीति-वदहं रजतवानिति प्रत्ययः स्यादिति चेत्, न, तादृशानुभवस्यैवाभावात्। तदुक्तम्—''नहि सुखादीनामन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तमहं सुखीति ज्ञानम्। सुखादीनां घटादिवच्छुद्धचैतन्य एवाध्यासात्; किन्तु यस्य यदाकारानुभवाहितसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगत-नियामकम्''[२]।

विविधविषयाश्रितवृत्त्या साक्षिभास्यत्वभेदः

अन्तःकरणधर्मेणावच्छिन्ने हि चिदात्मनि।
तदविद्याप्रयुक्तेदमहं सुखीति वृत्तिधीः।।

---

१. पञ्चपादिकाविवरणप्रथमवर्णने।

२. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुखादयो मनोधर्मा घटवद्धि चिदात्मनि।
अध्यस्यन्ति समं वृत्तेर्भेदात्प्रत्ययभिन्नता।।
अनुभूत्या समं लोके संस्कारोऽप्यभिजायते।
संस्कारोपहिताविद्या कार्यानुभूतिशाश्वतम् ।।
इदंप्रकारेण घटप्रतीतिर्घटोऽयमित्याकृतिरेव भासते।
अहंप्रकारेण सुखादिभानं सुख्यस्मि भाने न कदापि हानिः।।

अयं भावः—यादृक् संस्कारसहकृतवृत्तिप्रत्ययस्तादृगेवानुभवप्रकारः सर्वसम्मतः। घटादिविषयाणां बाह्यवृत्तितया तत्प्रत्यये तैजसमन्तःकरणमिन्द्रियद्वारेण निर्गत्य वृत्तिपदेनाभिधीयते। तत्र बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्याभेदाद् घटोऽयमिति प्रत्ययः। तदुक्तम्—"अयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात्[1]"। इन्द्रियसन्निकर्षद्वारान्तःकरणस्य घटाद्याकारवृत्तौ सत्यां तत्र चैतन्यं प्रतिबिम्बते, तच्च चैतन्यफलमित्युच्यते। चैतन्यप्रतिबिम्बिता वृत्तिर्विषयं व्याप्नोतीति फलरूपचैतन्यस्यापि व्याप्तिर्जायते। तदेव घटादिविषयाणां फलव्याप्यमित्यभिधीयते। तदित्थम्—अयं घट इति ज्ञानं प्रत्यक्षं ज्ञानविषयो घटोऽपि प्रत्यक्षः। आद्यस्य घटज्ञानं प्रत्यक्षमिति व्यपदेशः, द्वितीयस्य घटः प्रत्यक्ष इति व्यवहारः। उक्तञ्च—न्यायरत्नावलीकारेण साक्षिणि जीवस्य तादात्म्यादिसम्बन्धान्तरसत्त्वेऽपि वृत्तिं विना घटादेर्जीवं प्रत्यभानेन घटाद्यवच्छिन्नविशिष्टजीवात्मकत्वरूपस्य साक्षिणि जीवोपरागस्य चावश्यकत्वात्"[2]। एवमद्वैतसिद्धावपि—"अधिष्ठानचिदेव प्रकाशमाना वृत्तिद्वारा जीवोपरक्ता जीवं प्रति विषयप्रकाशिका"[3]।

सुखादिप्रत्यक्षप्रकारः

सुखादीनामन्तःकरणधर्मत्वेन तेषामन्तःकरणदेशस्थत्वं निश्चप्रचम्। सुखादीनामन्तःकरणनिष्ठतया सुखाद्याकारा वृत्तिरपि तदाऽन्तःकरणदेशस्थैव। सुखावच्छिन्नचैतन्यस्य सुखाकारवृत्त्यवच्छिन्नचैतन्यस्य चैकदेशस्थितत्वेनोपाध्योर्भेदाजनकत्वादेकत्वं ततश्च सुखांशे प्रत्यक्षता। बाह्यविषयाकारवृत्तेरिन्द्रिय-

१. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे।
२. सिद्धान्तबिन्दोष्टीका न्यायरत्नावली।
३. अद्वैतसिद्धौ प्रथमपरिच्छेदे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्निकर्षापेक्षा, आन्तरविषयाकारवृत्तिस्तु स्वत एवेति, आन्तरबाह्यविषयप्रत्यक्षयोर्विशेषः। तत्र घटादिप्रत्यक्षे चक्षुरादीन्द्रियाणां कारणत्वमपेक्षते, न तु सुखादिसाक्षात्कारे। अन्तःकरणधर्माणां बहिष्ठत्वाभावेन तत्प्रत्यये करणानामनुयोगात्। न च सुखाद्युपलब्धिः क्रियारूपत्वात् सकरणिका, तत्कारणं मनः सिद्ध्यतीति वाच्यम्, तत्क्रियात्वस्यैवास्वीकारात्।

ननु सुखादयोऽन्तःकरणधर्मास्तद्वृत्तिरूढत्वात् सर्वदैव भासेरन्निति चेत्, न, विषयासक्तमनोवृत्तिसंसक्तेनैव सुखादीनामनुभवात्। "न लिप्यते लोकदुःखेन बाह्यः"[1] "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति"[2], "एषोऽस्य परम आनन्दः, यो वै भूमा तत्सुखम्"[3] इत्यादिश्रुतिवाक्यैरात्मनः सुखस्वरूपत्वबोधनात्, तस्य च नित्यत्वात् सुखमपि नित्यं भासेदिति चेत्, न, सुखस्य चित्सरूपेण नित्यत्वेऽपि सुखज्ञानमुत्पन्नं विनष्टमित्यनुभवेन तत्संस्कारसहकृतात्ममनःसंयोगजन्यत्वस्वीकारात्। नन्वेवं सुखादिस्थितिसमयेऽपि तज्ज्ञानस्योत्पत्तिविनाशानुभवेन सुखानुभूतिबाध इति चेत्, न, सुखाद्युत्पत्त्यादिदशायां तदनुभवस्य तदुक्त्यादिविषयतयाऽन्यथासिद्धत्वेन तदसाधकत्वात्। अत एव सुखाद्युपलक्षितानुभवस्य दुःखादिसमयेऽपि सत्त्वात् तदुत्पादककरणानिरूपणात्सुखादिविशिष्टतदुत्पत्त्यादेरन्यथासिद्धत्वान्नास्त्येव सुखानुभवः।

तत्र यद्यपि सुखादयो घटादिवच्छुद्धे चैतन्य एवाध्यस्यन्ति, तथापि वृत्तिभेदादनुभवोऽपि भिद्यते। तथा चोक्तम्—"इदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वाद् घटादेरिदमाकारानुभवविषयत्वम्। अहमाकारानुभवा हि संस्कारसहिताविद्याकार्यत्वादन्तःकरणादेरहमाकारानुभवविषयत्वम्"[4]। ततश्च तदाकारवृत्तिविषयत्वमेवास्वच्छतामसेषु भानप्रयोजकमास्थेयम्। स्वच्छान्तःकरणसुखादिभाने च वृत्तिं विनाऽपि तदाकारत्वसम्भवाच्चित्प्रतिबिम्बाश्रयत्वमपीति जडप्रतिभासे द्वय्येव गतिः। साक्षिचैतन्यं हि यदाकारवृत्तौ प्रतिबिम्बते, तद्भासयति प्रतिबिम्बाश्रयं च वृत्त्यादिकं तथादर्शनात्।

न च क्वचिद् वृत्तिः क्वचित्प्रतिबिम्बाश्रयत्वमित्यनुभवेऽपि भेद इति वाच्यम्, सर्वत्र जडप्रतिभासानुगतौ चैतन्याकारत्वस्यैव प्रयोजकत्वात्। चैतन्यं यदाकारं भवति, तत्प्रतिभासत इत्यर्थः। तत्र चैतन्यस्य तदाकारत्वं न स्वतः

१. कठ.उप. २।५।११।
२. बृ.उप. ३।५।१।
३. छा.उप. ७।२३।१।
४. वेदान्तपरिभाषायाम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्भवति, तस्य विषयैरसङ्गात्। किञ्च, क्वचित्प्रतिबिम्बात् क्वचित्तदाकारवृत्तिसम्बन्धादित्यन्यदेतत्। तत्र सात्त्विकान्तःकरणतद्धर्मेषु प्रतिबिम्बत्वम्। तामसेषु तदाकारवृत्तिसम्बन्धः। उक्तञ्च चित्रदीपे—

"अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटम्।
अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित्"।।

प्रातिभासिकरजतमन्तःकरणवृत्तिप्रतिबिम्बितचैतन्यनिष्ठं न तु साक्षाद्वृत्तिनिष्ठम्, अतो नाहमाकारेण तत्प्रत्ययः। तत्र वियदादिप्रपञ्चोत्पादिका मूलाविद्या चिन्मात्राश्रिता चिन्मात्रविषया निर्विकल्पकज्ञाननिवर्त्या च। इयन्तु तूलाविद्या शुक्त्यवच्छिन्नचैतन्याश्रितरजतभिन्ना या शुक्तिस्तन्निष्ठं यच्छुक्तित्वं तत्प्रकारिका सविकल्पकज्ञाननिवर्त्या चेति वैलक्षण्यम्। उक्तञ्च—"न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव[1]"। तत्रेन्द्रियाणामनिर्वचनीयरजतेन सन्निकर्षाभावात् करणासहकृतेन साक्षिणा तत्प्रकाशकत्वायोगात् तद्भानासम्भवोऽतः साक्षिणा प्रातिभासिकस्य भासनाय साक्षिसम्बन्ध एव श्रेष्ठः। भ्रान्तिर्नाम रजताकाराऽविद्यावृत्तिस्तदवच्छिन्नं साक्षिचैतन्यं भ्रान्तिप्रत्यये निमित्तम्।

अविद्यैव बाह्यदोषापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदकज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिविषयत्वमापद्यते। अयमर्थः—दुष्टेन्द्रियस्य शुक्तिसन्निकर्षादिदमिति प्रमाणवृत्तिर्भवति, तत्प्रतिफलितशुक्त्यवच्छिन्नचैतन्यनिष्ठशुक्तित्वाज्ञानं रागसंस्कारादिसचिवेन शुक्त्या सह मिथ्यातादात्म्यापन्नरजतात्मना परिणमते, इदमाकारवृत्त्यवच्छिन्नचिन्निष्ठशुक्तिविषयत्वाज्ञानं तु ज्ञानसंस्कारसहकृतं साक्षिरजतसम्बन्धापादकरजतज्ञानात्मना तच्च जडत्वान्न स्वविषयसाधकमिति कृत्वा वृत्तिप्रतिबिम्बितचैतन्यरूपं साक्षि अपेक्ष्यते।

यत्तु रजतज्ञानात्मकाविद्यावृत्तिमन्तराऽपीदमाकारवृत्तिप्रतिबिम्बितसाक्षिणैव रजतप्रातिभासोत्पत्तिः, अध्यस्तरजतादेः प्रमाणागम्यत्वेनावरणराहित्यात्तन्नावरणाभिभवार्थातिरिक्तचिदुपरागार्थमपि वृत्तिस्वीकारात्। ज्ञानसुखादौ हि न वृत्त्यन्तरमुपपद्यते, तेषामनावृतचैतन्याध्यस्तादेव भानसम्भवात्। वृत्तिं विना साक्षिचैतन्यस्य विषयभासकत्वेऽसामर्थ्यात्। उक्तञ्च—"केवलं चिन्मात्रं न साक्षि किन्त्वविद्यावृत्त्युपहितम्"[2]। वृत्तेरेव सर्वत्र प्राधान्यम्। सा च क्वचिदावरणभङ्गे निमित्तम्, क्वचिच्च चिदुपरागार्थमेवापेक्ष्यते।

---

१. वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे।

२. अद्वैतसिद्धौ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिवैशिष्ट्यं तद्भेदाश्च

वृत्त्याधीनसमस्तविश्वममलं वृत्त्यैव सम्भासते
तत्रान्तःप्रतिबिम्बजीवसमये वृत्तिः स्वयं भासिका।
मायायां प्रतिबिम्बजीवविषये वृत्तिस्तु रागार्थिका
चैतन्यस्य च साक्षिरूपमखिलं वृत्त्या हि संसाध्यते।।

सर्वत्र बोधप्रसृता हि वृत्तिः प्रमातृभोग्यान् विषयान् तनोति।
जीवक्षमत्वे विषयोपरागो जीवावृते साऽऽवरणं धिनोति।।

वृत्तिरेव प्रपञ्चस्य सर्वदा ज्ञानसाधनम्।
वृत्तिं विना न चैतन्यं कदापि लभते फलम्।।

जीवश्चैतन्यरूपोऽपि विषयैर्नोपरज्यते।
तदर्थं वृत्तेरापेक्षाबोधो न ह्यन्यथा भवेत्।।

वृत्तिश्शक्तिरसौ बुद्धिरिन्द्रियसाधनं स्मृतम्।
वृत्तिसामर्थ्यमापेत्य साक्षिसंवेद्यता स्मृता।।

अयं भावः—चक्षुरादीन्द्रियद्वारेण निर्गत्य तैजसमन्तःकरणं विषयसंसृष्टमपि न तावद्विषयावभासाय क्षमते यावद्वृत्तिर्नोदयः। वृत्तिस्तु विषयावरणनिवृत्तिद्वारा विषयोपरागेण वा साक्षिचैतन्यासक्ता विषयानवभासयति। वृत्तिरियं शब्दशास्त्रेऽर्थ-बोधकसामर्थ्यरूपशक्तिपदेनाभिधीयते। तच्च शब्दसामर्थ्यं शक्तिलक्षणाव्यञ्जनान्य-तमत्वेन बोध्यम्। तत्रैव क्वचित् परार्थाभिधानपदेनापि वृत्तिरुच्यते। सा च शास्त्रप्रक्रियासम्पादकसमासादिपञ्चसामर्थ्यरूपा।

वृत्तिर्व्याख्यानमित्याहुर्जीविका सा च देहिनाम्।
योगशास्त्रे प्रमाणादिस्मृतीनामपि सङ्ग्रहः।।

अन्तःकरणवृत्तिस्तु मनोव्यापाररूपिणी।
निश्चये बुद्धिरूपा सा विषयानुपरज्यते।।

तथा च पदार्थावबोधे सर्वत्र वृत्तेरेव प्राधान्यम्। सा च क्वचिच्छाब्दबोधे निमित्तं क्वचिच्च विषयप्रत्यक्षे हेतुः। इन्द्रियाणां चेतनत्वं लौकायतिका एव मन्यन्ते, नान्ये। तत्र केषाञ्चिन्नये गोलकानि केषाञ्चिन्मते च जडानि। अद्वैतवेदान्ते तु ब्रह्मातिरिक्तस्य सर्वस्यापि वस्तुनो जडत्वादिन्द्रियाणि विषयप्रत्यक्षे हि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तैजसान्तःकरणस्य निर्गमनस्थानानि। तथा चोक्तं पूर्वमपि इन्द्रियद्वारेण तैजसमन्तःकरणं निर्गत्य विषयदेशमधिगत्य विषयाकारेण प्रवर्तते। सा च विषयान्तःकरणप्रवृत्तिर्न प्रत्यक्षसाधिका, तदानीं विषयाणां स्वाज्ञानेनावृतत्वात्। आवरणभङ्गार्थं च वृत्तिरपेक्ष्यते, सा वृत्तिरुभयमभिधत्ते, स्वनिष्ठव्यापारेण विषयावरणमपहाय चैतन्यांशेन विषयं प्रकाशयतीति। तथा चोक्तम्—

"बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्"[1]।।

ननु यदि वृत्तिनिष्ठमेव कर्म तदा व्यापारत्वाभावेन कथमिन्द्रियाणां करणत्वमत आह—वृत्तिप्रत्यासत्त्यैवेन्द्रियाणां करणत्वोपचारात्। उक्तञ्च शाङ्करभाष्ये—"रूपाद्यालोचनादिभिर्वृत्तिभिर्यथास्वं चक्षुरादीनां जीवं प्रति करणभावः"[2]।

वृत्तिविषयमाश्रित्य तदावरणभञ्जिका
चैतन्यं वृत्तिमारूढं विषयाणां प्रकाशकाः।।
अविद्यापरिणामोऽयमन्तःकरणमुच्यते।
विषयबोधकं कर्म वृत्तिरित्यभिधीयते।।

अन्तःकरणत्वेन परिणताज्ञानस्य सङ्कल्पविकल्पात्मिका वृत्तिर्मनः, निश्चयात्मिका च वृत्तिर्ज्ञानं बुद्धिरिति। नन्वन्तःकरणस्यात्मसाक्षात्कारपर्यन्तं जायमानत्वात् सुषुप्तावपि सत्त्वेन तत्रापि वृत्त्युदयाद्विषयप्रत्यक्षं स्यादिति चेत्, न, तत्र मनोवृत्त्यभावेन प्रमाणाद्यभावात्। सुषुप्तौ वृत्त्यभावे ससुखमहमस्वाप्समित्यत्र सुषुप्तिकालिकसुखादिप्रतीतिः कथमत आह—तत्र मनोवृत्त्यभावेऽपि अविद्याप्रतिबिम्बितं चैतन्यं सर्वमनुभवति। कालत्रयेऽपि साक्षिणः स्वसामर्थ्येन विषयावबोधे क्षमत्वात्। तत्र जाग्रत्कालवत् स्वप्नेऽपि वृत्तेः सत्त्वेन तत्रारूढं सत् साक्षिचैतन्यं विषयप्रकाशने क्षमते। सुषुप्तौ हि वृत्तिलयात् स्वयमेव साक्षिचैतन्यं ज्ञातृज्ञेयकरणत्वादिरूपापन्नं सर्वविकल्पातीतं सुखमनुभजते। साक्षिणो विषयानुभूतौ वृत्त्याद्यभावरूपव्यभिचारिणामक्षमत्वात्। न हि प्रतिकर्मव्यवस्थावत्तत्र प्रमातृप्रमाणप्रमेयादीनामावश्यकताऽस्ति। तदुक्तं सिद्धान्तबिन्दौ—"मातृमानमितिमेयानां व्यभिचारित्वेऽपि तद्भावाभावसाक्षिणः कालत्रयेऽव्यभिचारात्"[3]। भाष्येऽपि—"अवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते"[4]।

---

१. पञ्चदशी-तृप्तिदीपे-९१; २. शा.भा.,ब्र.सू., २।४।१०।
३. सिद्धान्तबिन्दौ प्रथमश्लोके; ४. शा.भा.,ब्र.सू. २।१।९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विवरणकारस्तु—"अज्ञाततया ज्ञाततया च सर्वं साक्षिभास्यम्"[१]। सुषुप्तावन्तःकरणस्य सूक्ष्मरूपेण स्थितिसत्त्वात्तदुपहितचैतन्यस्य साक्षिणः सत्ता सुस्थिरा। अत एव साक्षिचैतन्यं सुषुप्तावनुभूताज्ञानं जाग्रते। ससुखमहमस्वाप्सं न किञ्चिदवेदिषमित्यनुभवयोग्यतां भजते।

स्वप्नकालिकवृत्तिस्तत्साक्षिचैतन्यम्

स्वप्ने हि विषयाभावे तद्वृत्तिरपि नोदयेत्।
वृत्तिं विना कथं बोधः स्वप्नाध्यासोऽप्यसम्भवः।।

अविद्याबीजभूतेयं स्वप्नेऽपि परिराजते।
तत्प्रतिबिम्बितं ब्रह्म विषयत्वेन भासते।।

अविद्यापरिणतिर्वृत्तिः स्वप्नावरणभञ्जिका।
वृत्तिबिम्बितचैतन्यं साक्षित्वेनावभासकम्।।

तथा हि जाग्रत्स्वप्नभेदेन प्रपञ्चद्वैविध्यात्तत्प्रत्यक्षस्यापि द्वैविध्यम्। तदर्थञ्च वृत्तिद्वैविध्यं निश्चप्रचम्। तत्र जाग्रत्प्रपञ्चस्य बहिष्ठत्वेन तदर्थमन्तःकरणमिन्द्रियद्वारेण बहिर्निर्गत्य विषयाकारेण परिणमते, तत्परिणामरूपा वृत्तिर्विषयावरणानपसार्य स्वप्रतिबिम्बितचैतन्येन साक्षिणा विषयान् प्रकाशयति, ततश्च बोधः। स्वप्नपदार्थानां वृत्तिपरिणामेन जायमानत्वात् स्वतः प्रसारितविषयारूढमन्तःकरणवृत्तिर्विषयावरणभङ्गपूर्वकं स्वप्रतिबिम्बितचैतन्येन प्रकाशयतीति भेदः।

स्वप्ने हि बाह्यपदार्थानामप्रत्यक्षतया स्वप्नपदार्था मनःपरिणामरूपाः। "व्यवहारदशायां बहिरनुपलभ्यमानाकारा बुद्धिवृत्तिरेव भ्रमः"। "न तत्र रथाः, न रथयोगाः"[२]। तथा चाह भाष्यकारः—"बुद्धिविज्ञानालोकविशिष्टमेव सर्वं विषयजातमुपलभ्यते पुरोऽवस्थितप्रदीपालोकविशिष्टमिव। बुद्धिस्तावत् स्वच्छत्वादानन्तर्याच्चात्मचैतन्यज्योतिःप्रतिच्छाया भवति"[३]। तथा चापरा श्रुतिः—"स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति"[४]। "तत्र बाह्यविषयाणां वासनामयत्वेनान्तःकरणे लयात्। अन्तःकरणमेव वासनावृत्तिरूपेण विषयान् प्रसार्य ज्ञानरूपवृत्त्या च प्रकाश्य स्वावच्छिन्नप्रमातृचैतन्येनावगच्छति। स्वाप्नो विकारो वासनामय एव न पारमार्थिकोऽस्ति"[५]।

१. पञ्चपादिका-विवरणटीकायाम्।
२. बृ.उप. ४।३।१०;
४. बृ.उप. ४।३।९;
४. शा.भा.,ब्र.सू. ४।३।७।
५. शा.भा.,ब्र.सू. ३।२।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वासनामयान्तःकरणस्य वृत्तिपरिणामरूपोऽयं स्वाप्नप्रपञ्चः। तत्रान्तःकरणमेव कर्तृत्वेन भोक्तृत्वेन चावतिष्ठते। स च वासनामयवृत्तिनिर्मितस्तयैव वृत्त्याऽवभासते। उक्तञ्च—"वासनामयं स्वप्नदेहं मायामयमिव निर्माणमपि तत्कर्मापेक्षत्वात् स्वयं कर्तृकमुच्यते"[१]। तत्र वासनावासितान्तःकरणं वासनावृत्तिव्यापारेण स्वाप्नविषयं संसृज्यते। "एवं निमित्तमात्रत्वात्सुप्तो रथादीन् सृजते स हि कर्तेति चोच्यते, न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति"[२]। ननु चक्षुरादीन्द्रियद्वारेणैवान्तःकरणस्य विषयसम्भक्तिदर्शनात् स्वप्ने चेन्द्रियाणामभावात् कथं विषयसंवर्ग इति चेत्, न, चक्षुरादीन्द्रियाण्यन्तरेणापि स्वयं ज्योतिःस्वरूपेण विषयावभासकत्वात्, "अत्रायं पुरुषः स्वयं ज्योतिः"[३]। न च स्वप्ने जाग्रत्कालिकेन्द्रियाणामुपरतावपि तैजसव्यवहारोपयुक्तानि सूक्ष्मदेहावयवभूतानि सूक्ष्मेन्द्रियाणि सन्तीति स्वाप्नपदार्थोऽपि चक्षुरादीन्द्रियद्वारेणान्तःकरणवृत्तिप्रतिपाद्य इति वाच्यम्, जाग्रदिन्द्रियातिरिक्ततैजसेन्द्रियाणामप्रसिद्धेः।

इयमभिसन्धिर्जाग्रत्काले विषयाणां स्वावच्छिन्ने चैतन्येऽध्यस्ततया प्रमातृचैतन्यमिन्द्रियद्वारेण विषयदेशमुपसृत्य वृत्तिप्रतिबिम्बितसाक्षिचैतन्येन विषयान् प्रकाशयते। वृत्तिस्तत्रान्तःकरणावच्छिन्नचैतन्यं जीव इति पक्षे विषयावरणनाशने, अविद्याऽवच्छिन्नचिदात्मा जीव इति मते विषयोपरागे हेतुः। "अज्ञानस्याज्ञानवृत्तिप्रतिबिम्बितसाक्षिभास्यत्वेन वृत्तिनाशादेव संस्कारोपपत्तेः"[४]। स्वप्ने हि वासनावशात् स्वयमन्तःकरणप्रसारितविषयोपरक्ताविन्द्रियाणामनपेक्षतया तैजसवृत्तिरुदेति, तत्प्रतिबिम्बितसाक्षिचैतन्येन विषयावभासकत्वम्। तथा चोक्तम्—"अहङ्कारानवच्छिन्नचैतन्येऽध्यस्यमाने स्वप्नगजादौ तत्समनियताधिष्ठानगोचरान्तःकरणादिवृत्तिकृताभेदाभिव्यक्त्या प्रमातृचैतन्यस्यापि "इदं पश्यामीति व्यवहारः"[५]। स्वप्ने चक्षुरादिव्यापारासम्भवेन स्वाप्नगजादौ चाक्षुषाद्यनुभवो भ्रम एव। "स्वप्ने तु देहस्यान्तःकरणं स्वतन्त्रत्वात्स्वयमेव प्रवर्तिष्यते"[६]। स्वप्नप्रपञ्चस्य मनोऽवच्छिन्नचैतन्य एवाध्यास इत्येकः पक्षः। अन्तःकरणगतवासनानिमित्तकेन्द्रियवृत्त्यभावकालिकार्थोपलम्भस्यैव स्वप्नप्रपञ्चस्वीकारात्। स्वप्नावस्थायां मनोगतजाग्रद्भोगजा

१. तत्रैव-४।३।९।
२. तत्रैव-३।२।४।
३. बृ.उप. ४।३।९।
४. अद्वैतसिद्धौ।
५. सिद्धान्तलेशसङ्ग्रहे।
६. विवरणप्रमेयसङ्ग्रहे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कारा एव गजतुरगादिप्रपञ्चाकारेण परिणमन्ते। तथा चोक्तम्—"मन एव गजतुरगाद्यर्थाकारेण विवर्तते"।[1] जाग्रत्प्रपञ्चाध्यासवत् स्वप्नप्रपञ्चाध्यासोऽप्यविद्यानिमित्तक इत्यपरः पक्षः। अविद्याया एव सर्वत्रार्थाध्यासत्वेन ज्ञानाध्यासत्वेन वा स्वीकारात्। तत्र मनोऽवच्छिन्नचैतन्यं स्वप्नाध्यासनिमित्तमिति मतेऽन्तःकरणवृत्तिप्रतिबिम्बितसाक्षिचैतन्येन विषयप्रकाशः। अविद्याऽवच्छिन्नचैतन्यमध्यासनिमित्तमिति पक्षे प्रमातुरप्यविद्यावृतत्वाद् वृत्त्युपरागेण विषयप्रकाशकत्वमिति विशेषः। आचार्यस्तु जाग्रत्स्वप्नप्रपञ्चयोः समत्वमेवावमन्यते। तथा चाह—"प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया, तथा स्वप्नाश्रयाऽपि"[2]। "अस्माकं तु व्यावहारिकप्रपञ्चोऽपि दीर्घस्वप्न एवेति"[3]।

विविधमतेषु साक्षिस्वरूपविमर्शः

जीवोऽविद्यावृतोऽसौ सकलसुखरतिः स्यात् स्वतः साक्षिरूप-
मज्ञानप्रतिबिम्बो मतमनुभवतः शुद्धचैतन्यसाक्षी।
चित्तव्यापारशिष्टश्च नयमतिमतां साक्षिचित्स्यादुपाधि-
रित्थं सिद्धान्तभेदाद् भवति बहुविधं साक्षिचैतन्यमेतत् ॥

विविधमतप्रवर्तकाचार्याणां सिद्धान्तभेदाज्जीवेशस्वरूपभेदस्तद्भेदाच्च साक्षिस्वरूपभेदः। तत्रान्तःकरणप्रतिबिम्बो जीवः, अविद्याप्रतिबिम्बश्चेश इति मते बिम्बचैतन्यं साक्षी। ईशस्य बिम्बत्वं जीवस्य चेशप्रतिबिम्बत्वमिति मते जीवेशावुभावप्यविद्यायां प्रतिबिम्बाविति मते च शुद्धचित् साक्षी। वार्तिककारमते अविद्याचिदाभासस्वरूपमीशस्साक्षीति सिद्धान्तत्रयं जीवेशनिहितं शास्त्रेषु निरूपितम्। अद्वैतसिद्धिकारस्तु अविद्यायां तद्वृत्तौ वा प्रतिबिम्बितो जीवः साक्षीति मनुते।

तत्रान्तःकरणावच्छिन्नचिदात्मा जीव इति पक्षेऽन्तःकरणोपहितं चैतन्यं साक्षी। यदा चैतन्येऽन्तःकरणस्य विशेषणत्वं तदा जीवत्वम्, यदा तत्रान्तःकरणस्योपाधित्वं तदा साक्षित्वमित्यन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः। अविद्यावच्छिन्नचिदात्मा ईश इति मतेऽविद्योपहितचैतन्यमीश्वरसाक्षीत्युच्यते। अविद्याया व्यापकतयेश्वरज्ञानस्यापि व्यापकतया तद्वृत्तेर्व्यापकत्वं वृत्तिप्रतिबिम्बितविषयावभासकसाक्षिचैतन्यस्यापि व्यापकत्वमिति व्यवहरन्ति। तत्र

---

१. सिद्धान्तबिन्दौ।

२. शा.भा.,ब्र.सू. ३।२।२।

३. तत्रैव-२।३।४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तेः कार्यत्रयमविद्यायां प्रतिबिम्बितं चैतन्यं जीव इति मते विषयतादात्म्यसम्पादनेन चिदुपरागो वृत्तिप्रयोजनम्। विषयोपरक्तं चैतन्यं विषयानवभासयते। अन्तःकरणावच्छिन्नचिदात्मा जीव इति पक्षे वृत्तिर्विषयचैतन्ययोरभेदाभिव्यक्तौ निमित्तम्। विषयाभिन्नं वृत्तिप्रतिबिम्बितचैतन्यमेव प्रपञ्चं प्रकाशयति। यद्वा स्वाज्ञानावृतानां वियदादिविषयाणां वृत्त्याऽऽवरणभङ्गस्ततो वृत्तिप्रतिबिम्बितसाक्षिचैतन्येन विषयावभासः। ननु साक्षिचैतन्यस्य ब्रह्मरूपत्वात् कथं भेदावग्रहः? अत्रोच्यते—जीवभिन्नत्वेन विषयावभासे भेदवृत्त्या च साक्षिस्वरूपत्व औपाधिको भेदः, न तु वास्तविकः, साक्षिणो ब्रह्मरूपत्वात्। तथा श्रुतिः—"साक्षी चेता केवलो निर्गुणश्च"[१], "अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च"[२], "यः सर्वेषु भूतेषु तिष्ठन् अन्तर्याम्यमृतः"।[३]

निरूपितं साक्षिचिदेकरूपं प्रपञ्चबोधे सहकारिहेतुः।
न यद्विना स्याद्विषयावभासः प्रभासते वृत्तिपथावरूढम्।।इति।

●

---

१. श्वेता.उप. ६।११।
२. कठोप. २।३।८।
३. बृ.उप. ३।७।१५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मणः सविशेषस्वरूपसमीक्षा

डॉ० जयप्रकाशनारायणत्रिपाठी
उपाचार्यः, वेदान्तविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

❀ ❀ ❀

ननु "सत्यं ज्ञानमनन्तं ब्रह्म", "नित्यं विज्ञानं ब्रह्म" इत्यादिवेदान्तवाक्यानां विधिसंस्पर्शविधुराणामखण्डैकरसब्रह्मलक्षासिद्धार्थाऽवबोधकत्वं सुतरां सिद्धम्, अतश्च निर्विशेषे ब्रह्मणि सत्यज्ञानादिवेदान्तवाक्यानां तात्पर्यमिति चेदत्रोच्यते—निर्विशेषब्रह्मवादिभिर्निर्विशेषे ब्रह्मणि इदं प्रमाणमिति वक्तुं न शक्यते, सर्वप्रमाणानां सविशेषवस्तुविषयकत्वात्। इदमहमदर्शमिति केनचिद् विशेषेण विशिष्टविषयत्वात् सर्वेषामनुभवानाम्।

यदि चोच्यते—अनुभवो निर्विशेषः, अनुभवत्वादित्यनुमानप्रयोगेण निर्विशेषत्वं साध्यते, तन्न शोभनम्। तथा हि—अनुभवो न विशेषसामान्याभाववान्, तत्तद्विशेषाभावरूपयावदभाववत्त्वाभावात्, अनुभवत्वरूपहेत्वादिकतिपयविशेषवत्त्वाद् इति ज्ञाने जाते विशेषाभावरूपैः स्वभावैरेव सविशेषत्वमायातम्।

अथ च भवदभिमतानुमाने हेतु-साध्य-पक्षताऽवच्छेदकधर्मत्रयस्यावर्जनीयतयापि सविशेषत्वं गले पतितमेव। ननु जागरणकालिकमनुभवमादाय न निर्विशेषत्वमुच्यते, अपि तु स्वापकालिकम्। तत्र हि मामपि न ज्ञातवान्, इति अहम्भावं विनैव भावाद् विशेषस्फुरणाभावेन निर्विशेषत्वमिति प्रतिपादयितुमिष्यते, तदपि न रमणीयतमम्। सुखमहमस्वाप्सम्, नाहं किञ्चिदवेदिषमित्यत्र पूर्ववाक्येन तदानीमानन्दरूपविशेषवत्तथाऽहमर्थस्य प्रतीत्या सविशेषत्वं सिध्यत्येव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ च निर्विशेषवस्तुनि शब्दप्रमाणस्य गतिर्नास्ति, यतो हि प्रकृतिप्रत्यययोगेन पदत्वम्—प्रकृतिप्रत्यययोरर्थभेदेन पदस्य विशिष्टार्थप्रतिपादननैयत्यात् पदभेदश्चार्थभेदमूलक इति पदसमुदायरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायकत्वेन निर्विशेषवस्तुप्रत्यायनासामर्थ्याद् न तत्र शब्दप्रमाणस्य प्रसरः।

निर्विकल्पकसविकल्पकभेदभिन्नस्य प्रत्यक्षस्यापि न तत्र सामर्थ्यम्, तथा हि—सविकल्पकं तावज्जात्यादिविशेषविषयकत्वादेव सविशेषविषयकम्। निर्विकल्पकमपि केनचिद् विशेषेण वियुक्तस्य ग्रहणम्, न तु सकलविशेषरहितस्य, तथाभूतस्य कदाचिदपि ग्रहणासम्भवात्। एवं चैकजातीयद्रव्येषु प्रथमपिण्डग्रहणं निर्विकल्पकतया द्वितीयादिपिण्डग्रहणं निर्विकल्पंकम्। प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते, द्वितीयादिपिण्डग्रहण एव तत्प्रतीतिः। यदा चैक एव गोपिण्डः पूर्वं दृष्टः, पुनरपि दृश्यते, तदा तस्य पूर्वदेशकालस्थताप्रतिसन्धानेन सहोत्तरदेशकालस्थताग्रहणे तु तदपि सविकल्पकमेव। कल्पः कल्पनाविषयश्चिन्तागोचरो मानसप्रतिसन्धानपदं वस्तु। संस्कारसहकृतेन्द्रियजन्यज्ञानं सविकल्पकम्। केवलं तु निर्विकल्पकम्। नैयायिकास्तु विशिष्टज्ञानं प्रति विशेषज्ञानस्य कारणतामभ्युपगच्छन्तो विशिष्टज्ञानशेषतया कथञ्चिद् अनुभवाविषयमपि निर्विकल्पकं कल्पयन्ति, तत् तुच्छम्। अतश्च निर्विकल्पकप्रत्यक्षेऽपि संस्थानरूपजात्यादेर्ग्रहणं भवत्येवेति प्रत्यक्षस्यापि न कदाचिदपि निर्विशेषविषयकत्वम्।

ननु सर्वत्र धर्मधर्मिणोर्भेदवद् अभेदस्यापि स्वीकाराद् यदिन्द्रियेण अविशेषात् सर्वग्रहणेऽपि धर्मधर्मिभेदग्रहणे सविकल्पता, अभेदग्रहणे निर्विकल्पतेति स्यादिति चेत्, उच्यते—इदमित्थमिति प्रतीतौ इत्थम्भावः सास्नादिसंस्थानविशेषः, तद्विशेष्यभूतं द्रव्यमिदमंशः, इति तयोरैक्यं प्रतीतिपराहतमेवेति सर्वज्ञविशेषणविशेष्यभावप्रतीतौ तयोरत्यन्तभेदः सुष्ठु प्रतीयमानः कथं वारयितुं शक्येत। सकलं वस्तु प्रथमं प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते। व्यावृत्तिश्च गोत्वादिसंस्थानविशेषविशिष्टतया इत्थमिति प्रतीतिसद्भावात्। तदेतत् सूत्रकृता भगवता व्यासेनापि सङ्केतितम्—"नैकस्मिन्नसम्भवात्[१]" इत्यनेन सूत्रेण।

---

१. ब्र.सू. २/२/३३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतः शब्दस्य प्रत्यक्षस्य च सविशेषविषयत्वमेव निर्णीतम् अनुमानस्यापि प्रत्यक्षादिना दृष्टसम्बन्धविशेषविशिष्टवस्तुविषयकत्वात् सविशेषविषयकत्वमेवायाति। इति कृत्वा न केनापि प्रमाणेन निर्विशेषवस्तुतत्त्वं साधयितुं शक्यते भवताऽद्वैतवादिना।

प्रत्यक्षस्य सन्मात्रविषयत्वे 'घटोऽस्ति', 'पटोऽस्ति' इति जात्यादिविशिष्टविषयाप्रतीतिर्विरुध्यते। अथ च यदि भेदः प्रत्यक्षेण न गृह्यते, तर्हि किमश्वार्थी महिषदर्शनेन कृतार्थतां भजते? अपि तु न, अतः प्रत्यक्षेण सन्मात्रं नैव गृह्यते, अपि च निर्विशेषस्य सन्मात्रस्य प्रत्यक्षेणैव ग्रहणे तद्विषयकागमानां वेदान्तवाक्यानां प्राप्तविषयकत्वेनानुवादकत्वमेव आपतति, सन्मात्रस्य ब्रह्मणः प्रमेयतापत्तिश्च, ततो जडत्वनाशित्वादिदोषाः सुतरां प्रसज्येरन्, केन वारयितुं शक्येरन्।

यत्तु अनुभवस्य निर्विशेषत्वं स्वयंप्रकाशत्वमुच्यते, तदपि न युक्तिसहं प्रतिभाति। यतो हि विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव स्वरूपमस्तु, न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्तु, परानुभवस्य मनोपादानलिङ्गकानुमानज्ञानविषयत्वात्, स्वानुभवस्यापि अतीतस्य "अज्ञासिषम्" इति ज्ञानविषयत्वदर्शनेनानुभूतेरपि सविशेषविषयकत्वं दुर्निवारम्। यदि चोच्यते—अनुभूतिर्यदि अनुभाव्या—अनुभवविषयतां भजेत्, तदा तस्या अननुभूतित्वमेव स्यादिति स्वरूपहानिः, तत्तु विचारासहम्। यतश्च स्वगतातीतानुभवानां परगतानुभवानां चानुभूतिविषयता सर्वाभिमताऽस्ति, तत्राननुभूतित्वं प्रसक्तं स्यात्। परानुभवानामनुमानविषयत्वानङ्गीकारे शब्दार्थसम्बन्धग्रहणाभावेन सकलशब्दव्यवहार उच्छिद्येत। भवत्सम्मतौ अनुभूतेरनुभवाविषयत्वेऽपि अनुभूतित्वप्रसङ्गः स्यादेव, गगनपुष्पादेरनुभवाविषयस्यानुभूतित्वात्।

किञ्च, वेदान्तवाक्यानां निर्विशेषवस्तुपरत्वं यदि संसर्गागोचरप्रमितिजनकत्वं स्वीक्रियेत्, तच्च प्रकृष्टप्रकाशश्चन्द्र इत्यादिलक्षणवाक्येषु प्रसिद्धमिति चेत्, तत्रोच्यते—लक्षणवाक्यैरपि लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तत्वेन प्रतिपादनात् तत्तच्छब्दैर्व्यवहर्तव्यत्वेन प्रतिपादनाद्वा तेषां वाक्यानामपि संसृष्टार्थत्वबोधकत्वस्य दुर्निवारत्वात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वान्ते च विस्तरभिया निबन्धवृद्धिमकुर्वन् निबन्धनीयं विषयमुपसंहरन् ब्रवीमि यत् ''नहि काचिदपि अनुभूतिर्निर्विषया अस्ति'', तादृश्या अनुभूतेरनुपलभ्यमानत्वात्। विषयप्रकाशनतयैवोपलब्धेरेव ह्यनुभूतेः स्वयंप्रकाशिता समर्थिता। यदि अनुभूतैर्विषयप्रकाशनस्वभावविरह स्यात्, तर्हि स्वयंप्रकाशतायाः सिद्धिरेव न स्यादिति शम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मीमांसाशास्त्रस्य वैधत्वम्

डॉ० कमलाकान्तत्रिपाठी
अध्यक्षः, मीमांसाविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी

❀ ❀ ❀

संसारे नैकविधाहिताहितानुबन्धिकर्मसु प्राणिनां प्रवृत्तिर्न स्वाभाविकी। अविद्यापङ्कतिरस्कृतनिजप्रकाशप्रत्यगात्मनामेव सा भवितुमर्हति। तद्वैचित्र्यादेव शुभाशुभसंस्कारवैचित्र्यमप्यनुभवपदवीमारोहति। उक्तं हि भगवता ऋषभदेवेन—

'एवं मनः कर्मवशं प्रयुङ्क्तेऽ-
विद्ययाऽऽत्मन्युपधीयमाने।
प्रीतिर्न यावन्मयि वासुदेवे
न मुच्यते देहयोगेन तावत्'[१]।।

अविद्यया आत्मनि उपधीयमाने आच्छाद्यमाने सति एवं मनः कर्तृपुरुषं कर्मवशं प्रयुङ्क्ते। कथम्? आत्मनः स्फुरच्चिद्रूपस्य पिहितत्वात्। एवं प्रत्यस्तमितसर्वविशेषसच्चित्परनिर्वृतिस्वसंवेदनगोचरप्रत्यगात्मभिन्नेषु पुत्रमित्रकलत्रेषु विचित्रेषु जडत्वावच्छिन्नभूभूरुहगेहहिरण्यादिवित्तेषु सर्वानर्थसम्पृक्तेषु च विषयभोगेषु स्वात्मबुद्धिर्जायते। ततः संसारक्रमः। संसारापन्निधिनिमग्नान् प्राणिन उद्धर्तुं भवति भगवान् सर्वज्ञकल्पोऽपौरुषेयो वेदः सततसचेष्टः। निःश्रेयसययीं प्रदर्शयति स सर्वज्ञानप्रकाशपपीर्निवर्तयति च निरयमार्गाद् अधर्मस्यानिष्टसाधनतां प्रतिपादयन्। सर्वथा प्रमीयमाणे धर्मेऽसाधारणकारणतामुपैत्यसौ। यथा चाहुर्वार्तिककारमिश्राः—

धर्मे प्रमीयमाणे हि वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति[२]।।

तथा हि मीमांसाशास्त्रारम्भमूलं 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिः। अत्र स्वाध्यायत्वं नाम स्वशाखात्वम्। स्वत्वञ्च परम्परयाऽध्ययनविषयत्वमनुष्ठान-

---

१. श्रीमद्भागवते-५।५।६;   २. बृहट्टीका।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयत्वञ्च। तेन वेदत्रयान्तर्गतैकशाखापर: स्वाध्यायशब्द:। अध्येतव्य इत्यत्राध्ययनं धात्वर्थ:, तच्च गुरुमुखोच्चारणानूच्चारणरूपम्। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति स्मरणात् प्रैषे तव्यप्रत्ययविधानादत्र प्रैषबाधेन प्रवर्तनैवोच्यते। यथा चोक्तम्—

प्रवर्तनस्मृति: प्राप्ते प्रैष इत्यभिधीयते।
अप्राप्तप्रैषणे सर्वं विधित्वं प्रतिपद्यते।। इति।

शब्दभावनापरपर्यायरूपाया: प्रवर्तनाया: प्रवृत्त्यनुकूलव्यापाररूपत्वात् प्रवृत्तिरूपाऽर्थभावनाऽपि तयैवाक्षिप्यते। तस्याञ्च फलभाव्यकत्वनियमात् फलभाव्यकभावनेति नामान्तरम्। सा चांशत्रयवती, साध्यसाधनेतिकर्तव्यतारूपाकाङ्क्षात्रयवत्त्वात्। तत्र समानपदोपात्तमप्यध्ययनं न भाव्यत्वेन सम्बध्यते। षष्ठाद्यन्यायेनापुरुषार्थत्वात्तस्येष्टभाव्यत्वानुपपत्ते:। तथा च भट्टपादा आहु:—

"तत्र किं भावयेदित्यपेक्षायामध्ययनमित्यागतमपि पुरुषप्रवर्तनाशक्तियुक्तेन विधायकेनापुरुषार्थसाध्यायां भावनायां प्रवर्तनाशक्तिप्रसक्तेस्तदंशान्निराक्रियते"[१] इति। ततश्च भावार्थाधिकरणन्यायेनाविरोधात् सन्निधेश्च करणांशे सन्निवेशमुपैति तद् अध्ययनेन भावयेदिति। तस्या भाव्यापेक्षायां स्वाध्यायस्यैव कर्मणि तव्यप्रत्ययविधानाद् भिन्नपदोपात्तत्वेऽपि भाव्यत्वमङ्गीक्रियते। अध्ययनेन स्वाध्यायं भावयेदिति। एवं केवलस्यैव स्वाध्यायस्यापुरुषार्थत्वमापतति। तेनाध्ययनभाव्यकत्वपक्षीयो दोषोऽनिवार्य: स्यात्। अत एव स्वाध्यायेन पदावधारणं पदावधारणेन पदार्थज्ञानं पदार्थज्ञानेन वाक्यार्थज्ञानं वाक्यार्थज्ञानेन चानुष्ठानमनुष्ठानेन च स्वर्गादिप्राप्तिरित्येतावत्पर्यन्तानुधावनेनाकाङ्क्षोपरमो भवति। अत एव वार्तिके भट्टपादैरुक्तम्—"सर्वविधीनां प्राक् पुरुषार्थलाभादपर्यवसानम्"[२] इति। अत: स्वाध्यायाध्ययनप्रवृत्तिसिद्धये स्वाध्यायस्य किमपि प्रयोजनमन्वेष्टव्यमेव। अन्यथा 'अनधीयाना व्रात्या भवन्ति' इति स्मृतिमूलश्रुतिरूपवाक्यान्तरेण केवलस्य तस्य व्रात्यतापरिहारार्थं सम्पाद्यमपि निरूपितमिति स्वाध्यायवाक्यस्य वैयर्थ्यमापद्येत। न ह्यध्ययनस्य केवलं स्वाध्याय: प्रयोजनम्। अत एव केवलस्य वेदस्य 'स्वाध्यायोऽध्येतव्य:' इति वाक्ये साध्यत्वेनान्वयासम्भवादर्थज्ञानविशिष्टस्वाध्यायस्यैव प्राप्यकर्मत्वमस्ति।

कर्मणो हि चतुर्विधत्वम्—उत्पाद्यत्वं प्राप्यत्वं विकार्यत्वं संस्कार्यत्वं चेति। घटं करोति, ग्रामं गच्छति, तण्डुलं पचति, आदर्शं विमलयतीति क्रमेणोदाहरणानि।

१. तन्त्रवार्तिके - १।१।७; २. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रकृतवाक्येऽन्यस्याभावात् प्राप्यकर्मत्वमेवावतिष्ठते। अध्ययनेन स्वाध्यायस्य प्राप्यमाणत्वात्। तथा च विशेषणीभूतार्थज्ञानार्थमध्ययनं विधीयते स्वाध्यायवाक्ये।

एतेन मीमांसाशास्त्रमालावृत्तौ कमलाकरभट्टतनूजन्मना श्रीमदनन्तभट्टेन यदुक्तम्—"न तव्यप्रत्ययेन स्वाध्यायस्य भाव्यत्वं सम्भवति, तथात्वेऽपुरुषार्थ-साध्यकभावनायां विधेरप्रवर्तकत्वापत्तेः। कर्मोपयुक्तार्थज्ञानार्थत्वे सम्भवति अदृष्टार्थत्वायोगाच्च। तेन तव्यप्रत्ययेन साध्यत्वोक्तावपि सक्तूनितिवत् करणत्वे लक्षणेति,"[१] तच्चिन्त्यम्, फलभाव्यकभावनायां समानपदोपात्तत्वेनाध्ययनस्य करणत्वेनान्वये जाते पुनः करणाकाङ्क्षाभावेन स्वाध्यायस्य करणत्वेनान्व-यस्यासम्भवात्। 'सक्तून् जुहोति' इत्यत्र सक्तूनां साध्यत्वे होमेन तेषां संस्कार्यत्वापत्तेः, संस्कृतानाञ्च भूतभाव्युपयोगाभावाद् भवति करणत्वे लक्षणा सक्तुभिर्होमं कुर्यादिति।

अपि च तत्रैव रेवतीवारवन्तीयवद् भावनाविशिष्टभावनान्तरविधिरयमिति पितृचरणा इत्यनेन स्वपितुर्मतमुट्टङ्कितम्। तदपि न विचारपदवीमधिरोहति। भावना-बोधकपदद्वयाभावात्। "एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेते'ति वाक्यविचारात्मके रेवत्यधिकरणे गुणकामाधिकरणन्यानेन 'त्रिवृदग्निष्टुदग्निष्टोम' इति वाक्यविहितस्याग्निष्टुदाख्यस्य कर्मण एव रेवतीरूप-गुणफलसम्बन्धविधिरिति पूर्वपक्षे सत्याश्रयालाभाद् रेवतीविशिष्टस्तोत्रभावनोत्तर-कालताविशिष्टयागान्तरभावनैव पशुरूपफलोद्देशेन विधीयत इति सिद्धान्तः। तत्र कृत्वापदेन भावनोत्तरकालतासमर्पणात् सम्भवति भावनोपसर्जनभावनान्तरविधिः। अत्र तु स्वाध्यायवाक्ये न तथा सम्भवतीति भावनोपसर्जनभावनान्तरविधिरिति नातीव रोचते।

नन्वेवं यद्यर्थज्ञानस्यैव भाव्यत्वमस्ति तदा कथं स्वाध्यायगतकर्मत्वबोधकस्य तव्यप्रत्ययस्योपपत्तिः? आर्थिकसंस्कार्यत्वमादाय तदुपपत्तिरिति ब्रूमः। तथा हि— अध्ययनस्याशब्दरूपस्यार्थज्ञानसाधनत्वानुपपत्तेः शक्त्यनुसारेण स्वाध्यायावाप्तिद्वारा तद् भवति। स्वाध्यायस्य चार्थज्ञानसाधनत्वं विना अध्ययनस्य अर्थज्ञानसाधनत्वे स्वाध्यायावाप्तेर्द्वारत्वस्यानुपपत्तेः स्वाध्यायस्याप्यर्थज्ञानसाधनत्वमर्थात् प्रतिपादितं भवति। कथमिति चेत्? यथा गीतिस्वरूपाणां साम्नां स्तोत्रसाधनत्वे सिद्धे सामाधारभूतानामृचामपि स्तोत्रसाधनत्वं भवति। एवं रीत्या स्वाध्यायस्य गुणत्वेऽपि अर्थज्ञानावाप्तेर्द्वारत्वादार्थिकं प्राप्यकर्मत्वमप्यस्तीति न तव्यप्रत्ययोक्तकर्मत्वस्यानुपपत्तिः। अत एव स्वाध्यायस्यो-

१. मीमांसाशास्त्रमाला-१।१।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पादेयत्वेन तद्गतस्यैकत्वस्य विवक्षा। न तु 'ग्रहं सम्मार्ष्टि' इत्यादाविव सम्मार्गोद्देशेन ग्रहत्वैकत्वयोर्विधाने वाक्यभेदादेकत्वस्याविवक्षा।

एतदभिप्रायेणैव श्रीखण्डदेवेन भाट्टदीपिकायां प्रयोजनवदर्थज्ञानोद्देशेन स्वाध्यायाध्ययनं विधीयत[1] इति प्रथमः पक्ष उक्तः। जरन्मीमांसकास्तु तव्यप्रत्ययेन कर्मत्वेनाभिहितस्य स्वाध्यायस्य गुणत्वेनान्वये क्रियमाणे तत्र ज्ञातस्य प्राधान्यस्य बाधः स्यात्, अत एव चान्यरूपेण कर्मत्वास्यासम्भवात् प्राप्यकर्मत्वेनैव स्वाध्यायस्यान्वयोपपत्तेः स्वाध्यायस्वरूपे आनर्थक्यादध्ययनस्य शब्दोच्चारणरूपत्वेनोच्चारणस्य चार्थज्ञानजनकत्वक्लृप्तेर्विधेयसामर्थ्यानुरोधेन स्वाध्यायस्योद्देश्यस्यापि अर्थज्ञानजनकत्वयोग्यत्वेनार्थज्ञानस्योपस्थितत्वात्स्वाध्यायपदे पुरुषार्थपर्यवसाय्यर्थज्ञानसाधनस्वाध्यायलक्षणामङ्गीकृत्य तदुद्देशेनैवाध्ययनस्य विधानम्। ततश्च संस्कार्यकर्मत्वमेवेत्याहुः। एतत्तु युक्तमेव।

अत एवोक्तं खण्डदेवेन 'प्रयोजनवदर्थज्ञानसाधनीभूतस्वाध्यायोद्देशेन वाऽध्ययनमात्रम्, तव्यप्रत्ययेन स्वाध्यायस्य कर्मत्वाभिधानात्' इति[2]। एतेनाध्ययनेन स्वाध्यायं भावयेत्, अधीतेन स्वाध्यायेनार्थज्ञानं भावयेदिति स्वाध्यायसंस्कारार्थत्वं विधाय पुनर्विपरिणामेन तस्यैवावृत्त्या वाक्यार्थान्तरकल्पनं केषाञ्चित्[3], तद्वाक्यभेदापत्त्यैवासङ्गतम्।

इत्थं 'व्रीहीन् प्रोक्षति' इत्यत्र यथा व्रीहिस्वरूपे प्रोक्षणस्यानर्थक्यात् प्रोक्षणं विनापि व्रीहिस्वरूपस्य निष्पन्नत्वादपूर्वसाधनत्वे लक्षणा स्वीक्रियते, दर्शपूर्णमासजन्यं यदपूर्वं तदपूर्वसाधनव्रीह्युद्देशेन प्रोक्षणं विधीयते, तथैव स्वाध्यायपदे लक्षणमेव स्वीकृत्य बोधः।

एवमस्मिन् पक्षे स्वाध्यायस्य संस्कार्यत्वेनोद्देश्यत्वात् तद्विशेषणस्यैकत्वस्याविवक्षा स्यात्, तथा च शाखान्तराधिकरणन्यायविरोधः। तत्र हि एकस्या एव शाखाया अध्ययनं भवतीति प्रतिपादितम्।

एकत्वस्याविवक्षायामपि स्वाध्यायपदे स्वशब्देन स्वकीयवाचिना पित्रादिपरम्परया आगतायाः शाखाया वाच्यत्वस्य निश्चयाद् अनेकासां शाखानामध्ययने स्वशब्दस्य वैयार्थ्यापत्त्या एकस्या एव शाखाया अध्ययने न कश्चिद्विरोधः। एवञ्च शास्त्रस्य अप्राप्त एवार्थवत्त्वाद् गृहीतपदपदार्थसङ्गतिकस्य प्रमाणान्तरादेवार्थज्ञानस्याध्ययनभावनाभाव्यतायाः सिद्धत्वात्, तादर्थ्ये च

---

१. भाट्टदीपिका - १।२।१।

२. तत्रैव;

३. मीमांसान्यायप्रकाशीये भाट्टालङ्कारे अनन्तदेवानाम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विध्यानर्थक्यप्रसङ्गात् 'स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्' इति सूत्र-सूचितविश्वजिदधिकरणन्यायेन स्वर्गस्तस्या भाव्यं भवतु। यद्युच्येत अर्थज्ञानार्थ-ताया प्रमाणान्तरादेव सिद्धेऽपि व्रीहीनवहन्ति' इतिवद् विधेर्नियमार्थत्वाद् नानर्थक्यं भविष्यतीति, तदपि न युक्तम्, अध्ययनस्याक्रत्वर्थत्वात्। अवघातादयः क्रतावेव नियम्यन्ते, 'अवघातेनैव निर्वर्त्यमानास्तण्डुलाः क्रत्वपूर्वं साधयन्ति, न तण्डुल-स्वरूपे, प्रत्यक्षादिप्रमाणान्तरविरोधात्, नखविदलनाद्युपायान्तरेणापि तण्डुलस्वरूप-निर्वृत्तिदर्शनात्। एवमत्रापि अध्ययनं विनापि पुस्तकनिरीक्षणादिप्रणालिकया ज्ञानोत्पत्तेः सम्भवात् तत्स्वरूपेन नियमः सम्भवति। अध्ययनापादितज्ञानपूर्वकमेव क्रत्वनुष्ठानमभ्युदयाय घटत इति नियम्येत, एतत्तु न सम्भवति। कथमिति चेत्, स्वाध्यायविधेरनारभ्याधीतत्वात्, 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इतिवदव्यभिचरितक्रतुसम्बन्धाभावात्, अध्ययनस्य क्रत्वर्थत्वाभावात्। अत एव नियमार्थत्वानुपपत्तेः स्वर्गार्थतैव वरमिति न वाच्यम्।

दृष्टे सम्भवत्यदृष्टकल्पनस्यान्याय्यत्वान्न स्वर्गस्य फलभावनाभाव्यकत्वम्। अपि च दृष्टमेव ज्ञानम्। अध्ययनस्यार्थज्ञानार्थतायां प्रमाणान्तरसिद्धायामपि नियमार्थत्वादेव न विधेरानर्थक्यं भविष्यति।

यदप्युक्तम्—अर्थज्ञानस्वरूपे नियमस्यायोगात् क्रतावपि अक्रत्वर्थस्य नियमायोगाद् नियमार्थता नावकल्प्येत इति, तदपि न, अप्राप्तविधित्वाङ्गीकारात्। यावत् प्रयोजनवत् कर्मानुष्ठानोपयोगिज्ञानोपायत्वेनाध्ययनादिनानोपायानुष्ठानं नोत्प्रेक्षितं तावद् द्विजानां तत्प्रक्रमाधीतत्वेन 'स्वाध्यायोऽध्येतव्यः' इति प्रत्यक्षश्रुत्याऽध्ययनं विधीयते, श्रुतेर्लिङ्गाच्छीघ्रप्रवृत्त्यङ्गीकारात्। तस्मिन् विहिते सति तदापादितज्ञानैरेव लब्धानुष्ठानानि उत्तरकर्माणि 'अवैधत्वादभावः कर्मणि स्यादि'ति न्यायेन विद्वांसमधिकृत्य प्रवृत्तानि न तस्य ज्ञानसिद्ध्यर्थमुपायान्तमाक्षिपन्तीति फलतो नियमविधित्वव्यपदेशः। यथा 'इमामगृभ्णन् रशनाऽमृतस्येत्यश्वाभिधानी-मादत्ते' इत्यत्र विधौ रशनादानमन्त्रस्य लिङ्गादेव अश्वरशनाङ्गत्वे सिद्धेऽपि लिङ्गात् श्रुतेः शीघ्रप्रवृत्त्यङ्गीकारात् प्रत्यक्षश्रुत्यैव लिङ्गस्य श्रुतिकल्पकत्वशक्तेर्व्याघाताद् अश्वरशनाङ्गत्वेन मन्त्रविशिष्टादानं विधीयते[१]। तथा सति गर्दभरशनानिवृत्तिरूपा परिसंख्या फलम्।

---

१. यद्यपि भाष्यकारैरश्वाभिधान्यादानाङ्गत्वेन मन्त्रविधिरेवोक्तस्तथापि वार्तिककारमतेन एवमुक्तम्। अत्र इतिकरणविनियोगस्थले वाक्यीयो विनियोग इति केचन प्रतिपादयन्ति, तत्तु लिङ्गेन वाक्यस्यैव बाधापत्त्योपेक्ष्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यपि परिसंख्यायां स्वार्थहानिः परार्थकल्पना प्राप्तबाध इति दोषत्रयं भवति, तथापि फलतः परिसंख्यायां न तत्। यथोक्तं श्रीखण्डदेवेन—'अश्वाभिधानीसम्बन्धरूपस्वार्थस्यैव विधेयत्वात्, अन्यनिवृत्तिरूपपरार्थस्यार्थसिद्धत्वेनाकल्पनीयत्वात्, प्रापकप्रमाणस्याप्रवृत्ततया प्राप्तबाधाभावाच्चेति'[१]।

एवं सति अध्ययनस्य क्रत्वर्थत्वप्रसङ्ग इति न शङ्कनीयमेव। अध्ययनापादितमर्थज्ञानमेव क्रत्वङ्गम्। अध्ययनन्तु ज्ञानाङ्गमेव।

शास्त्रदीपिकायान्तु अपशूद्राधिकरणव्युत्पादितस्त्रैवर्णिकानामेवोत्तरक्रतुषु अधिकारो न शूद्राणामित्यधिकारनियमः प्रयोजनमध्ययनविधेरुक्तं पार्थसारथिमिश्रैः। तथा हि तत्रत्यो ग्रन्थः—"असत्यध्ययनविधौ अग्निहोत्रादिशास्त्राणि विद्वांसमलभमानानि अविद्वांसमेवाधिकृत्य विद्यामन्तरेणानुष्ठानासम्भवाद् विद्यामाक्षिपन्ति, अविशेषाच्चतुरो वर्णानधिकुर्य्युः। सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो भवति, न तुरीयादेरिति"[२]। अयम्भावः—वसन्तग्रीष्मशरत्सु क्रमेण ब्राह्मणादीनां त्रैवर्णिकानामुपनयनरूपसंस्कारविधानात् संस्कृतानां तेषामुपयोगापेक्षायामनिर्दिष्टकर्तृकस्याध्ययनस्य कर्त्रपेक्षायामध्ययने त्रैवर्णिकानामेव विनियोगादक्षरग्रहणपूर्वकार्थज्ञानसम्पादनेनोत्तरक्रतुष्वधिकारः सिध्यति। अन्यथा दर्शपूर्णमासादिक्रतुविधयो 'न ह्यविद्वान् नियुक्तो भवती'ति न्यायेन चतुर्णामपि वर्णानां विद्यामाक्षिपन्तस्ताँश्चतुरोऽधिकुर्युरिति।

एतच्च सम्भवाभिप्रायेणोक्तम्। पूर्वोक्तापूर्वविधिप्रकार एव ज्यायान्। तेन च फलतो नियमभाषेति न पूर्वपक्षोक्तदूषणावकाशः। एवम्, विधीनामंशत्रयविशिष्टभावनाबोधकत्वेन, अर्थवादानां विधेयस्तावकत्वेन, मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वेन, प्रतिषेधानां निवृत्तिजनकत्वेन, नामधेयानां विधेयार्थपरिच्छेदकत्वेन दृष्टविधयैव प्रामाण्यं सुस्थिरं भवति।

ननु साममन्त्राणामृगक्षराभिव्यञ्जकत्वेन यद्यपि दृष्टार्थता भवति, तथापि स्तोभभागेषु ऋग्बहिर्भूतेष्वनर्थकेषु न सा सम्भवतीति चेत्, न, तत्रापि नियतानां कालानां पूरणमेव दृष्टं प्रयोजनं ग्रहीतुं शक्यमेव। तेन च नाध्ययनविधेर्वैरूप्यं न च वाक्यभेदः सम्भवति, यतो हि न केवला अर्थज्ञानसिद्धिरेव स्वाध्यायाध्ययनविधेः प्रयोजनमस्ति। "दृष्टं यच्छक्यते कर्तुं तत्सर्वं फलमिष्यते' इति न्यायेन दृष्टत्वोपलक्षणद्वारा अन्यविध्युपयोगि यत् किञ्चिदप्यस्ति तत्सर्वं भावयेदित्येकयैव

---

१. भाट्टदीपिका-१।२।४; २. शा.१।१।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वचनभङ्ग्या सर्वार्थत्वस्य लाभेन वाक्यभेदस्य प्रसक्त्यभावात्। एवमेवोपनिषदामप्यस्मन्मतेऽर्थवादरूपत्वात् क्रत्वर्थपुरुषप्रतिपादकत्वेन दृष्टार्थता नैराकाङ्क्ष्यञ्च सम्भवति। पुरुषस्य च क्रत्वर्थत्वं 'पुरुषश्च कर्मार्थत्वादित्यनेन भगवता जैमिनिना तृतीयेऽध्याये प्रथमे पादे न्यरूपि।

इत्थं प्रयोजनवदर्थज्ञानसाधनीभूतस्वाध्यायोद्देशेनाध्ययनस्याध्ययनविधिना विधीयमानत्वाद् विचारं विनाऽर्थज्ञानानुपपत्तेरध्ययनविधिरेव विचारमपि विधत्ते। स च विचारोऽध्ययनभावनायामितिकर्तव्यतात्वेन सम्बध्यते। तथा च 'अधीत्य स्नायात्' इति विचारविरुद्धं स्मार्तं स्नानं बाधते। बाधोऽपि तत्रैव भवति यस्मिन्नंशे विरोधो भावी। यथा चाहुर्वार्तिककारमिश्राः —

"स्नानोपलक्षिता छात्रनिवृत्तिर्गुरुवेश्मनः।
विरोधित्वेन बाध्येत न तु मध्वादिभक्षणम्।।
तस्माद् गुरुकुले तिष्ठन् मधुमांसाद्यवर्जयन्।
जिज्ञासेताविरुद्धत्वाद्धर्ममित्यवगम्यते"[१]।। इति।

अनेन मीमांसाख्यविचारशास्त्रस्य वैधत्वं सिध्यति। एतत्सर्वं भगवता जैमिनिना 'अथातो धर्मजिज्ञासा' इत्यनेन सूत्रेण प्रतिपादितम्। सूत्रे अथशब्द आनन्तर्यवचनः। अतःशब्दो हेत्वर्थकः। तथा च, अथ साङ्गवेदाध्ययनानन्तरम्। यस्मात् कारणाद् विचारं विना अध्ययनमात्रेण तत्फलं धर्माधर्मरूपमर्थज्ञानं न भवति, तस्मादध्ययनस्यार्थज्ञानरूपदृष्टार्थत्वाद् हेतोर्धर्मजिज्ञासा कर्तव्या। धर्माधर्मज्ञानस्येच्छा कर्तव्या, अर्थादिच्छाया विषयस्तादृशं ज्ञानं सम्पादनीयम्। विचारं विना तादृशज्ञानानुपपत्तेः प्रमाणस्वरूपसाधनफलैर्धर्माधर्मयोर्विचारः कर्तव्य इति जिज्ञासासूत्रस्यार्थः।

अत्राध्ययनस्य जिज्ञासाया हेतुत्व एवानन्तर्यस्य दृष्टार्थता सम्भवति, तथा सति दृष्टार्थकं यदानन्तर्यं तद्वाचिना अथशब्देनैवाध्ययने जिज्ञासाया निमित्तत्वस्य ज्ञानात् 'अतः'शब्दस्य ग्रहणं व्यर्थमेवेति शङ्का जायते। तस्या निराकरणमेवं भवति—

अध्ययने धर्मजिज्ञासायोग्यत्वरूपं कारणत्वमथशब्देन कथितम्। इत्थमधीतवेदो धर्मजिज्ञासाया अधिकारी भवतीत्यथशब्दार्थः। अनुष्ठानयोग्यत्वन्तु 'अतः'शब्द

---

१. श्लोकवार्तिकम्, प्रतिज्ञासूत्रम्, श्लो. १००-१०१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आह। अध्ययनविधेरेव धर्माधर्मविचारस्योत्पादकानुष्ठापकत्वात्। अत एव उभयोरुपादानं सूत्रे कृतं भगवता। भाष्यकृतापि—

''एवमधीतो वेदो धर्मजिज्ञासायां हेतुर्ज्ञातः। अनन्तरं धर्मो जिज्ञासितव्य इति अतःशब्दस्य सामर्थ्यम्''[१] इति।

निष्कर्षः

भूयिष्ठकल्पानां निसर्गत एव व्यामोहोपप्लुतचेतसामुच्चावचकर्मसमासक्तानां नित्येतररागद्वेषासूयोपालम्भाद्यनर्थपरम्पराधरीकृन्निजस्वरूपाणां पाणिगृहीतायां द्रव्यक्रीतायां वा योषिति समुत्पादितानेकसुतवितीर्णमानसयुक्तायुक्तविचारविधुराणां स्वीकृतवृथायासधुराणां कर्तव्यताशून्यापरिश्रमप्राप्तवित्तनिचयप्रपुष्टापघनानां घनानां जनानामुपरि पूर्णकृपाभिव्यक्तलोकोत्तरप्रभावातिशयश्श्रुतो भगवान् निःश्रेयसपरः। अतस्तदुदिताध्वैवाध्वा। तदर्थनिर्णयपरं विचारशास्त्रं तदन्तर्गतमेव। न हि विचारशास्त्रमनधीत्य केवलाक्षरग्रहणमात्रेण दारसङ्ग्रहपुरःसराग्निसम्पादनेऽधिकारी तदनु चोत्तरक्रतुषु। विचारशास्त्रस्य वैधत्वेन तदध्ययनस्यावश्यकर्तव्यता ध्वन्यते, अन्यथा कथङ्कारं निःश्रेयसावाप्तिः। मीमांसाव्यतिरिक्तानि तदङ्गव्यतिरिक्तानि च शास्त्राणि व्युत्पादकमात्राणि भवन्ति। अतस्तत्र तत्त्वाभिनिवेशो न कर्तव्य इति।

●

१. मीमांसाशाबरभाष्यम् - १।१।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायमीमांसामते निर्विकल्पकसमीक्षणम्

ब्रह्मचारी श्रीसमतानन्दः
अनुसन्धाता, न्यायवैशेषिकविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

निर्विकल्पकविज्ञानविषये बहुधा बुधाः।
विवदन्ते यतस्तस्मादयमत्र विविच्यते।।

न्यायमते निर्विकल्पकम्

प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं च। तत्र घटवद् भूतलमिति सविकल्पके ज्ञाने घटे प्रकारताख्यविषयता भूतले विशेष्यताख्यविषयता, संयोगे संसर्गताख्यविषयता वर्तते, तादृशविषयतात्रयनिरूपकं सविकल्पकं ज्ञानं भवति। निर्विकल्पकज्ञाने तत् त्रयमपि नास्ति; किन्तु केवलविषयावगाहित्वम्, अतस्तत्त्रय-भिन्ना चतुर्थी विषयता तत्राङ्गीक्रियते, लक्षणन्तु—'विशेषणविशेष्यसम्बन्धा-नवगाहित्वम्', अथवा विषयेण घटादिना इन्द्रियस्य चक्षुरादेः संयोगानन्तरं प्रथमं जायमानं विशेष्यविशेषणभावानवगाहिसंसर्गानवगाहिजात्यादिस्वरूपावगाहि 'घटघटत्वे'त्याद्याकारकं यदस्ति आलोचनाज्ञानं तदेव निर्विकल्पकम्, तदनु अनुपरतेन्द्रियव्यापारस्य जायमानं विशेष्यविशेषणभावावगाहिसंसर्गावगाहि-घटत्वादिजात्या शुक्लादिगुणेन पाकादिक्रियया दण्डादिद्रव्येण देवदत्तादिनाम्ना विशिष्टो यो घटादिस्तद्विषयकं घटत्वादिघटाद्योर्यद्वैशिष्ट्यं (समवायः) तद्विषयकं च 'घटः' 'शुक्लः' 'पाचकः' 'दण्डी' 'देवदत्तः' इत्याद्याकारकं यज्ज्ञानं तदेव सविकल्पकम्। एतदुभयविधमपि ज्ञानमिन्द्रियार्थसम्प्रयोगजन्यत्वात् प्रत्यक्षम्।

ननु इन्द्रियार्थसम्प्रयोगानन्तरं प्रथमं घटत्वविशिष्टविषयकं 'घटः' इत्याकारकं सविकल्पकमेव ज्ञानं जायतां किमर्थं 'घटघटत्वे'इत्याकारकं निर्विकल्पकं ज्ञानं मध्ये स्वीक्रियत इति चेत्, न, चक्षुःसंयोगानन्तरं 'घटघटत्वे'ति निर्विकल्पकज्ञानं विना विशेषणस्य घटत्वस्य ज्ञानाभावेन 'घटः' इत्याकारिकाया सविकल्पकात्मिकाया

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घटत्वविशिष्टबुद्धेरुत्पत्तुमशक्यत्वाद् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वमिति 'घटघटत्वे'त्याकारकं घटघटत्वयोर्वैशिष्ट्यानवगाहिनिर्विकल्पकात्मकं घटत्वरूप-विशेषणज्ञानं मध्ये अभ्युपेयते, तदनन्तरं सविकल्पकज्ञानं 'घटः' इति विशिष्टबुद्ध्यात्मकं घटत्वरूपविशेषणज्ञानात्मकेन निर्विकल्पकेन जन्यत इति सिद्धान्तेन मध्ये निर्विकल्पकज्ञानस्यावश्यकत्वात्।

नन्वेवं सविकल्पकस्य निर्विकल्पकजन्यत्वाङ्गीकारे इन्द्रियार्थसम्प्रयोग-जन्यत्वाभावेन प्रत्यक्षत्वायोग इति चेत्, न, सविकल्पकोत्पत्तिपर्यन्तमपि इन्द्रियार्थ-सम्प्रयोगस्य वर्तमानतयाऽनन्यथासिद्धतया च सविकल्पकजनकत्वे क्षत्यभावेन सविकल्पकस्यापीन्द्रियार्थसम्प्रयोगजन्यतया प्रत्यक्षत्वसिद्धेः। न हि निर्विकल्पक-जन्यत्वमिन्द्रियार्थसम्प्रयोगजन्यत्वविरोधीत्युभयजन्यत्वस्य सविकल्पके स्वीकारात्। तथा च पारमर्षं सूत्रम्—"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति। इन्द्रियार्थसन्निकर्षोत्पन्नं भ्रमभिन्नं ज्ञानं प्रत्यक्षं तच्च द्विविधम्—अव्यपदेश्यं (निर्विकल्पकं) व्यवसायात्मकं (सविकल्पकं) चेति तदर्थः। अनुमोदयन्ति चामुमर्थं भट्टपादा अपि प्रत्यक्षसूत्रे श्लोकवार्तिके—

अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्।।
ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया।
बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मता[१]।।

ननु विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् सविकल्पकज्ञानजननाय यदि निर्विकल्पकमभ्युपेयते, तर्हि 'घटत्वम्' इत्याकारकतैव तस्य युक्ता, न तु 'घटघटत्वे'त्याकारकता, सविकल्पकोत्पत्तौ विशेषणज्ञानस्यापेक्षितत्वेऽपि विशेष्यज्ञानस्यानपेक्षणात्। न च विशिष्टबुद्धिरूपस्य सविकल्पकस्य जननाय पूर्व-विशेषणज्ञानरूपस्य निर्विकल्पकस्य सत्ताया आवश्यकत्वेन तत्र जातेर्भानमिति जातिभानस्य व्यक्तिभाननियततया व्यक्तेरपि भानमिति वाच्यम्, रजतत्वादिभ्रमे व्यक्तिभानं विना जातिभानानुभवेन जातिभानस्य व्यक्तिभाननियतत्वासिद्धेरिति चेत्, अत्र केचित्—

'घटत्वम्' इत्याकारकमेव निर्विकल्पकम्, न तु विशेष्यविशेषणोभयविषयकं 'घटघटत्वे'त्याकारकम्, अत एव विशेष्यरहितं निर्विकल्पकलक्षणमभिप्रयन्ति

१. श्लोकवार्तिके-११२।१२०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तात्पर्यटीकाकृतः। तथा हि—"तत्राविकल्पकपदमव्यपदेश्यमिति, तत्र व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि, तत्कर्म व्यपदेश्यं विशेष्यमिति यावत्, अविद्यमानं व्यपदेश्यं यस्मिंस्तदव्यपदेश्यं जात्यादिस्वरूपावगाहि, न तु जात्यादीनां मिथो विशेष्यविशेषणभावावगाहीति यावत्"[1] इति वदन्ति।

अन्ये तु तद्विशिष्टबुद्धौ तद्विशेषणज्ञानस्येव तद्विशेष्यकबुद्धौ तद्विशेष्यज्ञानस्यापि हेतुत्वमिति निर्विकल्पके घटत्वादेरिव घटादेरपि भानमावश्यकम्। न च घटत्वादिसामान्यलक्षणाजन्येऽतीतानागतघटादिविशेष्यके ज्ञानेऽतीतघटादेः प्रागज्ञानेन तद्विशेष्यकबुद्धौ तद्विशेष्यज्ञानस्य न हेतुतासम्भव इति वाच्यम्, सामान्यलक्षणायाः स्वाश्रयनिर्विकल्पकजनकत्वाङ्गीकारेण तादृशनिर्विकल्पकोत्तरं घटत्वादिसामान्यलक्षणया घटत्वादिप्रकारकघटादिविशेष्यकज्ञानजननेनोक्तव्यभिचाराभावादिति वदन्ति।

परे तु तद्विशेष्यकबुद्धौ तद्विशेष्यज्ञानस्य हेतुत्वे मानाभावः। न चान्वयव्यतिरेकाभ्यां तद्धेतुत्वमिति वाच्यम्, विशेष्येन्द्रियसन्निकर्षादेरेव तद्विशेष्यकज्ञानहेतुत्वसम्भवेन विशेष्यज्ञानान्वयव्यतिरेकयोरन्यथासिद्धत्वात्। न चैवं तद्विशिष्टबुद्धौ तद्विशेषणज्ञानस्यापि हेतुत्वं न स्यात्, विशेषणेन्द्रियसन्निकर्षादेरेव तद्विशेषणकज्ञानहेतुत्वसम्भवेन विशेषणज्ञानान्वयव्यतिरेकयोरन्यथासिद्धत्वादिति वाच्यम्, 'जातिमान्' इत्याद्याकारकघटत्वादिप्रकारकज्ञानीयजातित्वावच्छिन्नघटत्वप्रकारतापेक्षया 'घटः' इत्याकारकज्ञानीयजातित्वावच्छिन्नघटत्वप्रकारतापेक्षया 'घटः' इत्याकारकज्ञानीयनिरवच्छिन्नघटत्वप्रकारताविलक्षणेत्यनुभवसिद्धम्, सा च प्रकारता न घटत्वप्रकारकज्ञानसामग्रीनियम्या, 'जातिमान्' इत्याकारकस्य घटत्वादिप्रत्यक्षस्य विलोपापत्तेः। नापि घटत्वांशे किञ्चित्प्रकारकज्ञानसामग्र्यसमवहितघटत्वप्रकारकज्ञानसामग्रीनियम्या 'जातिमान् घटः' इत्याकारकद्विविधघटत्वादिप्रकारताशालिप्रत्यक्षविलोपापत्तेरतो निरवच्छिन्नघटत्वप्रकारताशालिबुद्धौ निरवच्छिन्नघटत्वविषयकज्ञानस्य हेतुत्वम्, सावच्छिन्नघटत्वप्रकारताशालिबुद्धौ च सावच्छिन्नघटत्वविषयकज्ञानस्य हेतुत्वमभ्युपेयमिति विशेषणज्ञानान्वयव्यतिरेकयोरावश्यकत्वेनान्यथासिद्धत्वाभावात्। न च विशिष्टस्मरणे विशेषणज्ञानहेतुताया व्यभिचारः, विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य हेतुतोपगमेन व्यभिचाराभावात्। एवञ्च निर्विकल्पके

---

१. तात्पर्यटीकायाम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यक्तिभानं ससम्बन्धिकपदार्थप्रत्यक्षे सम्बन्धिज्ञानस्य हेतुतानुरोधाज्जातेरिव व्यक्तेरपि समवायसम्बन्धित्वात्, अन्यथा सविकल्पकं समवायविषयकं न स्यादिति वदन्ति।

ननु निर्विकल्पके जातिव्यक्त्योर्भानमिव तयोः समवायस्यापि भानमस्तु, तद्भानप्रयोजकेन्द्रियसन्निकर्षस्य सत्त्वादिति चेत्, अत्र केचित् ससम्बन्धिक-पदार्थप्रत्यक्षे सम्बन्धिज्ञानस्य हेतुताया समवायस्य ससम्बन्धिकतया निर्विकल्पके भानायोगनिर्विकल्पकात्पूर्वं सम्बन्धिज्ञानरूपस्य कारणस्याभावादिति वदन्ति।

अन्ये तु ज्ञानादिरूपससम्बन्धिकपदार्थप्रत्यक्ष एव सम्बन्धिज्ञानस्य हेतुत्वम्, न तु समवायादिरूपसम्बन्धिकपदार्थप्रत्यक्षे, तथा च निर्विकल्पके जाति-व्यक्त्योरिव समवायस्यापि भानम्, अत एव निर्विकल्पकस्याप्युपनायकतया तस्मात्समवायोपनीतभानम्, निर्विकल्पके व्यक्तिभानादेव च तस्माद्-व्यक्त्युपनीतभानमिति प्राहुः।

तत्र सविकल्पकज्ञानं 'घटमहं जानामि' इत्यनुव्यवसायात्मकप्रत्यक्ष-सिद्धम्, निर्विकल्पकं त्वतीन्द्रियम्, ''ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रिय-मिष्यते'' इत्युक्तेः कारिकायाम्। न च 'घटमहं जानामि' इत्यनुव्यवसायेन निर्विकल्पकमपि प्रत्यक्षीक्रियतामिति वाच्यम्, 'घटमहं जानामि' इत्यनुव्यवसा-यस्य घटत्वविशिष्टवैशिष्ट्यज्ञानात्मकतया निर्विकल्पकानन्तरमुत्पत्तुम-शक्यत्वात्, विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वात्, निर्विकल्पके च घटत्वस्याप्रकारत्वात्, सविकल्पके तु घटत्वस्य प्रकारतया तदनन्तरं घटमहं जानामीत्यनुव्यसायस्योत्पत्तेः सविकल्पकस्य प्रत्यक्षसिद्धत्वम्। न च 'घटमहं जानामि' इत्यनुव्यवसाये शुद्धस्यैव ज्ञाने वैशिष्ट्यम्, न तु घटत्वविशिष्टघटस्य, तथा चानुव्यवसायस्य घटत्वविशिष्टज्ञानात्मकतया तत्र विशेषणतावच्छेदक प्रकारकज्ञानस्य कारणत्वायोगात् निर्विकल्पकानन्तरमपि 'घटमहं जानामि' इत्यनुव्यवसायः सम्भवतीति। निर्विकल्पकस्यापि प्रत्यक्ष-सिद्धमिति वाच्यम्, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य यत्किञ्चिद्धर्म-प्रकारकत्वनियमेन ज्ञाने शुद्धघटस्य विशेषणत्वायोगेनानुव्यवसायस्य विशिष्टवैशिष्ट्यज्ञानात्मकतया निर्विकल्पकोत्तरमुत्पत्तुमशक्यतया निर्विकल्पकस्य प्रत्यक्षसिद्धत्वाभावात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मीमांसामतम्

वेदलोकोभयोपकारि शास्त्रमिदं सर्वत्र प्रसारयितुकामा महर्षिजैमिन्याचार्य-शबरस्वामिप्रभृतयो महाभागाः सूत्रभाष्यादिग्रन्थानरीरचन्। ते चातिगहना दुर्विगाहाः। इतस्ततः परिशीलनेनावगम्यते शाबरादपि भाष्यात् पूर्वतनानि कानिचन भाष्याणि मीमांसासूत्राणामासन्नित्यभ्यूहितुमस्त्यवकाशः। परं तानि न कुत्राप्युपलभ्यन्ते नामतो रूपतो वा। शाबरं भाष्यं व्याख्यातं श्रीकुमारिलभट्टपादैः प्रभाकरमिश्रैश्च। उभयेषाममीषां परस्परं विभिन्नैव रीतिरासीद् भाष्यविवरणविधौ।

उभयेऽपि स्वतन्त्रप्रज्ञाविचारचतुरा विवेचननिपुणाश्चासन्, अतो मतद्वयमेव प्रवृत्तं भाट्टं प्राभाकरं चेति।

उभौ प्रत्यक्षं तावद्द्विविधं निर्विकल्पकं सविकल्पकं च स्वीकुरुतः। भाट्टास्तु विषयतासम्बन्धेन प्रत्यक्षं प्रति निष्प्रकारकज्ञानत्वेन प्रतिबन्धकत्वकल्पने गौरवेण लाघवाद् ज्ञानत्वेनैव प्रतिबन्धकत्वं कल्प्यते, तथा च किमपि ज्ञानं न प्रत्यक्षसिद्धं किन्तु ज्ञानजन्यज्ञातताप्रत्यक्षतया ज्ञानमनुमीयत इति वदन्ति। एतन्मतेऽपि 'घटघटत्वे'त्याकारकमेव निर्विकल्पकं 'सम्बद्धं वर्तमानं वा गृह्यते चक्षुरादिना। सामान्यं वा विशेषो वा' इति भट्टपादोक्तेः। अत्र न्यायरत्नाकरः—"सौगतैर्विशेष-विषयकत्वं वेदान्त्यादिभिः सामान्यविषयकत्वमुक्तं प्रत्यक्षस्य, तदुभयमपि नास्मदभिमतं किन्तु योग्यं सम्बद्धं वर्तमानं च सामान्यं विशेषो वा तत्सर्वं ग्राह्यम्" इति। न च—

न विशेषो न सामान्यं तदानीमनुभूयते।
तयोराधारभूता तु व्यक्तिरेवावसीयते।।

इति भट्टपादोक्त्या तयोर्न भानं निर्विकल्पके इति वाच्यम्, "विशेषो व्यावृत्तिः, सामान्यमनुवृत्तिः, अनुवृत्तिव्यावृत्ती निर्विकल्पके न भासेते, तयोस्त्वा-धारभूतमनुभूतमनुवृत्तं व्यावृत्तं च यज्जातिव्यक्त्यादिवस्तु तत्तदाकारसंयुक्तं सम्मुग्धं सर्वमवसीयते" इति न्यायरत्नाकरेणैव समाहितत्वात्।

केचित्तु सविकल्पकमेव प्रत्यक्षं न निर्विकल्पकमिति वदन्ति। अत्र न्यायकन्दलीकाराः—"यदि हि वस्तुस्वरूपस्य निर्विकल्पकेन ग्रहणं नेष्यते तदा तद् वाचकशब्दस्य स्मृत्यभावात् सविकल्पकमपि न स्यात्। अतः सविकल्पक-मिच्छता निर्विकल्पकमप्येषितव्यम्। तच्च न सामान्यमात्रं गृह्णाति, भेदस्यापि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिभासनात्, नापि स्वलक्षणमात्रं सामान्याकारस्यापि संवेदनात्, व्यक्त्यन्तरदर्शने प्रतिसन्धानाच्च, किन्तु सामान्यं विशेषं चोभयमपि गृह्णाति। यदि परमिदं सामान्यमयं विशेष इति विविच्य न प्रत्येति वस्त्वन्तरानुसन्धानविरहात्। पिण्डान्तरानुवृत्तिग्रहणाद्धि सामान्यं विविच्यते। व्यावृत्तिग्रहणाद्विशेषोऽयमिति विवेकः। निर्विकल्पकदशायां च पिण्डान्तरानुसन्धानाभावात् सामान्यविशेषयोरनुवृत्तिव्यावृत्ती धर्मौ न गृह्येते। तयोरग्रहणान्न विविच्य ग्रहणम्, स्वरूपग्रहणं तु भवत्येव, तस्यान्यानपेक्षत्वात्। अत एव निर्विकल्पकेन सामान्यविशेषस्वलक्षणानां न विशेष्यविशेषणभावानुगमः। तस्य भेदावगतिपूर्वकत्वात्, निर्विकल्पकेन च सामान्यादीनां परस्परभेदानध्यवसायात्, अतः परं सविकल्पकं सामान्यविशेषरूपतां प्रत्येति पिण्डान्तरानुसन्धानस्यात्मनोऽनुवृत्तिव्यावृत्ती धर्मौ प्रतिपद्यमानस्येन्द्रियद्वारेण तथा प्रतीत्युपपत्तेः'' इति।

बौद्धास्तु स्वलक्षणान्वयव्यतिरेकानुविधायिप्रतिभासं निर्विकल्पकं वस्तुन्यभ्रान्तमतस्तदेव प्रत्यक्षं न सविकल्पकं तस्य वस्त्वन्तरानुरोधिप्रतिभासस्य केशादिज्ञानवद्वस्तुनि भ्रान्तत्वात्। न च घटोऽयमिति सविकल्पके कम्बुग्रीवात्मा सर्वतो व्यावृत्तः पदार्थोऽनुभूयत इति कथं तस्य भ्रान्ततेति वाच्यम्, यः क्षणः प्रत्यक्षेण गृह्यते नासौ विकल्पेनाध्यवसीयते, यश्च विकल्पेनाध्यसीयते न स प्रवृत्त्या लभ्यत इति क्षणापेक्षया संवादाभावस्तेषां क्षणिकत्वात्; किन्तु यादृशः क्षणः प्रत्यक्षेण गृह्यते तादृशो विकल्पेनाध्यवसीयते, तादृशश्च प्रवृत्त्या लभ्यत इत्यनाकलितक्षणभेदस्यातद्व्यावृत्तवस्तुमात्रापेक्षया संवादः, तत्र च विकल्पो गृहीतग्राहित्वादप्रमाणम्। किञ्च, 'कल्पनापोढं प्रत्यक्षम्' इति दिङ्नागीयं प्रत्यक्षलक्षणवाक्यं कल्पनाज्ञानं तु सविकल्पकं तच्च नार्थे प्रमाणं तेन शब्दाकारोपरक्तार्थग्रहणात्। किञ्च, सौगताः स्वलक्षणमेव परमार्थं मन्यमाना न सामान्यं मन्यन्ते। तथा हि—

''पृथक्त्वे व्यक्तितो जातिर्दृश्यते पृथगेव सा।
अभेदे व्यक्तिमात्रं स्याद्द्वेधा चेन्न विरोधतः।।
नायाति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः''।। इति।

तथा च सामान्यस्य वस्तुभूतस्याभावात् तद्विशिष्टग्राहितया सविकल्पकस्य भ्रान्तत्वमिति वदन्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैयाकरणास्तु निर्विकल्पके संज्ञावैशिष्ट्यभानेऽपि संज्ञाभानमस्त्येव, सर्वेषामर्थानां नामधेयात्मकत्वादिति संज्ञाविशिष्टसंज्ञादिसविकल्पकेषु जातेरिव शब्दस्यापि विशेषणत्वम्, एवञ्च ज्ञानमात्रे शब्दभानम्।

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"।।

इति हर्युक्तेरिति वदन्ति।

विशिष्टाद्वैतवादिनस्तु प्रत्यक्षं निर्विकल्पकसविकल्पकभेदेन द्विविधम्। निर्विकल्पकं नाम गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणम्, सविकल्पकं सप्रत्यवमर्शगुणसंस्थानादिविशिष्टद्वितीयादिपिण्डग्रहणम्। उभयविधमप्येतद्विशिष्टविषयमेव। तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते। द्वितीयादिपिण्डेष्वेवानुवृत्तिप्रतीतिः, प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादिपिण्डग्रहणस्य सविकल्पकत्वम्, संस्थानादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वमिति वदन्ति।

तदयं निष्कर्षः—तार्किकभाट्टप्राभाकरमते निर्विकल्पकं विशेष्यविशेषणभावानवगाहि 'घटघटत्वे'त्याकारकं जायते, तदानीं च वस्त्वन्तरानुसन्धानशून्यतया तयोरनुवृत्ताकारता व्यावृत्ताकारता च न प्रतीयते, सविकल्पके तु तयोरनुवृत्ताकारता व्यावृत्ताकारता च प्रतीयते विशेष्यविशेषणभावश्च भवति।

वैयाकरणमते तु निर्विकल्पके शब्दोऽपि भासते, अन्यत् सर्वं तार्किकमतवत्। विशिष्टाद्वैतमते तु निर्विकल्पकेऽपि विशेष्यविशेषणभावो भवति, जातिव्यक्त्योरनुवृत्तव्यावृत्ताकारत्वे तु तदानीं न प्रतीयते, बौद्धमते तु निर्विकल्पके विशेष एव भासते, सामान्यं त्वनुमेयं न प्रत्यक्षम्, तन्मते निर्विकल्पकस्यैव प्रत्यक्षत्वादिति।

इदं त्ववधेयम्—तार्किकमते संस्थानातिरिक्तं सामान्यम्, विशिष्टाद्वैतिमते संस्थानमेव सामान्यम्, "संस्थानरूपजात्यादेरग्रहणात्" इति श्रीभाष्यात्। भाट्टमते यद्यपि संस्थानबोधकाकृतिशब्देन जातिरुच्यते, तथापि न सा संस्थानरूपा।

"जातिमेवाकृतिं प्राहुर्व्यक्तिराक्रियते यया।
सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम्"।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति भट्टपादोक्तेः परन्तु एतन्मते जातिव्यक्त्योर्भिन्नाभिन्नत्वम्। प्रभाकरमते तार्किकमतमिव जातिर्व्यक्तितो भिन्ना, परन्तु द्रव्यमात्रसमवेता न गुणादिषु सा चानुगतसंस्थानव्यङ्ग्या, बौद्धमते अपोह गवेतरव्यावृत्तिरेव गोत्वादिजातिर्न सामान्यम्। केचित्तु सादृश्यमेव सामान्यं प्रतिपेदिरे। ब्रह्मैव महासत्ताख्या जातिः। सम्बन्धिभेदात् सत्तैव विद्यमाना जातिरिति ''सा नित्या सा महानात्मा तामाहुस्त्वतलादयः'' इति हर्युक्तेरिति परे। कतरच्चैषां युक्तमिति सत्यवसरे निरूपयिष्याम इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दस्य प्रमाणान्तरत्वसाधनम्

श्रीविष्णुपदमहापात्रः
अनुसन्धाता, न्यायवैशेषिकविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

'मानाधीना मेयसिद्धिर्भवति' इति सर्वैरपि दार्शनिकैरभ्युपेयते। तत्र प्रमाकरणं प्रमाणं भवति, एतद्विषये कस्यापि दार्शनिकस्य कश्चन विवादो नास्ति; परन्तु प्रमाणसंख्याविषये दार्शनिकानां परस्परं महान् मतभेदो दृश्यते। तत्र केवलं प्रत्यक्षमेव प्रमाणमिति चार्वाकाः, प्रत्यक्षानुमाने द्वे प्रमाणे इति कणादमतानुसारिणः। प्रत्यक्षानुमानशब्दास्त्रीणि प्रमाणानीति **सांख्याचार्याः**। एवं प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षट्संख्याकाः प्रमाणानि भवन्तीति **मीमांसकाः**। तत्र अक्षपादमतावलम्बिनः प्रत्यक्षानुमानोपमानशब्दात्मकानि चत्वारि प्रमाणानि सन्तीत्येवं प्रतिपादयन्ति। तादृशप्रमाणेष्वन्यतमः शब्दः प्रमाणचतुष्टयान्तर्भावः। शब्दाज्जायमानः शाब्दबोध इन्द्रियार्थसन्निकर्षाजन्यत्वाद् नहि प्रत्यक्षात्मकः। अथ च व्याप्तिज्ञानसादृश्यज्ञानाभ्यामजन्यत्वाद्, न ह्यन्वयबोधस्यानुमित्युपमित्यन्तर्गतत्वं प्रतिपादयितुं शक्यते। अत इयं शाब्दबोधात्मिका पदज्ञानाधीनपदार्थोपस्थितिजन्या प्रमा प्रत्यक्षादिप्रमाव्यतिरिक्तैव अभ्युपेया, यतः घटोऽस्ति घटमानयेत्यादिसाकाङ्क्षशब्दैः स्वस्ववृत्त्या पदार्थोपस्थित्यनन्तरं घटादावस्तित्वादेरन्वयावगाही विलक्षणबोधो जायते। स च बोधः प्रत्यक्षाद्यतिरिक्तः, यतो हि प्रत्यक्षादौ पदानुपस्थाप्या एव पदार्था भासन्ते। शाब्दबोधे च पदानुपस्थाप्यानां पदार्थानां भानं न भवति; किन्तु तत्र पदोपस्थाप्या एव पदार्था भासन्ते, अतः प्रत्यक्षादिप्रमाभिर्भिन्नैव शाब्दबोधीया प्रमा स्वीकर्तव्या। तादृशप्रमाकरणत्वेन शब्दस्यापि प्रत्यक्षादिप्रमाणातिरिक्तत्वं स्वीकार्यम्। उक्तञ्च जगदीशतर्कालङ्कारैः—

> साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
> सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा[१]।।

---

१. श.श.प्र., का.सं० २।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शाब्दीप्रमायाः स्मृत्यनन्तर्भावत्वप्रतिपादनम्

ननु केनापि सम्प्रदायविशिष्टेनोच्यते—पदज्ञानाधीनपदार्थोपस्थित्यनन्तरं तत्तदर्थविषयकसंसर्गावगाहियादृशबोधो भवति, तदनन्तरं 'तद्विषयकं शाब्दयामि' इत्याकारकानुव्यवसायस्य दर्शनाद् अन्वयबोधस्य विशिष्टबुद्धित्वाच्च तादृशबोधे शाब्दत्वात्मकवैजात्यस्य स्वीकारापेक्षया अन्वयबोधस्मृतिस्वीकारे न कश्चन दोषः सम्भाव्यते। यतो विनिगमनाविरहात् पूर्वानुभूतपदार्थस्मरणं विना विजातीयान्वयबोधस्य नैवोत्पत्तिरिति यथा अन्वयवादीनामभिप्रेतम्, तथैव वृत्तिविशिष्टपदज्ञानरूपोद्बोधकद्वारा उद्बुद्धो यो हि संस्कारस्तादृशसंस्कारवशाद् अस्तित्वप्रकारकगोविशेष्यकबुद्धेरुत्पत्तिदर्शनाच्च शाब्दत्वस्य स्मृतित्वमिति चेत्, न, यतो हि स्मृतेः संस्कारमात्रजन्यत्वात्[1] शाब्दबोधस्य च वृत्तिज्ञानाधीनपदार्थोपस्थितिकारणकत्वाच्च शाब्दी प्रमा स्मृत्याद्यतिरिक्ता। एवञ्च तत्प्रकारकतद्विशेष्यकस्मृतित्वावच्छिन्नं प्रति तत्प्रकारकतद्विशेष्यकसंस्कारस्य कारणत्वम्। शाब्दबोधं प्रति तद्विलक्षणकारणसापेक्षतया शाब्दी प्रमा नैव स्मृतिः। प्रतिपादितञ्च जगदीशाचार्यैः—

"न चासौ स्मृतिः समानाकारसंस्काराप्रभवत्वात्"[2]।

अभिप्रायस्तु—गौरस्ति इत्यत्र ज्ञायमानसाकाङ्क्षपदसमूहात्मकवाक्यज्ञानाद् यादृशविलक्षणबोधस्योत्पत्तिस्तादृशबोधो नैव स्मृतिः। यतोऽस्तित्वप्रकारकगोविशेष्यकस्मरणं प्रति अस्तित्वप्रकारकगोविशेष्यकसंस्कारस्य कारणसापेक्षत्वम्, एवञ्च तादृशस्थलीयशाब्दबुद्धित्वावच्छिन्नस्य प्राग् अस्तित्वप्रकारकगोविशेष्यकसंस्कारस्य नियमतो नैव सापेक्षत्वम्। अनुसन्धत्ते चेद् वृत्तिविशिष्टपदज्ञानानन्तरं सत्यां विशकलितपदार्थोपस्थितावस्तित्वादिप्रकारकगवादिविशेष्यकान्वयबोधः। तादृशान्वयबोधस्य प्राक्क्षणावच्छेदेनास्तित्वविशिष्टगोविषयकसंस्काराभावाद् नहि शाब्दत्वस्य स्मृतित्वमिति।

शाब्दीप्रमाया औपनायिकप्रत्यक्षातिरिक्तत्वस्थापनम्

नव्यन्याये लौकिकालौकिकभेदेन द्विविधं प्रत्यक्षं स्वीकृतमस्ति, लौकिकसन्निकर्षजन्यप्रत्यक्षं लौकिकप्रत्यक्षम्। अलौकिकसन्निकर्षजन्यप्रत्यक्षमलौकिकप्रत्यक्षम्। सामान्यलक्षणज्ञानलक्षणयोगजभेदेनालौकिकसन्निकर्षस्त्रिविधः[3]। सन्निकर्षः प्रत्यासत्तिशब्देन व्यपदिष्टः।

---

१. संस्कारमात्रजन्यं ज्ञानं स्मृतिः तर्कसंग्रहे।

२. शब्दशक्तिप्रकाशिकायाम्।

३. अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा।। (न्या.सि.मु.)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामान्यलक्षणप्रत्यासत्त्या तद्धर्मपुरस्कारेण तद्धर्माश्रयनिखिलवस्तुनोऽलौकिकप्रत्यक्षं भवति[१]। यथा आदावेकस्मिन् घटे घटत्वप्रकारकघटविशेष्यकसविकल्पकचाक्षुषप्रत्यक्षानन्तरमुक्तचाक्षुषप्रत्यक्षे घटत्वस्वरूपया घटत्वज्ञानस्वरूपया वा सामान्यलक्षणप्रत्यासत्त्या घटत्वाश्रयीभूतानां यावतीयघटानां सामान्यलक्षणप्रत्यासत्तिजनितालौकिकप्रत्यक्षं भवति।

ज्ञानलक्षणसन्निकर्षस्तु सामान्यलक्षणसन्निकर्षाद्भिन्नः। यत आश्रयविषयकज्ञानस्योत्पत्तिरेव सामान्यलक्षणसन्निकर्षस्य फलम्। ज्ञानलक्षणक्षेत्रे च तत्प्रकारकज्ञानस्य स्थलविशेषे तद्विशेष्यकज्ञानस्योत्पत्तिरेव वा फलम्। तल्लक्षणञ्च—

"विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः"[२]।

तथा चालौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति विषयतासम्बन्धेन ज्ञानलक्षणाप्रत्यासत्तेर्हेतुत्वम्[३]। यथा—'सुरभि चन्दनम्' इत्यत्र चन्दनांशे चक्षुसंयोगानन्तरं यथा चन्दनखण्डस्य चाक्षुषप्रत्यक्षं भवति, तथैव चन्दनांशे विशेषणीभूतसौरभस्य सौरभांशे विशेषणीभूतस्य सौरभत्वस्य वा लौकिकचाक्षुषप्रत्यक्षायोग्यत्वेऽपि चाक्षुषप्रत्यक्षं प्राक् सौरभत्वप्रकारेण सौरभोपस्थित्यात्मकज्ञानलक्षणाया विद्यमानत्वात् सौरभांशे सौरभत्वस्य चन्दनांशे सौरभस्य च ज्ञानलक्षणसन्निकर्षजनितालौकिकचाक्षुषप्रत्यक्षं भवति।

तथा च प्रकृतेऽपि साकाङ्क्षैः पदैरुपस्थितस्य पदार्थस्य ज्ञानलक्षणसन्निकर्षवशाद् उपनीतमानत्वात्मकं यदस्तित्वविशिष्टगोविशेष्यकज्ञानं तादृशज्ञानस्य तत्प्रकारकतद्विशेष्यकावगाहित्वाच्छाब्दबोधातिरिक्तज्ञानलक्षणमलौकिकप्रत्यक्षं स्यादिति वाच्यम्, तन्न युक्तियुक्तम्, यतो यदि शाब्दबोधं ज्ञानलक्षणात्मकालौकिकप्रत्यक्षमभ्युपेयते चेत्, तर्हि पदजन्यपदार्थोपस्थितेर्यथा शााब्दबोधे भानम्, तथैवानुमानप्रमाणादिसामग्र्याः पदार्थोपस्थितिस्वरूपज्ञानलक्षणासन्निकर्षजनितोपनीतपदार्थान्तरमपि शाब्दबोधस्य विषयः स्यात्। अथवा शाब्दबोधस्य कारणीभूतैः साकाङ्क्षादिपदैरुपस्थापितस्यार्थस्य औपनायिकप्रत्यक्षे भानं स्यात्। अथवा शाब्दबोधालौकिकप्रत्यक्षकारणाद्यतिरिक्तसामग्र्याः पदार्थोपस्थितेरपि औपनायिकप्रत्यक्षे भानं स्यात्, न चैवमिष्टापत्तिः, यतो हि साकाङ्क्षादिपदैरुपस्थापितानामेव पदार्थानां शाब्दबोधे विषयत्वमिति सर्वानुभवसिद्धम्, प्रकाशितञ्च जगदीशेन—

---

१. आसत्तिराश्रयाणां............सामग्र्यपेक्षते। (न्या.सि.मु.)

२. कारिकावली, पृ०२१४।

३. श.श.प्र.,पृ.६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'औपनायिकप्रत्यक्षे आकाङ्क्षादीनामुपयोगो नास्ति'[१]।

केनापि प्रकारेण प्रकारान्तरैरुपस्थापितानां पदार्थानां शाब्दबोधविषयत्वे सर्वानुभवसिद्धस्य विरोधः, विरोधे च प्रमाणाभावाच्छब्दोपनीतपदार्थमवलम्ब्य यथा शब्दानुव्यवसायसम्मतिः, तथैव शब्दातिरिक्तसामग्र्योपस्थितपदार्थमवलम्ब्य शब्दानुव्यवसायस्यापत्तिः स्यात्, तद्वारणाय यद्युच्यते—प्रकारान्तरेणोपस्थितस्यार्थस्य शाब्दधीर्विषयत्वेऽपि न तत्तदर्थविषयकत्वेन शाब्दबोधस्यानुव्यवसायस्तत्तदर्थविषयकशाब्दबोधस्यानुव्यवसायत्वावच्छिन्नं प्रति तत्तदर्थसाकाङ्क्षपदजन्यशाब्दत्वेन हेतुत्वान्तरस्य वाच्यत्वात्, प्रामाणिकत्वाच्च फलमुखगौरवस्य अदोषत्वेऽपि व्यभिचारापत्तिः। यथा—'जलाहरणं न छिद्रघटकरणम्' इत्येवमितरबाधनिश्चयदशायां घटेन जलमाहरेदित्यादिवाक्यजन्यस्य छिद्रान्यघटेन जलाहरणं कार्यमित्यन्वयबोधस्य छिद्रेतरत्वार्थकपदाजन्यत्वेऽपि छिद्रेतरत्वावगाहित्वेन तदनुव्यवसायोत्पत्त्या व्यभिचारः। कारणस्य कार्याधिकरणनिरूपितवृत्त्यभावप्रतियोगित्वाद् निरुक्तव्यभिचारग्रहस्य व्यापकत्वघटितकारणत्वग्रहस्य प्रतिबन्धकत्वम्, अत एतादृशकार्यकारणभावो नाभ्युपेय इति चेत्, न, तादृशकार्यकारणभावस्वीकारेऽपि न काचन विप्रतिपत्तिः। यतः 'पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वतीयवह्नीतरवह्न्यभाववत्पर्वतो वह्निव्याप्यधूमवांश्चेत्याकारकबाधसहकृतसामान्यपरामर्शाद् वह्निसामान्यानुमित्यभावत्वेऽपि येन प्रकारेण पर्वते पर्वतीयवह्निमात्रस्यानुमितिर्भवति, तेनैव प्रकारेण प्रकृतस्थलेऽपि 'घटेन जलमाहर' इत्यत्र साकाङ्क्षपदज्ञानाद् घटस्य कारणत्वस्य जलस्य कर्मत्वस्याहरणस्य कृतिरूपस्य च पदार्थसमूहानामुपस्थितिकाले 'सच्छिद्रो घटो जलाहरणायोग्यः' 'जलाहरणं न सच्छिद्रघटकरणकं वा' इत्याकारकायोग्यताज्ञानात्मकबाधनिश्चयस्य सत्त्वेऽपि छिद्रेतरघटकरणकजलाहरणविषयकशाब्दबोधो भवति। तदनन्तरं च तादृशशाब्दबोधमवलम्ब्यानुव्यवसायो भवत्येवेति सिद्धान्तितम्।

एवञ्च 'गौरस्ति' इत्यस्माद् वाक्याद् जायमानस्य अस्तित्वप्रकारकगोविशेष्यकबोधस्य यदि साक्षात्कारत्वमभ्युपेयते, तर्हि तादृशतत्तदर्थविषयकसंसर्गावगाहिबोधानन्तरम् 'अस्तित्वेन गां साक्षात्करोमि' इत्याकारकानुव्यवसायः स्यात्। तादृशानुभवस्य लोकविरुद्धत्वात् तत्तदर्थविषयकसंसर्गावगाहिबोधानन्तरं 'अस्तित्वेन गां शाब्दयामि' 'अस्तित्वेन गौः श्रुतः' 'गौरस्ति' इति वाक्याद् एतादृशानुव्यवसायस्य दर्शनात् सर्ववादिसम्मतत्वाच्च साक्षात्कारापेक्षया शाब्दीप्रमाया विलक्षणत्वं सिद्धम्।

---

१. श.श.प्र,पृ.६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यच्च 'उपनीतयोर्विशेषणविशेष्यभावस्य कामचारात्'[१] इति नियमानुरोधाद् उपनीतभाने 'सुरभिचन्दनम्' इत्यस्मिन् ज्ञानान्तर्गतचन्दनांशे सौरभस्य विशेषणत्वम्, 'चन्दने सौरभम्' इत्यस्मिन् ज्ञानान्तर्गतचन्दनांशे सौरभस्य विशेष्यत्वं भवति, तथैव प्रकृतेऽपि 'गौरस्ति' इत्यत्र शाब्दबोधस्य प्रत्यक्षत्वे गौरस्तितावानितिवद् अस्तित्वं गवीयमित्यपि अस्तित्वप्रकारकगोविशेष्यक इव गो-प्रकारकास्तित्वविशेष्यकप्रत्यक्षं स्यात्, तन्न भवति, लोकविरुद्धत्वात्। अतः शाब्दबोधस्यातिरिक्तप्रमात्वं सिद्धम्।

बौद्धदिशा शब्दस्यानुमानेऽन्तर्भावत्वकथनम्

प्रत्यक्षानुमानप्रमाणद्वयाभ्युपगम्यमाना बौद्धा वैशेषिकाश्च सन्ति, तन्मध्ये बौद्धाः प्रवदन्ति शब्दप्रमाणस्य अनुमानातिरिक्तप्रमाणत्वं नास्ति, अनुमानेऽन्तर्भावात्। शब्दज्ञानस्य बाध्यविषयेण सह सङ्गतिरस्तीत्युच्यते चेत्, शब्दार्थयोः कश्चन सम्बन्धः स्वीकर्तव्यः। शब्दार्थयोरत्यन्तभेदेन प्रतिभासमानत्वात् शब्दार्थयोस्तादात्म्यसम्बन्धो भवितुं नार्हति, उभयोर्मध्येऽन्वयव्यतिरेकाभावात् तदुत्पत्तिसम्बन्धोऽपि भवितुं नैव शक्यते। उक्तञ्च—'तत्र न तावत्तादात्म्यं शब्दार्थयोरत्यन्तभेदेन प्रतिभासनात्, नापि तदुत्पत्तिरन्वयव्यतिरेकाभावात्'[२]।

वैशेषिकमतोपस्थापनम्

शब्दस्यानुमानान्तर्गततया न पृथक् प्रामाण्यमपि तु प्रत्यक्षानुमानञ्चेति द्वे प्रमाणे स्त इति प्रमाणद्वयं वैशेषिका अभ्युपगच्छन्ति—

'शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते।
अनुमानगतार्थत्वादिति वैशेषिकं मतम्'[३]।।

यथा पक्षधर्मताज्ञानव्याप्तिस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानम्, तथा समानविधित्वाच्छब्दादिभ्योऽप्यनुमानमेव, तावद्धि शब्दो नार्थं प्रतिपादयति, यावदयमस्याव्यभिचारीत्येवं नावगम्यते, ज्ञाते त्वव्यभिचारे प्रतिपादयन् धूम इव लिङ्गं स्यात्, तथा च प्रयोगः—'शब्दोऽनुमानम्, व्याप्तिबलेनार्थप्रतिपादकत्वाद् धूमवत्'[४]। उक्तञ्च—'शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वात्, यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपीति'[५]।

---

१. कृष्णकान्ती, पृ.६; २. बौ.त.भाषा।
३. न्या.सि.मु.; ४. न्या.क.; ५. वै.भाष्य., श.प्र.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायसूत्रकारेण भगवता गौतमेन 'आप्तोपदेशः शब्दः'[1] इति शब्दप्रमाणस्य लक्षणं यत्प्रतिपादितं तत्सर्वथा अरुचिकरमिति प्रत्यपादि वैशेषिकैः। यतो वाक्यार्थस्यानुमेयत्वाच्छब्दस्यानुमानविशेषत्वम्। शब्दार्थस्य कथमनुमेयत्व-मित्युच्यते चेत्, यथा अप्रत्यक्षसाध्यस्य वह्नेर्ज्ञातेन लिङ्गेन धूमेन पश्चान्मीयत इत्यनुमानं तथैवानुपलभ्यमानस्यार्थस्य ज्ञातेन शब्दलिङ्गेन पश्चान्मीयत इत्यतोऽ-नुमानं शब्दः। यथोक्तम्—

'शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्'[2]।

तात्पर्यस्तु—प्रत्यक्षाप्रत्यक्षेति द्विविधाऽनुभूतिः, परोक्षविषयकबोधोऽ-नुमितिरेव, यथा 'गौरस्ति' एतद्वाक्याधीनः 'अस्तित्वविशिष्टगौरिति' वाक्यार्थबोधो भवति, तस्य विषयोऽस्तित्वविशिष्टगौरिति। एतस्मिन् वाक्यार्थबोधे बोधयितृ-परोक्षसम्बन्धो दरीदृश्यते। अतः प्रत्यक्षेणानुपलभ्यमानत्वादनुमानेन तादृशबोधस्य च दर्शनाद् वाक्यार्थोऽनुमेय इति न्यायवार्तिककारः, प्रत्यक्षेणानुप-लभ्यमानार्थत्वादिति[3]।

शब्दानुमानयोरुपलब्धे एकप्रकारत्वात् समानविधित्वाच्च शब्दस्य लिङ्गविधया बोधकत्वाद् यथा 'चैत्रो घटविषयकाभिप्रायवान् उच्चारकत्वसम्बन्धेन घटमानयेति वाक्यविशिष्टत्वाद् मैत्रवत्' इत्येवं वाक्यार्थस्यानुमेयत्वेन वाक्यस्य चानुमापकत्वेन शब्दानुमानयोः प्रमेयबोधस्यैकप्रकारत्वं सिद्धम्। एवञ्चानुमाने यथा लिङ्गेन प्रमेयस्यानुमित्यर्थं पुरुषः प्रवर्तते नान्यथा, तस्मादनुमानापेक्षया विशेषा-भावादनुमानमेव शब्दः, न तु प्रमाणान्तरम्, उक्तञ्च—'उपलब्धेरद्विप्रवृत्तित्वात्'[4] 'अद्विप्रवृत्तित्वात्' इत्यस्य घटकीभूतप्रवृत्तिशब्दस्यार्थः प्रकारः। द्विप्रवृत्तिः द्विप्रकारता। अद्विप्रवृत्तित्वञ्च प्रकारभेदशून्यत्वमिति। 'अद्विप्रवृत्तित्वं प्रकारभेद-रहितत्वम्, प्रत्यक्षानुमाने तु परोक्षापरोक्षावगाहितया प्रकारभेदवतीत्यर्थः'[5]।।

सम्बन्धदृष्ट्यापि[6] शब्दो नानुमानातिरिक्तः, यथा सम्बद्धयोर्लिङ्गलिङ्गिनोः परस्परं व्याप्यव्यापकभावसम्बन्धप्रतीतौ सत्यामेव लिङ्गोपलब्धौ जातायां लिङ्गिग्रहणं भवति, तथैव शब्दार्थयोरपि परस्परं सम्बद्धयोरेव वाच्यवाचकभावसम्बन्धज्ञाने जाते एव शब्दप्रत्यक्षेण तदर्थस्य ग्रहणं भवतीत्यनुमानतुल्यत्वादनुमानमेव शब्द इति।

१. न्या.सू.;
२. न्या.सू. २।१।४९।
३. न्या.वा.;
४. न्या.सू. २।१।५०।
५. तात्पर्यटीका;
६. सम्बन्धाच्च (न्या.सू., २।१।५१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'सम्बन्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः। सम्बन्धार्थप्रतिपादकमनुमानं तथा च शब्द इति'[1]। अत्र च शब्दार्थयोः सम्बन्धो बोध्यबोधकभावरूपोऽभ्युपेयः।

वैशेषिकमतखण्डनम्

'पर्वतो वह्निमान् धूमात्' इत्यत्र ज्ञातेन धूमलिङ्गेन साध्यस्य वह्नेरनुमेयत्वेऽपि शब्दाज्जायमानस्यार्थस्य यदनुमेयत्वं वैशेषिकैः प्रतिपादितं तन्न सङ्गच्छते। यतः शब्दार्थयोर्व्याप्यव्यापकभावसम्बन्धाभावात् 'अयं शब्दोऽस्यार्थस्य वाचकः' इत्याद्याप्तोपदेशमूलकशक्तिग्रहसामर्थ्याद् योग्यताकाङ्क्षादिज्ञानसहकृत-वाक्यजन्यवाक्यार्थबोधो जायते, न चैवमनुमानस्य प्रकारः न ह्यनुमानस्थले धूमज्ञानस्य वह्नौ शक्तिग्रहो भवति, असम्भवादित्यनुमानापेक्षया शब्दप्रमाणस्य विलक्षणत्वाद् नानुमानत्वमिति। प्रतिपादितञ्च भगवता गौतमेन—'आप्तोपदेश-सामर्थ्यात् शब्दादर्थसम्प्रत्ययः'[2]।

अभिप्रायस्तु—अपारसंसारे स्वर्गोऽप्सरसादिपदार्थानां[3] सत्यामपि प्रत्यक्षा-ग्राह्यत्वान्न केवलं शब्दमात्रात् तेषां सम्प्रत्ययो भवति; किन्तु तादृशपदार्थप्रतिपाद-कानि आप्तवाक्यानि आप्तवाक्यत्वेन निबन्ध्य तथाभूतात् शब्दात् स्वर्गादीन् प्रतिपद्यते। यदि शब्दमात्राच्छब्दार्थबोधः स्यात्, तर्हि धूमेन वह्नेरिव शब्दार्थस्यानु-मेयत्वं स्यात्, न चैवमस्ति। यथा—'अयं घटशब्द आप्तैर्घटबोधनार्थं प्रयुक्तः' इति ज्ञानात्, किं वा 'घटशब्दः कम्बुग्रीवादिमत्पदार्थवाचकः' इति यदाप्तैरुक्तं तत्सामर्थ्यादेव घटशब्दाद् घटपदार्थबोधो भवति, न तु तादृशोपदेशरहितात् श्रुताच्छब्दमात्राच्छब्दः प्रमाणान्तरम्। अपि च आप्तोपदेशसामर्थ्यादेव शब्दस्यार्थ-बोधकत्वम्, न त्वनुमाने एतादृशसामर्थ्याल्लिङ्गस्य वाच्यवाचकभावसम्बन्धेन साध्यबोधकत्वमस्तीति शब्दस्यानुमानापेक्षया विलक्षणप्रमाणत्वं सिद्धम्।

पुनः वैशेषिकाः प्रवदन्ति 'गौरस्ति' इत्यत्र 'अस्तितावान् गौः' इत्याकारकबोधार्थं शाब्दबोधस्य यदतिरिक्तप्रमात्वं साधयति, तमुपेक्ष्य 'गौरस्ति' इत्यत्र 'गौरस्तितावान् योग्यतावत्त्वात्' इति योग्यतावत्त्वानुमापकहेतुना शाब्दबोधस्यानुमेयत्वमभ्युपेयमिति चेत्, न, यतो योग्यता 'एकपदार्थेऽपर-पदार्थाश्रयता'। 'गौरस्ति' इत्यत्र गोधर्मिणि अस्तित्ववत्ता, अस्तित्वाश्रयता वा योग्यता। एवं प्रकारेण गोगतास्तित्वहेतुना गोपक्षकास्तित्वसाध्यकानुमितौ हेतुसाध्ययोरभिन्नत्वात् 'अस्तित्वव्याप्या अस्तित्ववती गौः' इत्याकारकपरामर्शकाले पक्षांशेऽस्तित्वनिश्चयस्य विद्यमानत्वाद् सिद्धसाधनम्। एवञ्च सिद्धसाधनदोषभयेन

---

१. न्या.वा; २. न्या.सू. २।१।५२; ३. न्या.भा.,श.प्र.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योग्यतावत्त्वात्मकहेतुमुपेक्ष्य आकाङ्क्षावत्त्वहेतुना अनुमितित्वं साधयितुं प्रयासः क्रियते चेत्, तदपि न सङ्गच्छते; यतः 'गौरस्तितावान् गोधर्मिकास्तित्व-बोधानुकूलाकाङ्क्षावत्त्वात्' इत्यत्र गोधर्मिणि अस्तित्वप्रकारानुमितिर्नैव सम्भवति। आकाङ्क्षा च वाक्यगतानुपूर्वीरूपा। प्रकृतस्थले च गोधर्मिणि अस्तित्वप्रकारक-बोधानुकूलाकाङ्क्षागोपदोत्तरास्तिपदत्वरूपा। आकाङ्क्षा शब्दनिष्ठा भवति, न त्वर्थनिष्ठेति। अतो गोधर्मिणि आकाङ्क्षारूपहेतोरभावात् स्वरूपासिद्धिदोषः। 'हेत्वभाववान् पक्षः स्वरूपासिद्धिः'।

इत्येवं प्रकारेण हेतुकोटौ आकाङ्क्षायोग्यतयोः प्रविश्य तद्द्वारा अनुमापयितुमसमर्थः। यतः 'गौरस्ति' इत्यत्र 'गौरस्तितावान् आकाङ्क्षा-विशिष्टयोग्यतावत्त्वात्' इति अनुमानाकारः। वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन। तथा च आकाङ्क्षाश्रये पदे योग्यताभावः। योग्यताश्रयेऽर्थे आकाङ्क्षाभावो विद्यत एव, अतः सम्मिलितरूपेण योग्यताविशिष्टाकाङ्क्षाया आकाङ्क्षाविशिष्टयोग्यताया वा हेतुत्वस्वीकारे साधनाप्रसिद्धिदोषं वारयितुमशक्यत्वाद् अनुमानातिरिक्तशब्दप्रमाणस्य प्रमाणत्वं सुस्थमिति। उक्तञ्च जगदीशेन—

'योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका।
प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः'[१]।।

अभिप्रायस्तु—बाधशून्यत्वं योग्यता इति **प्राचीनाः**। एकपदार्थेऽपरपदार्थवत्ता योग्यता इति **नवीनाः**। द्विविधलक्षणात्मिकायोग्यतान्तर्गतेषु यदि नवीनमतमभ्युपेयते, तर्हि 'गौरस्तितावान् अस्तितावत्त्वात्' इत्यत्र गोगतास्तित्ववत्त्वरूपयोग्यता हेतुः। तादृशयोग्यताया हेतुत्वे साध्यहेतोरभिन्नत्वाद् 'अस्तित्वव्याप्यतादृशयोग्यतावान् गौः' इत्याकारकपरामर्शस्य पक्षधर्मिकसाध्यवत्त्वनिश्चयत्वेन गौरस्तितावान् इत्याकारकानुमितौ प्रतिबन्धकत्वम्। यतः पक्षे साध्यानुमितौ पक्षधर्मिकसाध्यसिद्धेः प्रतिबन्धकत्वमिति सर्ववादिसिद्धम्। अर्थात् सिषाधयिषाविरहकाले तादृश-परामर्शाव्यवहितोत्तरक्षणे सत्यां सिद्धौ कदापि गोपक्षकास्तित्वप्रकारकसाध्यानुमिति-र्नैव सम्भवति। अतः प्राचीनसम्मतबाधशून्यत्वात्मकयोग्यताया हेतुत्वेनाश्रीयते चेत्, गौरस्तितावान् अस्तित्वाभावविरहवत्त्वात् इत्याकारकयोग्यतालिङ्गकानुमितौ यदि वैशेषिकानामभिप्रेतं तदपि न समीचीनपथमाश्रयन्ति; यतो विशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वम्, तथा च 'गौरस्तितावान्' इत्यत्र अस्तित्वप्रकारक-गोविषयकबुद्धित्वावच्छिन्नं प्रति 'गौरस्तिताभाववान्' इत्याकारकबाधनिश्चयस्य

---

१. श.श.प्र., का.,४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिबन्धकत्वाद् अस्तित्वविशिष्टगोविषयकबुद्धित्वावच्छिन्नं प्रति तादृशबाधनिश्चयाभावस्य कारणत्वमवश्यमभ्युपेयमिति। 'यादृशकार्यत्वावच्छिन्नं प्रति यादृशज्ञानस्य प्रतिबन्धकत्वं तादृशकार्यत्वावच्छिन्नं प्रति तादृशज्ञानाभावस्य कारणत्वस्वीकारात् तादृशबाधनिश्चयाभावस्य गोविशेष्यकास्तित्वप्रकारकानुमितौ कारणत्वादुक्तकल्पितकारणेन कल्पनीयं बाधशून्यत्वरूपयोग्यताज्ञानस्य अन्यथासिद्धत्वम्।

यदि **वैशेषिकैः** शङ्क्यते—'विशिष्टबुद्धौ बाधनिश्चयस्य विरोधित्वे प्रमाणाभावः यतः प्रत्यक्षमिति विशिष्टबुद्धिः, उक्तप्रत्यक्षे कुत्रचिद् आहार्यत्वम्, कुत्रचिच्च अनाहार्यत्वं भवति। आहार्यप्रत्यक्षस्य प्रतिबध्यप्रतिबन्धकत्वं नैव सम्भवति। सुतरां प्रत्यक्षगतबाधनिश्चयस्य प्रतिबध्यतास्थले प्रतिबध्यांशे इच्छाविशेषस्य उत्तेजकत्वमभ्युपेयम्। फलत इच्छाविरहविशिष्टबाधनिश्चयस्य प्रतिबन्धकत्वम्। अत इच्छाया उत्तेजकत्वानुरोधेनानुगतप्रतिबध्यप्रतिबन्धकतायाः कल्पना उचिता न भवति। अर्थाच्छाब्दबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकताया अकल्पनाद् बाधनिश्चयाभावस्यान्वयबुद्धौ नैव कारणत्वम्। अतो योग्यताज्ञानस्य नान्यथासिद्धिरिति चेत्, न, योग्यतामात्रलिङ्गकपरामर्शस्य कारणत्वेनाभ्युपगम्यशाब्दबोधस्यानुमितित्वमङ्गीक्रियते चेत्, तर्हि घटः कर्मत्वमानयनं कृतिरित्याकारकनिराकाङ्क्षपदसमूहाद् घटनिष्ठकर्मतानिरूपकानयनानुकूलकृतिमान् इत्याकारकान्वयबोधः स्यात्, तन्न भवति; यतो निराकाङ्क्षपदैः कुत्रापि शाब्दबोधादर्शनाद् योग्यतासंशयस्य अनुमितावकारणत्वाद् बहुवादिसम्मतत्वाच्च शब्दप्रमाणस्य प्रमाणान्तरत्वमस्त्येव। शब्दस्यानुमानस्वीकारे उपस्थापिता दोषाः पूर्वोक्तरीत्या अवधेयाः।

नव्यवैशेषिकमतम्

भवतु नाम योग्यतादिहेतुना शाब्दबोधस्यानुमितौ नान्तर्भावः, तथापि मात्रपदस्मारितत्वहेतुना गोधर्मिणि अस्तित्वसाधने, अस्तित्वशून्ये अतीतादिघटादौ तादृशहेतोरविद्यमानत्वाद्व्यभिचारीत्वेऽपि 'गौरस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वाद् घटवत्' इत्याकारकानुमानवाक्येन शाब्दबोधस्यानुमित्यन्तर्गतत्वं साधयितुं समर्थः, व्यभिचाराद् आकाङ्क्षाश्रयपदजनितस्मृतिविषयत्वमात्रं न हेतुः। स्वधर्मिकादिहेतोरस्तित्वसाध्यकगोधर्मिणि विद्यमानत्वान्नासिद्धिः। वस्तुतः पदस्मारितत्वमात्रहेतुः। अन्यत्सर्वमुपलक्षणं परिचायकमात्रं वा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तादृशानुमानप्रदर्शनान्तरमस्तिपदसमभिव्याहृतगौःपदस्मारितत्वस्य हेतुत्वेन चक्षुषो दृष्टान्तत्वेन च सङ्गृह्य शाब्दबोधस्यानुमितित्वसाधकं 'गौरस्तितावान् अस्तिपदसमभिव्याहृतगौःपदस्मारितत्वात्'[1] इत्याकारकानुमानान्तरं प्रदर्शितमस्ति। पूर्ववदत्रापि गौःपदस्मारितत्वमात्रं हेतुः, समभिव्याहृतत्वांशं परिचायकमात्रं बोध्यम्।

प्रथमानुमानानन्तरं द्वितीयानुमानप्रदर्शने किं बीजमित्याकाङ्क्षायामुच्यते यत् 'प्रथमानुमानं यः (पक्षः) स्वधर्मिकास्तित्वान्वयबोधानुकूलपदोपस्थाप्यः स (पक्षः) अस्तित्वविशिष्टः'। 'स्वधर्मिकास्तित्वान्वयबोधानुकूलपदस्मारितत्ववान् सोऽस्तितावान् घटवत्' इत्याकारकसामान्यव्याप्तिज्ञानमूलकम्। द्वितीयानुमानञ्च 'यो योऽस्तिपदसमभिव्याहृतगौःपदस्मारितवान्, स स अस्तितावान् यथा चक्षुरिति' विशेषव्याप्तिमूलकम्।

दृष्टान्तात्मकचक्षुस्स्वरूपेन्द्रिये अस्तिपदसमभिव्याहृतगोपदस्मारितत्वहेतोः कथमवस्थितिः? यदि नास्ति, तर्हि दृष्टान्तासिद्धिः। तदुत्तरे प्रोच्यते—'गोशब्दोऽनेकार्थकः, यथा—'दिङ्नेत्रघृणिभूजले'[2]। तथा च गोशब्दस्य वाच्यार्थः पशुविशेषो भवति, तथैव चक्षुरिन्द्रियमपि गोशब्दस्य वाच्यार्थो भवति। एवञ्च पक्षे पशुविशेषेऽस्तिपदसमभिव्याहृतगोपदस्मारितत्वहेतोर्यथा स्थितिः, तथैव चक्षुरिन्द्रियेऽपि तादृशहेतोर्विद्यमानत्वान्न दृष्टान्तासिद्धिः।

दोषान्मुक्तेन सामान्यविशेषानुमानेन च गौरस्ति इत्यत्र अन्वयबुद्धेरुत्पन्नत्वादन्वयबुद्धेरनुमितित्वविजातीयप्रमित्यन्तरस्वीकारे मानाभावः। नैयायिकानां पक्षे च पौर्वापर्यविशिष्टत्वरूपसमभिव्याहृतनिश्चयस्य प्राग् अविद्यमानत्वे सति नान्वयबोधः, तर्हि उभयनये तादृशसमभिव्याहृतनिश्चयसापेक्षत्वादन्वयबोधोऽनुमितिविशेष एव।

ननु नव्यवैशेषिकाभिमतप्रथमानुमाने अर्थाद् अस्तित्वसाध्यकतादृशाकाङ्क्षाश्रयपदस्मारितत्वहेतुकानुमाने भाविभूतघटादौ हेतोर्विद्यमानत्वेऽपि तत्तद्घटेऽस्तित्वात्मकसाध्यस्य विरहात्, अस्तिपदसमभिव्याहृतगोपदस्मारितत्वहेतुकद्वितीयानुमाने भूतभविष्यत्कालीनचक्षुरादौ तादृशहेतोर्विद्यमानत्वेऽपि तत्र च अस्तित्वात्मकसाध्यस्य असत्त्वाच्च व्यभिचार इति चेत्, न, स्वार्थपरार्थभेदेनानुमानं द्विविधम्, परार्थानुमानेऽनुमापकहेतौ व्यभिचारदोषनिबन्धनदोषः, न तु स्वार्थानुमाने व्यभिचारदोषोऽकिञ्चित्करः। तत्र च स्वरूपसत्यात्मकव्यभिचारदोषस्य सत्त्वेऽपि पूर्वोक्तपदस्मारितत्वहेतुना गोधर्मिणि अस्तित्वानुमानं सिद्धम्।

---

१. श.श.प्र.; २. अमरकोषे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यच्च—समानविशेष्यकभावाभावप्रकारकज्ञानद्वयस्य प्रतिबध्यप्रतिबन्धकभावः स्वीकृतः; यतः साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानं प्रति साध्याभाववद्वृत्तित्वनिश्चयस्य प्रतिबन्धकत्वम्। तत्र च तादृशवृत्तित्वनिश्चयस्य सत्त्वेऽपि साध्यवदन्यावृत्तित्वज्ञानाद् अनुमितिर्भवत्येव। प्रकृतेऽपि तादृशपदस्मारितत्वहेतावस्तित्वाभाववद्वृत्तित्वात्मकव्यभिचारनिश्चयस्य विद्यमानत्वेऽपि अस्तित्ववदन्यावृत्तित्वज्ञानाद् गोधर्मिणि अस्तित्वप्रकारकानुमितिर्भवितुं शक्यते। अतः 'गौरस्ति' इत्यस्माद्वाक्यात् समुत्पन्नो यो हि बोधस्तादृशबोधोऽनुमितिविशेष एव।

नव्यवैशेषिकमतखण्डनम्

'गौरस्ति' इत्यत्र तादृशपदस्मारितत्वहेतुना गोपक्षे यदस्तित्वप्रकारकानुमितिर्नव्यवैशेषिकैः क्रियते, तन्न समीचीनम्; यतो गोधर्मिणि पदजन्यस्मृतिविषयत्वात्मकपदस्मारितत्वस्याभावनिश्चयकालेऽपि 'गौरस्ति' इत्यस्माद्वाक्यादुत्पन्नो यो हि बोधस्तन्न उक्तास्तिपदसमभिव्याहृतगोपदजनितस्मृतिविषयत्वहेतुना सम्भवति।

तात्पर्यस्तु—कस्यचित्पक्षे साध्यस्यानुमापयितुमनुमितेः प्राक् साक्षात्कारणीभूतपरामर्शस्य सापेक्षत्वम्। पुनश्च परामर्शस्य प्राक्क्षणावच्छेदेन व्याप्तिज्ञानस्य पक्षधर्मताज्ञानस्य चावश्यकत्वं विद्यत एव। 'व्याप्ति-प्रकारकपक्षधर्मताज्ञानं परामर्शः' पक्षधर्मता च 'हेतुविशिष्टपक्षः पक्षवृत्तिर्हेतुर्वा'। यदि पक्षे हेतोरभाव इति निश्चयः स्यात्, तर्हि पक्षधर्मताज्ञानं नैव सम्भाव्येत। प्रकृते च गोधर्मिणि पदजन्यस्मृतिविषयत्वाभावनिश्चयकाले हेतुमान् पक्ष इत्याकारकपक्षधर्मताज्ञानाभावात्तादृशव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वात्मकपरामर्शस्याभावाच्च 'गौरस्ति' इत्यत्र तादृशपदजनितस्मृतिविषयत्वहेतुना नव्यवैशेषिकाभिमत 'गौरस्तितावान्' इत्याकारकानुमितिरेव नैव सम्भवति। अतोऽनुमितिविशेषत्वेनान्वयबोधस्यान्यथासिद्धत्वमित्यरुचिकरं प्रतिभाति।

न च गोधर्मिणि तादृशपदजनितस्मृतिविषयत्वस्याभावनिश्चयकाले गोधर्मिकास्तित्वप्रकारकान्वयबोधो नाभ्युपेयते; किन्तु तादृशपदजनितस्मृतिविषयत्वज्ञानसत्त्वेऽन्वयबोधोऽभ्युपेय इति वाच्यम्, वृत्तिमत्पदैरुत्पन्नं यत्पदार्थविषयकस्मरणं तदज्ञायमानत्वेन शाब्दबोधस्य कारणम्, न तु ज्ञायमानत्वेन। अन्वयव्यतिरेकदशायामन्वयबुद्धित्वावच्छिन्नं प्रति ज्ञायमानपदार्थोपस्थितेः कारणमिति चेत् तदपि नाभ्युपेयम्; यतोऽन्वयबोधस्य पदार्थस्मरणज्ञानस्य चान्वयव्यतिरेकज्ञानसाधकप्रमाणं नैवानुभूतम्, अतस्तादृशान्वयव्यतिरेकमपि न प्रमाणसिद्धम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ननु ज्ञायमानपदार्थस्मरणप्रतिकूलबाधकाभावाद् बाधकप्रमाणाभावो हि ज्ञायमानपदार्थस्मृतिगतकारणताया अनुकूलप्रमाणत्वेन गृहीतः स्यादिति चेत्, न, यतः पदजन्यस्मृतिविषयत्वाभावकाले भ्रमात्मकतादृशपदजन्यपदार्थस्मृतिविषयत्वज्ञानाद् वैशेषिकनयेऽन्वयबोधः स्यात्। 'गौरस्ति' इत्यत्र गवादिपदजन्यगोविषयकपदार्थोपस्थितेर्व्यापारमुद्रयाऽन्वयबोधं प्रति कारणाभ्युपगतेऽपि तादृशपदजन्यपदार्थस्मरणज्ञानं नैव कारणम्। पदजन्यपदार्थस्मरणविषयकज्ञानस्य कारणत्वपक्षे साधकप्रमाणाभावं प्रदर्श्य बाधकप्रमाणमुपस्थापयितुं जगदीशेनोच्यते—'पदैरस्मारितस्यापि तत् स्मारितत्वग्रहदशायामन्वयधीप्रसङ्गाच्च'[1]।

अभिप्रायस्तु—'घटवद्भूतलम्' इत्यत्र घटो न पदजन्यस्मृतिविषयः, इत्याकारकज्ञानदशायां घटादौ भ्रमात्मकघटपदस्मारितत्वज्ञानाच्छाब्दबोधापत्तिः। अतोऽस्तिपदसमभिव्याहृतगोपदस्मारितत्वलिङ्गकानुमितावन्वयबोधस्य नैवान्तर्भावः। अर्थपक्षकानुमानस्य खण्डनानन्तरं पदपक्षकानुमानस्य खण्डनार्थं प्रचेष्टितोऽस्ति जगदीशः —

वैशेषिकैः 'गौरस्ति' इत्यत्र गौरिति पदपक्षकास्तित्वविशिष्टगोविषयकज्ञानपूर्वकत्वसाध्यकानुमितावस्तिपदसाकाङ्क्षगोपदत्वहेतुं हेतुत्वेनोपन्यस्य व्यतिरेकदृष्टान्तमूलकत्वेन यदनुमितिः क्रियते, तन्न युक्तियुक्तम्, 'गौः पदमस्तित्ववद्गोगोचरज्ञानपूर्वकमस्तिपदसाकाङ्क्षगौःपदत्वात्, यन्नैवं तन्नैवं यथा आकाशम्'[2]।

भाट्टास्तु वाक्यप्रयोगात्पूर्वं वक्तुस्तत्तद्वाक्यार्थविषयकयथार्थज्ञानमावश्यकम्। तथा च तत्तदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तादृशयथार्थज्ञानवत्पुरुषोच्चरितत्वरूपाप्तोक्तनिश्चयत्वस्य कारणत्वमिति, तच्चाग्रे वक्ष्यते।

प्रचीननैयायिकानां नये तु 'गौरस्ति' इत्यत्र 'गौरस्तीति वाक्यमस्तित्ववद् गो-गोचरबोधेच्छया उच्चरितम्' इत्याकारकवक्तुस्तात्पर्यज्ञानं शाब्दबोधे कारणत्वाद् नव्यमतेऽपि तात्पर्यज्ञानविषयवाक्यार्थज्ञानस्य शाब्दबोधात्पूर्वमपेक्षणीयत्वाच्च वैशेषिकैरेतादृशाभिप्रायेण शाब्दबोधमनुमितावन्तर्भावयितुमस्तित्ववद् गोगोचरज्ञानपूर्वकत्वं साध्यमिति निर्दिश्यते, तन्न समीचीनम्; यतः पक्षे साध्यज्ञानत्वावच्छिन्नं प्रति पक्षधर्मिकसाध्यसामान्याभावनिश्चयस्य विरोधित्वम्। सुतरामनुमितेः प्राग् गोधर्मिणि पदे तद्विशेष्यकतादृशज्ञानपूर्वकत्वसामान्याभावो यदि निश्चितस्तर्हि अनुमितिविरोधितादृशबाधनिश्चये सति गोपदम् अस्तित्ववद् गोगोचरज्ञानपूर्वकमित्याकारकवैशेषिकसम्मतपक्षधर्मिकसाध्यविधेयकानुमितिः सम्भ-

१. श.श.प्र.; २. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वति। वास्तविकपक्षे च तादृशाभावनिश्चयकालेऽपि 'अस्तितावान् गौः' इति अस्तित्वविशिष्टगोविषयकान्वयाबोधं शब्दप्रमाणवादिनः स्वीकुर्वन्ति। अर्थात् तादृशाभावनिश्चयकाले आकाङ्क्षायोग्यतादिज्ञानसहकृतपदार्थोपस्थित्या गौरस्ति इत्यत्र अस्तित्वादिविशिष्टगवादिविषयकशाब्दबोधोऽनायासेनोत्पद्यत इति शब्दवादिनः। एवञ्च तादृशज्ञानपूर्वकत्वबाधनिश्चयकाले गौरस्ति इत्यत्र अस्तित्वविशिष्टगोविषयकान्वयबोधो नैव सर्ववादिसम्मत इति यदि वैशेषिकाः प्रवदन्ति, तर्हि दूषणान्तरं प्रोच्यते, वाक्यार्थस्यापूर्वत्वेनेत्यादिग्रन्थेन[1]।

अभिप्रायस्तु—वाक्यार्थगर्भिततादृशज्ञानपूर्वकत्वं यदा साध्यम्, तदा अनुमितेः प्राक् प्रायशः साध्यानुपस्थितत्वात् तादृशानुमितिर्नैव सम्भवति। शब्दप्रामाण्यवादिनां नैयायिकानां मते चान्वयबोधात्पूर्वमसत्यामपि वाक्यार्थोपस्थितौ वाक्यान्तर्गतवृत्तिमत्पदजनितविशकलितपदार्थोपस्थित्या शाब्दबोधो भवत्येव। समानाकारकवाक्यार्थोपस्थितेः शाब्दबोधात्पूर्वमगृहीतत्वाद् अन्वयबोधस्यापूर्ववाक्यार्थविषयकत्वं व्यवस्थितमिति।

वस्तुतो वाक्यार्थबोधस्यानुमितित्वे सत्येव साकाङ्क्षपदजन्यत्वादिलिङ्गकत्वं कल्प्यम्। तदेव त्वसिद्धं प्रमाणाभावात्। अस्तित्वेन गामनुमिनोमीत्यादेरनुव्यवसायस्य तत्रासत्त्वात्, प्रत्युत गौरस्तीति वाक्यादस्तित्वेन गौः श्रुतो न त्वनुमित इत्यनुभवाच्च, 'श्रोतव्यो मन्तव्यः' इत्यादिप्रयोगदृष्ट्या शाब्दत्वस्यापि शृणोतेः शक्यतावच्छेदकत्वात्। न चासौ भ्रान्तिः, बाधकाभावात्[2]।

अभिप्रायस्तु—'श्रोतव्यो मन्तव्यः' इत्याकारकश्रुतिप्रयोगदर्शनाच्छब्दस्य शृणोतेः शक्यत्वाच्च 'गौरस्ति' इत्यत्र 'अस्तितावान् गौः' इत्याकारकशाब्दबोधानन्तरम् 'अस्तित्वेन गां शाब्दयामि' 'अस्तित्वेन गौः श्रुतः' इत्याकारकानुव्यवसायस्य सर्वत्र दरीदर्शनात् तादृशानुव्यवसायस्याप्रमात्वं साधयितुमसमर्थः। यदि च तादृशानुव्यवसायस्यापलापः क्रियते चेत्, तर्हि अनुमितिमात्रस्य पदजन्यत्वं प्रकल्प्यान्वयबोधत्वं किमिति न रोचये?

तात्पर्यस्तु—वह्न्यनुमितिपक्षकवह्न्यादिपदजन्यत्वसाध्यकवह्न्यनुमितित्वहेतुकस्थलीय—'वह्न्यनुमितिर्वह्न्यादिपदजन्या वह्न्याद्यनुमितित्वात्' इत्याकारकानुमानेन यावतीयानुमितौ पदजन्यत्वं प्रकल्प्य पदजन्यत्वहेतुना अनुमितिमात्रस्य शाब्दत्वसिद्धिविषये वैशेषिकानां कथं नाभिरुचिः? इत्याकाङ्क्षायामुच्यते

---

१. श.श.प्र.; २. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैशेषिकैः—समानविषयकप्रत्यक्षस्य अनुमितेश्च सत्यां सामग्र्युपस्थितावनुमिति-सामग्र्यपेक्षया प्रत्यक्षसामग्री बलवती भवति। अर्थात् समानविषयकानुमिति-त्वावच्छिन्नं प्रति समानविषयकप्रत्यक्षसामग्री प्रतिबन्धिका। अतः समानविषयका-नुमितित्वावच्छिन्नं प्रति समानविषयकप्रत्यक्षसामग्र्यभावस्य कारणत्वं सिद्ध्यति। यतः प्रतिबध्यकार्यमात्रावच्छिन्नं प्रति प्रतिबन्धकाभावस्य कारणत्वमिति सर्ववादिसम्मतत्वादनुमितिमात्रे समानविषयकप्रत्यक्षसामग्र्यभावगतकारणता-निरूपितकार्यत्वमवश्यमभ्युपेयमिति। सुतरां तादृशप्रत्यक्षसामग्र्यभावजन्यत्वस्य हेतुत्वात् परामर्शजन्यज्ञानत्वेनानुमितित्वं शाब्दान्यत्वरूपेण सिद्ध्यतीति चेत्, न, यतः प्रत्यक्षसामग्र्यभावजन्यत्वस्य यथानुमितौ स्थितिस्तथैव शाब्दबोधेऽपि तादृशजन्यत्वस्य स्थितिरवश्यमभ्युपेया, समानविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति समानविषयकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात्। तथा च प्रत्यक्षसामग्र्यभाव-जन्यत्वस्यानुमितौ शाब्दबोधे च सत्त्वादुभयोः साम्यत्वाद् बाधकप्रमाणाभावाच्चा-नुमितित्वं न शाब्दान्यत्वं स्यात्।

अन्यच्च 'घटादन्यः' इत्यत्र पञ्चम्यन्तघटपदोत्तरान्यपदत्वरूपाकाङ्क्षा-योग्यतादिज्ञानाद् घटप्रतियोगितानिरूपको यो हि भेदस्तत्प्रकारेण निरवच्छिन्न-विशेष्यताको घटान्यस्य बोधः सर्वजनसिद्धः। तथा च घटप्रतियोगिताकान्यत्व-प्रकारेण निरवच्छिन्नविशेष्यताकशाब्दबुद्धित्वावच्छिन्नं प्रति पञ्चम्यन्तघटपद-साकाङ्क्षान्यत्वरूपसाकाङ्क्षज्ञानस्य कारणमिति कार्यकारणभावो नैयायिकानां मतेऽभ्युपगतत्वाद् निरवच्छिन्नविशेष्यताकानुमितेरनभ्युपगतत्वाच्च 'घटादन्यः' एतद्वाक्याधीनवाक्यार्थबोधः सम्भवति, न तु वैशेषिकानां मते। यत एतेषां नये शाब्दबोधास्वीकारात् कार्यकारणभावास्वीकाराच्च 'घटादन्यः' इत्यत्र 'भेदो घटप्रतियोगिताकः पञ्चम्यन्तघटपदसाकाङ्क्षान्यपदस्मारितत्वात्' इत्याकारकानु-मानेन तादृशान्वयबोधो नैव सम्भवति। 'घटादन्यः' इत्याकारकस्थलीयशाब्दबोधे शुद्धघटान्यत्वप्रकारकघटान्यस्य बोधदर्शनात्। न तु भेदो घटप्रतियोगिताकानुमितौ शुद्धघटान्यत्वप्रकारकघटान्यस्य भानमपि च तत्र भेदधर्मिणि तादृशपदस्मारितत्व-हेतुना घटप्रतियोगिताकत्वात्मकसाध्यस्य भानम्। अत उभयोर्भिन्नत्वात् शाब्दबोधस्य तत्करणस्य वाऽनुमित्याद्यतिरिक्तानुमानाद्यतिरिक्तं वा प्रमात्वं प्रमाणत्वं वा सिद्ध्यतीत्यलम्।

जरन्मीमांसकमतखण्डनम्

तत्र जरन्मीमांसकाः प्रवदन्ति यद् आकाङ्क्षायोग्यतादिज्ञानानां याद्रूप्येण शाब्दबोधकारणं ताद्रूप्येण आप्तोक्तत्वनिश्चयस्यापि अन्वयबोधकारणत्वमभ्युपेयम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आप्तोक्तत्वञ्च वाक्यनिष्ठम्। तथा च—'घटोऽस्तीति वाक्यमस्तित्ववद् घटगोचरयथार्थज्ञानवदुक्तत्वम्' इत्याकारकाप्तोक्तत्वनिश्चयत्वस्य वाक्यार्थ-बोधात् प्राग् नियमतः कारणत्वेनोपस्थितिरवश्यमभ्युपेया। नाभ्युपेयते चेद् भण्डः—धूर्तप्रतारकादिविसंवादिवाक्यजनितवाक्यार्थबोधस्य यथार्थत्वप्रसक्तिः स्यात्। अत एतादृशलौकिकवाक्यजनितबोधस्य याथार्थ्यं परिहर्त्तुं वृद्धमीमांसका यथार्थवाक्यविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति आप्तोक्तत्वनिश्चयस्य कारणत्व-मभ्युपगच्छन्ति।

ननु भ्रमप्रमाज्ञाननिष्पत्त्यर्थमाप्तोक्तनिश्चयगतकारणताया अवच्छेदकरूपेण निरूप्यनिरूपकभावापन्नविषयताशालिज्ञानमात्रमेव गृहीतं स्यात्। अर्थात् कारणतावच्छेदककोटौ तादृशवाक्यार्थस्य कथं प्रवेश इति चेत्, न, गृहीतग्राहित्व-निबन्धनान्वयबोधस्याप्रमात्ववादिनां मीमांसकानां मते आप्तोक्तत्वघटकज्ञानं यथार्थरूपेण गृहीतम्, एतदभिप्रायेण निरूप्यनिरूपकभावापन्नविषयताशालिज्ञान-मनूद्य वाक्यार्थगोचरयथार्थज्ञानमुक्तमस्ति।

न चान्वयबुद्धित्वावच्छिन्नं प्रति तादृशाप्तोक्तत्वनिश्चयस्य कारणत्वा-भ्युपगमे शाब्दबोधस्यानुमितित्वं स्यादिति वाच्यम्, एकपदार्थेऽपरपदार्थान्वयबोधो नानुमितिः, यतः सत्यां पक्षे साध्यनिश्चये अनुमित्सां विना अनुमितिर्नैव सम्भवति। यद्यप्यनुमित्साकालीनाप्तोक्तत्वनिश्चयात्मककारणात् एकपदार्थेऽ-परपदार्थानुमितिर्भवति, तथाप्यनुमित्साविरहकालीनाप्तोक्तत्वनिश्चयात्मककारणात् नैवानुमितिः; किन्तु शाब्दबोधश्च भवत्येव। अतः शाब्दबोधो नानुमितिः।

ननु शाब्दबोधस्य प्रमात्वमेव नास्ति, यतः शाब्दबोधस्य गृहीतग्राहित्वान्न प्रमा। 'अन्वयबोधो न प्रमा गृहीतग्राहित्वात् स्मृतिवत्'[1] इत्यत्र अनुमानान्त-र्गतगृहीतग्राहित्वहेतौ प्रमात्वाभावस्य व्याप्तिग्रहप्रतिकूलाव्यभिचारशङ्का भवति। 'गृहीतग्राहित्वं प्रमात्वाभावव्यभिचारी न वा' इत्याकारकव्यभिचारशङ्कायामुपस्थितौ सत्यां तन्निवृत्त्यभावपर्यन्तं प्रमात्वाभावाभावाधिकरणनिरूपितवृत्तित्वाभावगृहीत-ग्राहित्वमित्याकारको व्याप्तिग्रहो नैव सम्भवति। तादृशव्यभिचारशङ्काया निवृत्त्यर्थ-मनुकूलतर्कस्यानुसन्धानं स्यात्, तच्च 'गृहीतग्राहित्वं यदि प्रमात्वाभावव्यभिचारी स्यात्, प्रमावृत्तिभिन्नो न स्यात्' इत्यत्र गृहीतग्राहित्वधर्मिणि प्रमावृत्तिभिन्नत्वा-भावरूपापाद्यव्यतिरेकनिश्चयस्य तादृशतर्के कारणत्वं स्यात्। अर्थात् प्रमावृत्ति-भिन्नत्वात्मको यो हि आपाद्याभावः, गृहीतग्राहित्वधर्मिणि उक्ताभावस्य निश्चिते

१. श.श.प्र.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सति पूर्वोक्ततर्कानुधावनं स्यात्। एवञ्च आपाद्यव्यतिरेकांशविशेषणकोटौ प्रमायाः प्रविष्टत्वाद् यावत्कालपर्यन्तं प्रमात्वस्य नैवावगतिस्तावत्कालपर्यन्तं तादृश-प्रमाघटितापाद्यव्यतिरेकनिश्चयासम्भवाच्छाब्दबोधस्य गृहीतग्राहित्वान्न प्रमा। 'यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्ययथार्थ-ज्ञानस्यैवागृहीतग्राहित्वेन प्रमात्वमिति। अत एव धारावाहिकप्रत्यक्षव्यक्तीनां समानाकारग्रहोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः। हानिस्तु समानाकारानुभव-समुत्थानां स्मृतीनामिति। जरन्मीमांसकानां समाधानं निरस्यति जगदीशः।

'नाप्तोक्तता तु वाक्यार्थगर्भाज्ञातोपयुज्यते।
वाक्यार्थानामपूर्वत्वात् संशयेऽप्यन्वयोदयात्'[1]।।

अभिप्रायस्तु—अन्वयबोधं प्राग् वाक्यार्थस्याप्रतीयमानत्वादाप्तोक्त-निश्चयत्वस्य नैव कारणत्वम्। न केवलं वाक्यार्थनिश्चितेऽन्वयबोधो भवति, अपि च वाक्यार्थघटकैकपदार्थेऽपरपदार्थस्य संशयेऽपि शाब्दबोधस्य दर्शनाद् आप्तोक्तत्वनिश्चयत्वस्य नैव कारणत्वम्।

वस्तुतस्तु समानानुपूर्वीकस्यैव वाक्यान्तरस्य, तस्यैव वा कालान्तर-मन्तर्भाव्य, घटीयकर्मत्वादिपरत्वनिश्चयसत्त्वेऽपि श्रूयमाणवाक्यव्यक्ताविदानीमन्त-र्भावेण तत्परत्वस्यानिश्चयेऽभावानिश्चये वा घटीयं कर्मत्वमित्याद्यन्वय-मतेरनुत्पादाद्विशिष्यैव तत्तद्वाक्यव्यक्तिधर्मिकस्य घटकर्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वमुपेयम्, तथा च तत्तद्धेतुभूतानां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनां तथात्वमुचितम्, अवश्यक्लृप्तपूर्ववर्तिताकत्वात्। अत एव 'सैन्धवमानय' इत्यादावपि लवणपरत्वधीर्न लवणाद्यन्वयबुद्धौ हेतुः; किन्तु तदर्जकत्वेनाभिमतं भोजनादिप्रकरणस्य प्रतिसन्धानमिति न्यायसिद्धान्तः।

किञ्च 'श्रोतव्यो मन्तव्यः' इति प्रयोगाच्छाब्दत्वस्यापि शृणोतेः शक्यता-वच्छेदकत्वाच्छाब्दबोधो नानुमितिः; किन्तु पदज्ञानात्मकप्रमाणजन्यः स्वतन्त्रोऽनुभव इति निष्कर्ष इति।

---

१. श.श.प्र.,का.५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कान्तासम्मिततयोपदेशयुजे अभिज्ञानशाकुन्तलम्

डॉ० ददन-उपाध्यायः
सहायकसम्पादकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

अस्ति सर्वविदितवेद्यं यत् 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'। तेन काव्यनिर्माणतत्पराणां क्रान्तदर्शिनां महाकवीनां स्वकर्मप्रवर्तने किमपि प्रयोजनं भवेदिति नास्ति सन्देहलेशः। यद्यपि वाग्देवतावतारेण काव्यप्रकाशकारेण मम्मटाचार्येण 'कालिदासादीनामिव यशः' इति वाक्येनानेन महाकविकालिदासस्य काव्यप्रवर्तने यश एव प्रधानं प्रयोजनं निर्दिष्टम्। स्वयं महाकविकालिदासोऽपि स्वस्य यशःप्रार्थनस्याभिलाषां प्रकटितवान्। तस्य शब्देनावलोकनीयमस्ति—

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्राशुंलभ्ये फले लोभादुद्बाहुरिव वामनः[१]।।

किन्त्वेतेन काव्यस्य लोकोपकारिता शिष्टजनसेविता विहन्येत। कवीनां च क्रान्तदर्शित्वस्य युगप्रवर्तकत्वस्य च क्षतिः स्यात्। अतः काव्येन कविः किञ्चिदुपदिशति, लोकान् शास्त्रमार्गे प्रवर्तयति, असन्मार्गान्निवारयति। काव्यस्य सुखादल्पधियामपि चतुर्वर्गफलप्रापकता व्याकुप्येत। तत्र चतुर्वर्गो धर्मार्थकाममोक्षाः वर्गचतुष्टयम्। तत्र शास्त्रे धर्मशास्त्रं पूर्वमीमांसारूपं जैमिनिप्रणीतं मनुयाज्ञवल्क्यादिप्रणीतं स्मृतिशास्त्रं च। अर्थशास्त्रं गर्गभार्गवादिप्रणीतो नीतिग्रन्थः। कामशास्त्रं च मुनिवात्स्यायनादिप्रणीतम्। मोक्षशास्त्रं व्यास-कपिलकणादाक्षपादपतञ्जलिप्रणीतं वेदान्तसांख्यतर्कन्याययोगाख्यम्। एवञ्च चतुर्वर्गेत्यनेन—

गौतमस्य कणादस्य कपिलस्य पतञ्जलेः।
व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि।। इति।

---

१. रघु. १।३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यच्च—

काणादं गौतमं चैव मीमांसाद्वयमेव च।
आहुः सांख्यं च योगं च षट्शास्त्राणि मनीषिणः।। इति।

एवञ्चोक्तानां षट्शास्त्राणामप्युपदेशं सुखादल्पधियामपि काव्यादेव भवति। अत एव चतुर्दशभाषावारविलासिनीभुजङ्गेन महापात्रेण विश्वनाथेन साहित्यदर्पणे समुद्घोषितम्—

चतुर्वर्गफलप्राप्तिसुखादल्पधियामपि।
काव्यादेव................................।।

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यं न रावणादिवदित्यादि-कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। उक्तञ्च विष्णुपुराणे—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।।

वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिपक्वमतीनामेव चतुर्वर्गफलप्राप्ति-र्जायते। परमाह्लादजनकतया सुखादेव सुकुमारबुद्धीनामपि काव्यादेव भवति चतुर्वर्गफलप्राप्तिः। सुकुमारमतयः काव्यस्याध्ययनं कुर्वन्तु, वयं परिणतबुद्धयो वेदशास्त्राणामध्ययनमेव करिष्यामः, किमर्थं काव्ये यत्नः करणीय इत्युक्तिस्तु सितशर्करोपशमनीयस्य रोगस्य कृते रोगिणः कटुकौषधस्य प्रदानं चरितार्थयति।

श्रूयते, अस्ति कश्चित् पाटलिपुत्रस्थः सुदर्शनो नाम राजा। स एकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव। यथा—

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।

श्लोकाविमौ श्रुत्वा राजा चिन्तानिमग्नो बभूव। ममैते पुत्रा नित्यमुन्मार्गगामिनः शास्त्रपारायणविमुखा कथं गुणवन्तः क्रियन्तामिति।

नृपेण तेनैकदा मध्येपण्डितसभं समुद्घुष्टम्—अस्ति कश्चिदेतादृशो विद्वान् यो नित्यमुन्मार्गगामिनां शास्त्रपारायणविमुखानां बालानां शिक्षणेन गुणवन्तः कर्तुं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रभवेत्। तत्रैको: विष्णुशर्मानामा कश्चित् पण्डितो डिण्डिमेन घोषेण समुद्घोषितवान् यदहमेतान् राजपुत्रान् षण्मासाभ्यन्तरे शास्त्रशिक्षणे समर्थोऽस्मि। पण्डितेन तेन सुकुमारमतयः सुखिस्वभावा नीतिशास्त्रपराङ्मुखा राजकुमाराः कथाच्छलेन सदुपदेशस्वरूपं स्वार्थं प्रवर्तितम्। अतः काव्यं कान्तासम्मितोपदेशाय भवति। यथा कान्ता गुर्वाद्यधीनमपि दयितं निजचातुर्येण कटाक्षभुजविक्षेपादिना सरसतामापाद्य स्वाभिमुखीकृत्य स्वस्मिन् प्रवर्तयति एवं काव्यमपि ललितपदसमूहोपदर्शितशृङ्गारादिरसेन शास्त्रपराङ्मुखान् सुकुमारमतीन् राजकुमारादीन् मधुरपानादिना कटुकौषधपराङ्मुखान् बालकानिव सदुपदेशरूपस्वार्थे प्रवर्तयति। यदाहुः—

स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते।
प्रथमालीढमधवः पिबन्ति कटुभेषजम् ।।

अत एव वाग्देवतावतारेण काव्यप्रकाशकारेण मम्मटाचार्येण चरमं काव्यप्रयोजनं कान्तासम्मितोपदेशं प्रदर्शितम्। उपदेशस्तावत् त्रिविधो भवति— प्रभुसम्मितः सुहृत्सम्मितः कान्तासम्मितश्च। तत्राद्यः शब्दप्रधानो वेदादिः। शब्दप्रधानत्वं च प्रवर्तनारूपशासनाप्रधानत्वम्। उद्योतकारास्तु शब्दप्रधानत्वं च समीहितार्थलाभायात्यज्यमानमुख्यार्थकत्वम्, उपदेशकविधेयांशस्य लक्षणादिनान्यथानयनाभावादित्याहुः। तथा च यथा प्रभुरिष्टसाधनेऽनिष्टसाधने निष्फले च सेवकादीन् नियोजयति, एवं 'ज्योतिष्टोमेन स्वर्गकामो यजेत', 'श्येनेनाभिचरन् यजेत', 'अहरहः सन्ध्यामुपासीत' इत्यादिरूपो वेदोऽपि इष्टसाधने ज्योतिष्टोमादौ, अनिष्टसाधने श्येनयागादौ निष्फले (अकरणप्रयुक्तप्रत्यवायपरिहारातिरिक्तफलरहिते) सन्ध्यावन्दनादौ च नियोजयतीति प्रभुसम्मितत्वं वेदादिशास्त्राणामायाति। द्वितीयस्त्वर्थतात्पर्यवान् अष्टादशपुराणेतिहासादिः। अर्थतात्पर्यवत्त्वं चेष्टानिष्टार्थबोधमात्रपरत्वम्। यथा सुहृत् 'एवं कृते एवं भवति' इति वस्तुतत्त्वमात्रं बोधयति, एवं पुराणेतिहासादिरपि एवं कृते इदमिष्टं भवति, एवं च कृते इदमनिष्टं भवति इत्येतावन्मात्रं बोधयति, न तु नियोजयतीति सुहृत्सम्मितत्वं पुराणेतिहासादीनाम्। पुराणस्य लक्षणं यथा—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्याष्टादशता प्रसिद्धा। यथा—

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापलिङ्गकूस्कानि पुराणानि चाष्टादश।।

म इत्यनेन मार्कण्डेयमत्स्यपुराणे ग्राह्ये, तथैव भ = भागवतभविष्यपुराणे। ब्र = ब्रह्म-ब्रह्माण्ड-ब्रह्मवैवर्तपुराणत्रयाणि, व = वायु-विष्णु-वाराह-वामनपुराण-चतुष्टयानि, अ = अग्निपुराणम्, ना = नारदपुराणम्, प = पद्मम्, लिङ् = लिङ्ग-पुराणम्, ग = गरुडपुराणम्, कू = कूर्मम्, स्क = स्कन्दपुराणं ग्राह्यम्।

इतिहासस्य लक्षणं यथा—

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते।।

कान्तासम्मितत्वं शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणत्वं काव्यं तु तृतीयम्। शब्दो वाचकः, अर्थो वाच्यस्तयोर्गुणभावेनाप्रधानतया रसस्य शृङ्गारादेरङ्गभूत उपायभूतो यो व्यापारो विभावादिसंयोजनं (विभावानुभावव्यभिचारि-भावानां मेलनं) व्यञ्जना वा तत्परत्वम्। एवञ्च काव्ये तादृशव्यापारनिष्पाद्यरसस्यैव प्राधान्यम्। तेन कान्तेव इतरजनवैलक्षण्येन स्वानुकूलीकरणम्। पुनश्च सदुपदेश-रूपस्वार्थे प्रवर्तनम्। अतो वाग्देवतावतारभूतेन मम्मटाचार्येण काव्यस्य प्रयोजनं सुष्ठूक्तम्—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। (का.प्र.१।२)

यशस इत्यादयस्तादर्थ्यचतुर्थ्यन्ताः। कृत्-विद्-युज्शब्दः 'स्त्रियां क्तिन्' (पा.सू.३.३.९४) इति सूत्रस्थेन 'सम्पदादिभ्यः क्विप्' इति कात्यायनकृतवार्तिकेन सम्पदादित्वात् स्त्रियां भावे क्विप्प्रत्ययान्ताः। तेन काव्यं **यशसे** कीर्तये, **अर्थकृते** धनकरणाय, **व्यवहारविदे** आचारवेदनाय, **शिवेतरक्षतये** शिवात् कल्याणादितरद् अशिवममङ्गलम्, तस्य क्षतये नाशाय, सद्यः श्रवणसमनन्तरमेव परनिर्वृतये परमानन्दाय, कान्ताया मनोरमायाः सम्मितं तुल्यं तस्य भावः तत्ता तया, उपदेशयुजे उपदेशयोगाय भवति। प्रयोजनमेतद्यथायोगं कवये काव्यवासनापरिपक्वबुद्धये सहृदयाय च भवति। तद्यथा यशोऽर्थानर्थनिवृत्तिश्च कवेरेव। व्यवहारज्ञानोपदेशयोगौ सहृदयस्यैव। कवेस्तयोः सिद्धत्वात्। यतो हि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेनैव मम्मटाचार्येण काव्यस्य कारणमुक्तवता कवेः लोकशास्त्रकाव्याद्यवेक्षणाद् नैपुण्यं साधितम्। तद्यथा—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।। (का.प्र.१।३)

परनिर्वृत्तिरपि सहृदयस्यैव। रसास्वादनकाले कवेरपि सहृदयान्तःपातित्वात्। तदुक्तं प्रदीपे—काव्यास्वादनकाले कवेरपि सहृदयान्तःपातितया रसास्वादः। काव्यमुपदेशाय भवतीति चरमं काव्यप्रयोजनं निर्धारितं मम्मटाचार्येण, चरमे उक्तत्वात्। तेनैव तस्य शास्त्रत्वमायाति, शिष्टजनसेवित्वात्, हितोपदेष्ट्रित्वाच्च। तथा चोक्तम्—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।

पुंसां हितोपदेशित्वं तच्छास्त्रमिति कथ्यते।।

शास्तुर्वचनं शास्त्रम्, शास्ता च प्रभुरीश्वरो विष्णुः। अत एव काव्यादयः शब्दमूर्तिधरस्य विष्णोरंशा मन्यन्ते। यथा चोक्तम्—

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।

शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः।। इति।

अग्निपुराणवचनेनैतेन काव्यस्योपादेयत्वं प्रतिपादितं भवति। न चेदं सर्वं 'काव्यालापांश्च वर्जयेत्' इत्यादिना तस्य निषेधतेति वाच्यम्, तस्य स्मृतिशास्त्रस्य भगवत्तद्भक्तभिन्नवर्णनविषयकत्वात्। अत एव श्रीमद्भागवते "न यद्वचश्चित्रपदं हरेर्यशः" (१.५) इति, "स वाग्विसर्गो जनताघविप्लवः" इति च भगवद्गुणवर्णनविधानं कृतम्। एतेनापि शास्त्रस्यानुगामिता सिद्ध्यति काव्यस्य। अत एवाभिज्ञानशाकुन्तले नाटके कालिदासेन दुष्यन्तस्य, नैषधीयचरिते श्रीहर्षेण नलस्य, किरातार्जुनीये भारविणा अर्जुनस्य, नलचम्पूप्रबन्धे त्रिविक्रमेण दमयन्त्यादेश्च भगवद्भक्तानां वर्णनं कृतम्। अत एवोक्तम्—

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।

ऋतुपर्णस्य राजर्षेर्वर्णनं कलिनाशनम्।।

एते राजर्षय उपलक्षणपराः। एतादृशानां राज्ञां कीर्तनेन कलेः पापस्य क्षतिर्भवति। यत्तु भामिनीविलासे शृङ्गारोल्लासे—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम्।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत्।।

इत्यादनि पण्डितराजैर्जगन्नाथैः स्वप्रेयसीवर्णनं कृतं तत्तु तेषां श्रीगङ्गाप्रसादेन शोभतेतराम्।

अभिज्ञानशाकुन्तलस्य शास्त्रानुगामिता

महाकविना कालिदासेनाभिज्ञानशाकुन्तले पदे पदे शास्त्राणां सिद्धान्तं प्रतिपाद्य तस्य हितोपदेशिता साधिता। महाकविकुलशिरोमणिना तत्रभवता कालिदासेन निर्विघ्नपरिसमाप्तिरभिलषता 'रङ्गविघ्नोपशान्त्यर्थं नान्दीमादौ प्रयोजयेत्' इत्यालङ्कारिकवचनमनुसरता परमेश्वरनामसङ्कीर्तनरूपे नान्दीश्लोकेऽष्ट-मूर्तिधरस्य परमेश्वरस्य वर्णनं विधाय शास्त्रानुगामित्वं प्रतिपादितम्। यथा—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।

या स्रष्टुराद्या सृष्टिरित्यनेन परमेश्वरस्य जलमूर्तेः स्मरणं कृतम्। तथा चोक्तं मनुना—

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत् ।।

परमेश्वरस्य द्वितीया मूर्तिः 'या विधिहुतं हविर्वहति' इत्यनेनाग्निमयी प्रतिपादिता। तथा च श्रुतिः —

'इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्'।

'या च होत्री' इत्यनेन यजमानरूपा तृतीया मूर्तिः परमेश्वरस्य। एतेन भगवतो विविधजीवात्मकत्वमपि संसूच्यते। 'मुख्यालाभे प्रतिनिधिः शास्त्रार्थः' इत्युक्तिरेवात्र प्रमाणम्। 'ये द्वे कालं विधत्तः' इत्यने सूर्यचन्द्ररूपा मूर्तिः प्रतिपादिता। अहोरात्रस्य तिथेश्च प्रवर्तनात् सौरं चान्द्रं च मासर्तुवर्षादिरूपं समयं निष्पादयतः। यथा प्रतिपादितं सूर्यसिद्धान्ते—

'उदयादुदयाद्भानोर्भौमसावनवासराः'।। इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्' इत्यनेनाकाशमयी तनुः "आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः" इति प्रतिपादनात्। 'यामाहुः सर्वबीजप्रकृतिः' इत्यनेन पृथ्वीरूपा सप्तमी तनुः परमेश्वरस्य। 'यया प्राणिनः प्राणवन्तः' इत्यनेन प्राणादिवायुपञ्चकशोभितनुः परमेश्वरस्याष्टमी। ईशस्याष्टमूर्तित्वे प्रमाणं विष्णुपुराणवचनमवलोकयन्तु सुधयः—

सूर्यो जलं मही वह्निर्वायुराकाशमेव च।
दीक्षितो ब्राह्मणश्चैव इत्येतास्तनवः स्मृताः।।

'विनीतवेशेन प्रवेष्टव्यानि तपोवनानि[१]' इत्यभिधाय तपस्विनां समीपे सर्वतोभावेन विनयावलम्बनं समुचितमिति राजर्षेर्दुष्यन्तस्य नीतिकोविदत्वं प्रकटयति। तस्माद् राजा कार्मुकमाभरणानि चावतार्य सारथिमर्पयति। यतो हि वीरत्वव्यञ्जकत्वात्तपोवनेऽविनीतताप्रकाशो भवेदिति। अहो विदग्धता महाकवि-कालिदासस्य।

वृक्षसिञ्चनकालेऽनसूया कथयति—'सखि शकुन्तले! उदकं लम्भिता एते ग्रीष्मकालकुसुमदायिनो वृक्षाः। इदानीमतिक्रान्तकुसुमसमयानपि वृक्षान् सिञ्चामः, तेन अनभिसन्धिगुरुको धर्मो भविष्यति'[२]। अनभिसन्धिगुरुको धर्मः, नास्ति अभिसन्धिः = फलाशा यस्मिन् तथाविधः, अत एव गुरुरेव गुरुको महान् धर्मः कल्याणम्। तदुक्तं नारदेन—

पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्मबुद्ध्या तु धर्मदानं तदुच्यते ।।

इत्यनेन विनेयान् प्रति धर्मदानस्य लक्षणं प्रतिपादितं भवति।

महर्षेरयुतशिष्यपोषकस्य कुलपतेः कण्वस्येयं शकुन्तलासवर्णक्षेत्रसम्भवा भवेदिति चिन्तयति राजा दुष्यन्तो वृक्षान् सिञ्चन्तीं शकुन्तलामवलोक्य। तत्र क्षेत्रं नाम 'क्षेत्रं पत्नीशरीरयो'रित्यमरः। कुलपतेर्लक्षणं प्रोक्तम्—

मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात्।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः।।

अहो राज्ञो दुष्यन्तस्य शास्त्रनिष्ठिता बुद्धिः। स विचारयति यदीयं कण्वदुहिता शकुन्तला ब्राह्मणेतरजातीयपत्नीगर्भसम्भूता स्यात्, तर्हि मे

१. अ.शा., पृ. २८; २. तत्रैव, पृ. ३२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिणययोग्या भवेदन्यथा शास्त्रनिषेधादस्यामभिलाषो व्यर्थः। तत्र शास्त्रवचनम्—

शूद्रस्य भार्या शूद्रैव सा च स्वा च विशः स्मृते।
ते च स्वा च क्षत्रियस्य ताश्च स्वा चाग्रजन्मनः।।इति।

अन्तःकरणसाक्ष्येण सन्देहं निवारयति। तदेव द्रढयति—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।। (अ.शा.१.२३)

यतो हि संशयास्पदेषु विषयेषु सज्जनानां मनसः प्रवृत्तयो निर्णयहेतवो भवन्ति। तथा चास्यां शकुन्तलायां मदन्तःकरणस्य बलवत्प्रवृत्तत्वादियमवश्यं क्षत्रपरिग्रहयोग्या। 'परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः' इति विश्वः। तत्र मनुवचनं प्रमाणम्—'साधूनामात्मनस्तुष्टिरेव च' इति।

यदा राजा दुष्यन्तः शकुन्तलायाः परिचयाय पृच्छति, तदानसूया कथयति— 'तं (कौशिकं) सख्याः प्रभवमवगच्छ। उज्झितायाः शरीरसंवर्द्धनादिभिः पुनस्तातकण्वोऽपि एतस्याः पिता'[1]। तत्र शङ्क्यते के पितरः भवन्ति। तत्र पितुर्लक्षणं कुर्वता महाकविना कालिदासेन रघुवंशे प्रोक्तम्—

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः।। (रघु० १.१२)

पञ्चप्रकारकाः पितरः प्रतिपादिताः स्मृत्यादौ, यथा—

अन्नदाता भयत्राता यस्य कन्या विवाहिता।
जनयितोपनेता च पञ्चैते पितरः स्मृताः।। इति।

अन्यच्च—

शरीरकृत् प्राणदाता यस्य चान्नानि भुञ्जते।
क्रमेणैते त्रयः प्रोक्ताः पितरो धर्मसाधनाः।। इति।

अपरञ्च—

कन्यादाताऽन्नदाता च ज्ञानदाताऽभयप्रदः।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः।। इति।

---

१. अ.शा., पृ.६०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वितीयाङ्के राजा कथयति विदूषकम्—'चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः'। अत्र विदूषकस्य 'नीवारषष्ठभागं तापसा मे उपहरन्तु' इति बुद्ध्यनुरूपोऽपि स्थूलापदेशस्तथापि नाटकीयचमत्काराधायकत्वाद्रमणीय एव। विदूषकस्योक्तौ शास्त्रस्य पुटमस्ति। यथोक्तं मनुना—

पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा।।
आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च।।
पत्रशाकतृणानाञ्च वैदलस्य च चर्मणाम्।
मृण्मयानाञ्च भाण्डानां सर्वस्याश्ममयस्य च।। इति।

तत्र धार्मिको राजा तत्परामर्शमुपेक्ष्य कथयति—तपसः पुण्यभागं मे तापसाः स्वयमेव वितरन्ति, अत एव तवायं नीवारभागयाचनापदेशो रत्नप्रदानात् सीसकयाचनोपदेश इवेति। एवं हि मनुनाऽप्युक्तम्—

म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करम्।
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्।। इति।

तत्कारणमपि प्रतिपादयति। यथा—

यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा।
तस्यापि तत् क्षुधा राष्ट्रमचिरेणैव सीदति।।
श्रुतवित्ते विदित्वास्य धर्म्यां वृत्तिं प्रकल्पयेत्।
संरक्षेत् सर्वतश्चैनं पिता पुत्रमिवौरसम्।। इति।

अत एव तापसेभ्यो करग्रहणच्छलेन पुनराश्रमप्रवेशो नितरामसम्भाव्य एव, कदाप्येवमकृतत्वात्। तदुक्तं मनुना—

संरक्ष्यमाणो राज्ञा यं कुरुते धर्ममन्वहम्।
तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च।। इति।

अपि च—

तदधीते यद् यजते यद्ददाति यदर्च्चति।
तस्य षड्भागभाग् राजा सम्यग्भवति रक्षणात्।। इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्कः काव्यमर्मज्ञैर्भूरिशः प्रशंसितः। अस्मिन्नाटकेऽयमेवाङ्कः सर्वेष्वप्यङ्केषु प्रकृष्टतर इति सर्वजनीनप्रवादः। श्रूयते—

कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।। इति।
यास्यत्यद्येति तत्रापि श्लोकः सर्वमनोहरः।। इति च।

पद्यमिदं केचिदेवं पठन्ति। तद्यथा—

काव्येषु नाटकं श्रेष्ठं तत्रापि च शाकुन्तलम्।
तत्र रम्यश्चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।। इति।

अत्राङ्के शकुन्तलाया नाटकनायिकायाः पतिगृहप्रस्थानस्य वर्णिततया स एव भागः प्रधानतरः। पं. चन्द्रबलीपाण्डेयेनास्य चतुर्थस्याङ्कस्य 'चिन्ता' इति नामकरणं कृतम्। तेन कथितं यदभिज्ञानशाकुन्तलस्य प्रथमाङ्के सर्गस्य द्वितीयाङ्के कामस्य तृतीयाङ्के भोगस्य चतुर्थाङ्के चिन्तायाः पञ्चमाङ्के प्रमादस्य षष्ठेऽङ्के पश्चात्तापस्य सप्तमाङ्के च सिद्धेः प्रतिपादनं विद्यते। डॉ० रमाशङ्करतिवारिणा नाटकस्यास्य 'भोगभूमिः' 'दण्डभूमिः' 'सिद्धिभूमिः' इत्यनेन विभागत्रयं कृतम्। तत्र प्रथमाश्चत्वारोऽङ्का भोगभूमिः पञ्चमषष्ठाङ्कौ दण्डभूमिः, सप्तमोऽङ्कः सिद्धिभूमिरिति। गान्धर्वविवाहं कृत्वा शीलविच्युतेः अपराधिनी जातेति चिन्तेयं शकुन्तलाया हृदयेऽस्तु न वा, किन्तु प्रियंवदानसूये बहुचिन्तिते स्तः। अनसूया कथयति—हला प्रियंवदे! यद्यपि गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्तृगामिनी संवृत्ता, तथापि मे न निर्वृत्तं हृदयम्.... इमं स्मरति जनं न वेति?

प्रियंवदापि कथयति—एतावत् पुनश्चिन्तनीयम्, तातस्तीर्थयात्रातः प्रतिनिवृत्त इमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति? यद्यपि कैरपि आश्रमवासिभिः शकुन्तलायाः प्रणयसम्बन्धे न किमपि टीकितम्, तथापि व्यवहारोऽयं शकुन्तलादृष्ट्यैव तपोवनविरोधी चास्ति। चतुर्थाङ्के दुर्वाससः शापेन चिन्तायास्तत्त्वमिदं स्पष्टेन धरातले आगच्छति। कुत्र कण्वस्य क्षमाशीलता उदारता च दुर्वाससि हृदये। कदाचित् कण्वस्य प्रातिनिध्येन दुर्वासा शीलरक्षाया निमित्तं दण्डस्यौचित्यमवज्ञातम्। कण्वस्यापि मनसि युगपदेवानेकेषां भावानामुद्रेको भवति। अवलोकयन्तु, ते किं कथयन्ति—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।। (अ.शा. ४.६)

शकुन्तलायाः प्रस्थानकाले पुत्रवत्पालितस्य मृगशावस्य तस्या मार्गावरोधनं, प्रियवियुक्तायाः चक्रवाक्याः करुणक्रन्दनं चिन्ताया एवोद्भावनं कुर्वन्ति। एतत्सर्वं नाटककारस्य कुशलकलाया द्योतकमस्ति, रागरङ्गस्यानन्दस्य मध्ये मध्येऽपि बलेनास्मान् स्मारयति यत् तपोवने कुलपतेः कण्वस्य सहमतिं विना पल्लवितोऽयं प्रेमप्रपञ्चः कदाचिदशोभनोऽशिवश्चास्ति।

विलपन्तीं शकुन्तलां कण्वो गृहिणीकर्त्तव्यं शिक्षयति, स कामयते यत् पतिसमादृता राजमहिषीपदमवाप्य पवित्रं पुत्रं समुत्पाद्य च बन्धुवियोगजन्यदुःखं विस्मरिष्यति शकुन्तला। यदा पृच्छति शकुन्तला कदा पुनः आश्रमेऽस्मिन् आगमिष्यामि, तदा महर्षिकण्वस्योत्तरमवलोकयन्तु सुधियः—

भूत्वा चिराय सदिगन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं प्रसूय।
तत्सन्निवेशितधुरेण सहैव भर्त्रा
शान्त्यै करिष्यसि पदं पुनराश्रमेऽस्मिन् ।। (अ.शा.४।२२)

शकुन्तलायां प्रस्थितायां विचारमग्नो महर्षिकण्वः कथयति—हन्त भोः शकुन्तलां पतिगृहं विसृज्य लब्धमिदानीं स्वास्थ्यम्, कुतः—

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातोऽस्मि सद्यो विशदान्तरात्मा
चिरस्य निक्षेपमिवार्पयित्वा।। (अ.शा.४।२४)

अस्मिन्नङ्के कण्वस्य शिक्षायामन्तिमे च पद्ये भारतीयधर्मस्य मर्यादा मुखरिता भवति। महाकवेः कण्वस्य वर्णाश्रमधर्मं प्रति आस्थायाः कौटुम्बिकं कर्त्तव्यं प्रति जागरूकतायाश्च मनोहरं प्रतिपादनं प्रसङ्गेऽस्मिन् सम्पन्नम्। सम्पूर्णेऽङ्के स्नेहस्य सौहार्दस्य च पवित्रा मन्दाकिनी प्रवाहिता, तत्र वस्तुतो भारतीयसंस्कृतेः सन्देश एव ध्वनितोऽभवत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्चमाङ्काद् दण्डभूमेराभोगः प्रारभ्यते। तत्र दुष्यन्तस्य प्रमादश्चित्रितः। दुर्वाससः प्रभावः प्रभवति, तेन दुष्यन्तो गर्भिणीं शकुन्तलां परकीयां कथयित्वा न गृह्णाति। स कथयति—

'अनिर्वर्णनीयं परकलत्रम्'।

'अनार्यः परदारव्यवहारः'।।

यद्यपि शकुन्तलायै दण्डः स्वच्छन्दानुरागजनिताविनयस्य कृते, तथापि राज्ञा दुष्यन्तेनापि पापमाचरितं शकुन्तलामवमत्य। अस्य सूचना मिलति राज्ञ्या हंसपादिकाया नेपथ्यत आगते गीते—

अभिनवमधुलोलुपो भवाँस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्?।।
(अ.शा.५.१ संस्कृतच्छाया)

कदाचिद् रहसि राज्ञा सकृदुपभुक्ता अन्यस्या देव्या भयेन पुनरुपेक्षिता सती हंसवती समानावस्थमधुकरोपालम्भापदेशेन राजानमुपालभते। अभिनवसुखकर-वस्तुनः सर्वथैव स्मरणीयत्वात् तवायं विस्मरणप्रकारोऽत्यन्तविगर्हित इति।

षष्ठाङ्के दुष्यन्तस्य पश्चात्तापस्य चित्रणमस्ति। परितापोऽयं तपस्या एवास्ति। आनन्दः सुखं च तस्य दिनचर्यातः पलायितौ। अङ्गुलीयकस्य दर्शनेन शकुन्तलायाः सम्पूर्णः प्रसङ्गः स्मृतः। तेन सः पश्चात्तापस्याग्नौ ज्वलति। अथ च तस्य विह्वलता एतादृशी वृद्धिं गता, येन—

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुष्पम्।
असन्निवृत्त्यै तददतीतमेव
मनोरथानामतटप्रपाताः।। (अ.शा.६.१०)

राज्ञा दुष्यन्तेनापि तपोवनस्य मर्यादां भङ्क्त्वा 'वर्णाश्रमाणां रक्षिता' सन्नपि तस्य मूलोपरि प्रहारः कृत; किन्तु राजा सर्वातिरिक्तसारः सर्वतेजोमयो भवति। यथोक्तं रघुवंशे—

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना।। (रघु.१.१४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इन्द्रादिदेवानामंशरूपायाथर्ववेदस्य मन्त्रैरभिषिक्ताय शासनशपथस्य धनाढ्याय कालिदासस्य नृपाय मानवरूपे को दण्डं विधास्यति? तं स्वयं स एव दण्डयिष्यति। नियतिः स्वयं तस्योपरि स्वकीयं शासनचक्रं स्थापयिष्यति। राज्ञः शरीरे देवानां वासः। सर्वे मिलित्वा तस्मै दण्डं प्रदास्यन्ति। सहृदया भावका दुष्यन्तस्य महता दण्डेन परिचिता एव।

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य कृते शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति।।
(अ.शा.७.२१)

अनयोक्त्या तस्याहतं मर्म एव मुखरितमिव जातम्। पुनश्च यदा बालेन पृष्टे— 'अम्ब! क एष?' शकुन्तला कथयति—'भागधेयानि पृच्छ'। तदा तु दुष्यन्तस्य प्राणान् विद्युत्स्पर्शो भवति। पुनस्तु दुष्यन्तः शकुन्तलायाश्चरणयोः पतति। ततो द्वयोरश्रुधारया पापस्य प्रक्षालनं भवति। दण्डाग्नावस्मिन् तयोः पापो भस्मो भवति, पुनश्च पुत्रस्नेह उत्पद्यते। तेन हृदयव्रणं पूरितं भवति। तदा शकुन्तलादुष्यन्तौ स्वकीयं गार्हस्थ्यजीवनं सर्वाश्रमाणामाधारभूतं प्रतिष्ठापयतः।

इयमेवास्ति शाकुन्तलस्य नैतिकोद्देश्यपरकनाट्यता, यत्रात्यन्तकरुणनिष्ठ-जन्याभिरामता विद्यते। यत्र सत्यं शिवं सुन्दरं समानरूपेण व्यवस्थापितम्। संसारस्य कापि कृतिर्नास्ति एतादृशी मधुरा सुकुमारा शालीना च। विश्वविश्रुतस्य शेक्सपियरमहोदयस्य किमपि नाटकमभिज्ञानशाकुन्तलस्य प्रतिस्पर्धां कर्तुं नैव क्षमः। शेक्सपियरस्य टेम्पेस्टेऽपि शक्तिरस्ति शाकुन्तले च। टेम्पेस्टेबलेन विजयोऽस्ति, किन्तु शाकुन्तले मङ्गलेन सिद्धिः। टेम्पेस्टस्य समाप्तिरसम्पूर्णतायामेवास्ति, किन्तु शाकुन्तलस्य समाप्तिः सम्पूर्णतायां विद्यते। टेम्पेस्टे मिराण्डा सरलताया मधुरतायाश्च मूर्तिरस्ति, किन्तु तस्याः सरलतायाः प्रतिष्ठा अज्ञताया अनभिज्ञतायाश्च उपरि चास्ति। शकुन्तलायाः सरलता गम्भीरा स्थायिनी चास्ति। अत एव विश्वकविना रवीन्द्रनाथठाकुरेण कथितम्—'अभिज्ञानशाकुन्तले आरम्भिकतरुणसौन्दर्यो मङ्गलमयपरमपरिणतौ सफलतां प्राप्य मर्त्यं स्वर्गेण सह सम्मिलयति'[१]।

महाकविना कालिदासेन स्वकीये काव्ये सहजगभीरानन्दवादिन्या मनोभङ्गिमायाः कादम्बिनीं प्रवाहयताऽपि यस्य जीवनदर्शनस्यानावरणं कृतम्, तत्तु

---

१. रवीन्द्रनाथठाकुरः—'प्राचीनसाहित्य' अनुवादकः प.श्रीरामदहिनमिश्रः तृतीयसंशोधित-संस्करणे, पृ.४०-६८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यापकमूर्ध्वगामिनं चास्ति। प्रेम्णः किमप्यात्यन्तिकं महत्त्वं नास्ति, प्रत्युत तस्यान्तिममुद्देश्यं शिवस्य सिद्धिरेवास्ति, अस्य सनातनसत्यस्याभिव्यञ्जनैवास्ति मूलमुद्देश्यमभिज्ञानशाकुन्तलस्य। विश्वकवेः कालिदासस्य मर्मग्राहिणा भावेन चमत्कृतो भूत्वा विख्यातेन जर्मनमनीषिणा गेटेमहोदयेनाभिज्ञानशाकुन्तलस्य प्रशस्तिरगायत। तां संस्कृतेनानूद्य केनापि समुट्टङ्कितम्—

वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम्।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो-
रैश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्।। इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघु-ग्रन्थमाला
[५७]

श्रीयशस्करकवे रत्नकण्ठकवियोजितं
रत्नाकरसूत्रवृत्तिकं

देवीस्तोत्रम्

सम्पादकः
डॉ० कालीप्रसाददुबे
उपाचार्यः, संस्कृतविद्याविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वि.सं. २०५७

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पादकीयम्

देवीगिरिजाचरणचञ्चरीकस्यास्य काश्मीरककवेः केवला कृतिर्**देवीस्तोत्र**मित्युपलभ्यते, यस्यां हिमगिरितनूजाया गिरिजादेव्याः स्तुतिपद्यान्युपनिबद्धानि। शोभाकरमित्रविरचितालङ्काररत्नाकरे विवेचितानामलङ्काराणामुदाहरणत्वेन प्रस्तुतीकरणमस्यापरं वैशिष्ट्यम्। इत्थं प्रयोजनद्वयं सम्पादयति स्तोत्रमिदम्—स्तुतिं गिरिजायाः प्रस्तुतिञ्चालङ्कारोदाहरणानाम्। कश्चन रत्नकण्ठो नाम पश्चाद्वर्ती कवी रत्नाकरस्यालङ्कारसूत्राणि, वृत्त्यंशान्, परिकरश्लोकांश्च योजयित्वा अस्या वर्तमानं नवीनं स्वरूपं ददाति स्म। अनेन निश्चीयते यदलङ्काररत्नाकरमालङ्कारिकेषु मान्यं सम्यग् आदृतञ्च ग्रन्थरत्नमेकमासीत् काश्मीरकदेशे।

देवीस्तोत्रस्य पुष्पिकया ज्ञायते यद् यशस्करः कश्मीरदेशस्य तं नगरमलञ्चकार स्वजन्मना, यत्र देवीगिरिजा शारिकाप्रदानेन प्रद्युम्नमन्वग्रहीत्, यत्र च मारीनदी वराहलोचनभुवा सरिता सङ्गच्छते, यतः प्रवराभिधो लोकविश्रुतो नराधिपः सदेहं हरगिरिमयासीत्।

सम्भाव्यतेऽनेन यत् १७३८ तमे वैक्रमाब्दे जगद्धरस्य स्तुतिकुसुमाञ्जलेष्टीकाकारो रत्नकण्ठ एव यशस्करस्यास्मिन् स्तोत्रशतकेऽलङ्कारसूत्रादीनां योजयिता। एवञ्च, यशस्करः शोभाकराद् (१२ तमाद् वैक्रमाब्दात्) पश्चाद्वर्ती १८ तमाद् वैक्रमाब्दात् पूर्ववर्ती चेत्यनुमीयते। देवीस्तोत्रस्य पाण्डुलिपेः प्रतिद्वयी पूनास्थिते भण्डारकरप्राच्यविद्याप्रतिष्ठाने सुरक्षिता। तयोः प्रथमप्रतौ ('क'संज्ञिकायां) १५ पत्राणि २९ पृष्ठानि च सन्ति। प्रतिपृष्ठे १२ पङ्क्तयः, प्रतिपङ्क्तौ ४५ अक्षराणि च वर्तन्ते। पृष्ठानामाकारः १३'x ६' अस्ति। लिपिश्चास्याः सुस्पष्टा देवनागरी। पाठः प्रायः शुद्ध एव। क्वचिदपि या अशुद्धयस्ता द्वितीयप्रत्या ('ख'संज्ञिकया) दूरीकर्तुं शक्यन्ते, प्रतिष्ठानेऽस्याः क्रमाङ्कः—३८।१८७५-७६ इत्यस्ति।

द्वितीयप्रतौ ('ख'संज्ञिकायां) पत्राणि तु १५ एव सन्ति; किन्तु पृष्ठानि तत्र २८ वर्तन्ते। आकारस्तु तेषां ११'x ६' अस्ति। अत्र प्रतौ प्रतिपृष्ठे १४ पङ्क्तयः प्रतिपङ्क्तौ च ३१ अक्षराणि वर्तन्ते। लिपिश्चास्या अपि देवनागरी सुवाच्या; किन्तु पाठोऽस्याः प्रायशोऽशुद्धः, यस्य संशोधनाय 'क'संज्ञिकायाः प्रत्याः साहाय्यमपेक्षते। प्रतिष्ठानेऽस्याः क्रमाङ्कः—९१।१८८२-८३ इत्यस्ति। प्रतिद्वयेऽपि पत्राणि जीर्णतराणि। अनुमीयते यत्र द्विशतवर्षम् अतीयतैतयोरायुःप्रमाणमिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिद्वये योजिता अलङ्काररत्नाकरस्यांशाः पूनातः प्रकाशितालङ्काररत्नाकरेण सह यत्र तत्र विसंवदन्ति लिपिकारप्रमादजन्यलिपिदोषेणैव नान्येन केनापि कारणेन। संशोधितास्ते तत्र तत्र स्थलेषु।

देवीस्तोत्रस्य प्रकाशनं स्तोत्रसाहित्यस्यालङ्कारशास्त्रस्य च श्रीवृद्धये विदुषाञ्च मुदे भविष्यतीति विश्वसिति मे हृदयमिति।

विदुषां वशंवदः
कालीप्रसाददुबे
उपाचार्यः, संस्कृतविद्याविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणसी
मार्गशीर्षपूर्णिमा,
वि.सं. २०५७

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अलङ्कारानुक्रमणिका

अलङ्कारनामानि	पृष्ठ-संख्या
१. पुनरुक्तवदाभासः	१
२. यमकम्	२
३. छेकानुप्रासः	२
४. वृत्त्यनुप्रासः	२
५. लाटानुप्रासः	३
६. चित्रम्	३
७. उपमा	४
८. कल्पितोपमा	४
९. अनन्वयः	४
१०. असमः	४
११. उपमेयोपमा	५
१२. उदाहरणम्	५
१३. प्रतिमा	५
१४. तुल्ययोगिता	६
१५. दीपकम्	६
१६. प्रतिवस्तूपमा	७
१७. दृष्टान्तः	७
१८. निदर्शना	७
१९. स्मृतिः	७
२०. विनोदः	८
२१. व्यासङ्गः	८
२२. व्यतिरेकः(प्रथमः)	८
२३. व्यतिरेकः (द्वितीयः)	९
२४. प्रतीपम्	९
२५. वैधर्म्यम्	९

अलङ्कारनामानि	पृष्ठ-संख्या
२६. रूपकम्	९
२७. अभेदः	१०
२८. परिणामः	१०
२९. अपह्नुतिः	१०
३०. सन्देहः	११
३१. वितर्कः	११
३२. उत्प्रेक्षा	१२
३३. भ्रान्तिमान्	१२
३४. उल्लेखः	१३
३५. प्रतिभा	१३
३६. क्रियातिपत्तिः	१३
३७. अतिशयोक्तिः	१४
३८. अप्रस्तुतप्रशंसा	१४
३९. व्याजस्तुतिः	१४
४०. प्रत्यनीकम्	१५
४१. विनोक्तिः	१५
४२. सहोक्तिः	१६
४३. समासोक्तिः	१६
४४. श्लेषः	१६
४५. परिकरः	१७
४६. पर्यायोक्तम्	१७
४७. निश्चयः	१८
४८. आक्षेपः	१८
४९. विध्याभासः	१८
५०. सन्देहाभासः	१८

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५१. विकल्पाभासः १९
५२. विरोधाभासः १९
५३. विभावना १९
५४. विशेषोक्तिः १९
५५. असङ्गतिः २०
५६. अन्योन्यम् २०
५७. विपर्ययः २०
५८. अचिन्त्यम् २०
५९. विषमम् २१
६०. समम् २१
६१. विचित्रम् २१
६२. विशेषः २२
६३. व्याघातः २२
६४. अशक्यम् २३
६५. व्यत्यासः २३
६६. समता (समाधिः) २३
६७. उद्रेकः २३
६८. तुल्यम् २४
६९. अनादरः २४
७०. आदरः २४
७१. अनुकृतिः २५
७२. प्रत्यूहः २५
७३. प्रत्यादेशः २५
७४. समाधिः २५
७५. अर्थान्तरन्यासः २६
७६. व्याप्तिः २६
७७. अनुमानम् २६
७८. हेतुः २७
७९. आपत्तिः २७
८०. अर्थापत्तिः २७
८१. विधिः २८
८२. नियमः २८
८३. परिसंख्या २८
८४. प्रतिप्रसवः २९
८५. तन्त्रम् २९
८६. प्रसङ्गः २९
८७. विकल्पः २९
८८. समुच्चयः ३०
८९. परिवृत्तिः ३०
९०. पर्यायः ३०
९१. क्रमः ३०
९२. वर्धमानकम् ३१
९३. अवरोहः ३१
९४. अतिसारः ३१
९५. शृङ्खला ३२
९६. तद्गुणः ३२
९७. मीलितम् ३२
९८. विवेकः ३२
९९. परभागः ३३
१००. उद्भेदः ३३
१०१. गूढम् ३३
१०२. सूक्ष्मम् ३३
१०३. व्याजोक्तिः ३४
१०४. वक्रोक्तिः ३४
१०५. स्वभावोक्तिः ३४
१०६. भाविकम् ३५
१०७. उदात्तम् ३५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीयशस्करकवे रत्नकण्ठकवियोजितं रत्नाकरसूत्रवृत्तिकं

देवीस्तोत्रम्

❀ ❀ ❀

ओं श्रीगणेशाय नमः। ओं नमः सरस्वत्यै[1]।

रत्नाकराभ्यन्तरतो गृहीत्वालङ्कारसूत्राणि यथाक्रमेण।
वन्दीव देव्याः गिरिराजपुत्र्याः करोमि शंसञ्छ्रुतिगोचराणि।।

श्रीत्रयीश्वरात्मजश्रीशोभाकरमित्रविरचितेऽलङ्काररत्नाकरेऽलङ्कारसूत्राणि—

१. पुनरुक्तवदाभासम्

सूत्रम्— **आमुखैकार्थपदं पुनरुक्तवदाभासम्।**

उदाहरणम्— **क्षमावनीलोकजनार्तिहानौ द्युमत्सुपर्वद्रविणार्थदात्री।**
व्यनक्तु सिंहात्तपदाङ्घ्रिरुच्चैरुमाम्बिका मे दयया महोत्सवम्।।१।।

अत्र 'क्षमा अवनी' इति, 'लोकजन' इति आर्तिहानि इति, 'द्युमत्सुपर्व' इति, 'द्रविण अर्थ' इति 'पद अङ्घ्रि' इति, 'उमा अम्बिका' इति, 'मह उत्सव' इति, आमुखे एकार्थत्वं वस्तुतस्तु पर्यवसानेऽन्यार्थत्वेन पुनरुक्तवदाभासं नामालङ्कारः।

परिकरश्लोकः— अनन्वितत्वाद्वाच्यत्वं[2] कायादेर्न प्रकल्पते[3]।
मुख्यार्थबाधसम्बन्धफलाभावान्न लक्ष्यता ।।
असम्बद्धाभिधायित्वप्रसङ्गाद्[4]व्यङ्ग्यतापि न ।
अकृत्रिमस्य चार्थस्य न धर्मः पुनरुक्तता ।।

---

१. ओं नमो गुरवे ओं-ख.;
२. कायादेर्वाच्यत्वं (अ.र.)।
३. प्रकल्पिते;
४. असम्बन्धामि......-ख.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुनरुक्तोऽपि वा तत्त्वे स एव स्यादलङ्कृतिः ।
पौनरुक्त्यमलङ्कारस्तेन नार्थस्य कस्यचित् ।। इति परिकरश्लोकः।

२. यमकम्

सूत्रम्— **तुल्यरूपसमुदायवृत्ति[1] यमकम् ।**

वृत्तिः— तुल्यरूपत्वं स्वरव्यञ्जनसमुदायगतस्य क्रमस्य तुल्यत्वे भवति।

उदाहरणम्— कम्पात्कृतान्तस्य कृतानुकम्पा कम्पाति नो याङ्घ्रिनतेन्द्रकम्पा।
कालीव सन्तापहरी पिकाली काली नृणां सत्फलदास्तु काली।।२।।

३. छेकानुप्रासः

सूत्रम्— **द्वयोर्द्वयोः साम्यं छेकानुप्रासः[2] ।**

वृत्तिः— द्वयोर्द्वयोः स्वरव्यञ्जनसमुदाययोर्व्यञ्जनमात्रसमुदाययोर्वा तुल्यक्रमयोः साम्यम्।

उदाहरणम्— सुरासुरेन्द्रामलमौलिगस्त्रगमन्दमन्दाररजोऽरुणाङ्घ्रि।
विसारिसंसाररुजापहानिसाहानि देयात्सदयाद्रिजा वः।।३।।

४. वृत्त्यनुप्रासः

सूत्रम्— **अन्यथा तु वृत्त्यनुप्रासः।**

वृत्तिः— अन्यथा छेकानुप्रासविपरीतो वृत्त्यनुप्रासः। वैपरीत्यं च न द्वयोर्द्वयोः, अपि त्वेकस्यापि, एकस्यापि व्यञ्जनस्य बहूनां समुदायानां व्यञ्जनानां च साम्यं वृत्त्यनुप्रासः।

उदाहरणम्— जगद्रणोपद्रवकारिरौद्रकर्मासुरेन्द्रार्पितदीर्घनिद्रा।
भद्राणि वो द्राग्बुधबोधदात्री[3] ददातु रुद्रस्य वधूर्दयार्द्रा।।४।।

५. लाटानुप्रासः

सूत्रम्— **तुल्याभिधेयभिन्नतात्पर्यशब्दावृत्तिर्लाटानुप्रासः।**

उदाहरणम्— हर्यक्षहर्यक्षरथाधिरूढा शुभ्रांशुशुभ्रांशुकचत्किरीटा।
देवेन्द्रदेवेन्द्रवधूर्नमस्या शिवा शिवा सास्तु दयापरा वः।।५।।

---

१. तुल्यरूपवृत्ति-ख.; तुल्यरूपसमुदायावृत्तिर्० (अ.र.)।

२. द्वयोर्द्वयोः समुदाययोः (अ.र.)।

३. ....धात्री-ख.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सङ्ग्रहश्लोक: — ऐक्येऽप्यर्थस्य भिन्नत्वमभिधेयांशभेदत:।
लक्ष्यादिना वा तात्पर्यभेदे नान्य: समुन्नय:[1]।। इति।
(सङ्ग्रहश्लोक:)।

६. चित्रम्

सूत्रम्— **पद्मादिलिपिवर्णवच्चित्रं च चित्रम्।**

वृत्ति:— पद्मखड्गादिसन्निवेशानां नियतस्थाननिवेशितत्वेन यत्र लिप्यक्षराणि निमित्तीभवन्ति तथाविधमन्यदपि प्रतिलोमानुलोमापशब्दाभासं यदाश्चर्यकारितया चित्रं तच्चित्रम्।

उदाहरणम्— या महाप्तिहतापाया या पातार्तिहराभया।
या भरात्कृतरुच्याया याञ्चारुद्धमहामया।।१।।
सा दुर्गा पातु वो धैर्यधूतदानवसाहसा।
सारसाभमुखच्छाया जितसन्तततामसा।।२।।
सादरा पापहरणे सञ्चारजितसारसा।
सा रातु हासभासा तु मुखपद्मा रसावहा।।३।।

पूर्वेण पद्मबन्ध: उत्तराभ्यां खड्गबन्ध:।...............एवं मुरजबन्ध-क्रियागुप्तादि बोद्धव्यम्।

७. उपमा

सूत्रम्— **उपमानेनोपमेयस्य[2] सादृश्यमुपमा।**

वृत्ति:— प्रसिद्धगुणेनोपमानेनाप्रसिद्धगुणस्योपमेयस्य सादृश्यहेतुना गुणादिना धर्मेण साधर्म्यप्रतिपादनमुपमा।

उदाहरणम्— गङ्गेव नित्याश्रितपुण्डरीका फलप्रदा कल्पलतालतेव।
शशिप्रभेवामृतदा प्रसन्ना तुषारशैलेन्द्रसुतावताद् व:।।६।।

सङ्ग्रहश्लोक:—प्रसिद्धेनाप्रसिद्धस्य सादृश्यमुपमा मता।
प्रस्तुतस्य तु नान्येन व्यभिचारस्य दर्शनात्[3]।। इति सङ्ग्रहश्लोक:।

---

१. वा तात्पर्यभेदो नान्य: समन्वय:।

२. उपमानोपमेयस्य............(अ.र.)।

३. धर्मो गुण: क्रिया वापि द्वयमेवेत्यसङ्गतम्।
अभावादिमुखेनापि सादृश्यस्य निदर्शनात्।। इत्यधिक: पाठ: (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८. कल्पितोपमा

सूत्रम्— **कल्पितेन कल्पितोपमा।**

वृत्तिः— तत्त्वतोऽसता प्रौढोक्तिनिर्मितेन[१] काल्पनिकेनोपमानेनोपमेयस्यार्थात्काल्पनिकसादृश्यं कल्पितोपमा। फलं चात्र प्रतिभटभूतवस्त्वन्तराभावप्रतिपादनम्।

उदाहरणम्— हृन्मेरुगां कल्पलतामिव त्वामभीष्टदात्रीं श्रयतो बुधस्य।
मृडानि सत्पत्रफलान्वितापि नः प्रीतये चित्रलतेव सम्पत्।।७।।

९. अनन्वयः

सूत्रम्— **तेनैव तदेकदेशेन तदवसितभेदेन वानन्वयः**[२]।

उदाहरणम्— यस्यास्तुलां दर्पणगा करोति निजैव लावण्यवतीव मूर्त्तिः।
असौ सदाश्लिष्टगिरीशपादा गौरीव तच्छर्म तनोतु गौरी।।८।।

परिकरश्लोकः— उपमानान्तरविरहस्त्रिष्वपि भेदेषु गम्यते येन।
तदनन्वयस्त्रिधासावसमे तु स मुख्यतो वाच्यः।।९।।

१०. असमः

सूत्रम्— **तद्विरहोऽसमः।**

वृत्तिः— उपमानस्य विरहोऽसम्भवस्तत्प्रतिपादनमसमाख्योऽलङ्कारः।

उदाहरणम् —अगण्यकारुण्यवती शरण्या पुण्या धरण्यां दिवि नागलोके।
न विद्यते कापि तवेशि तुल्या पत्युः शरीरादपि यार्धदात्री।।९।।

सङ्ग्रहश्लोकः—यत्रोपमानस्य न सम्भवोऽस्ति तत्रासमः स्यादुपमा न लुप्ता।
सम्भाव्यमानस्य सतः समानधर्मादिकस्य त्वनुदीरणे सा।।

इति सङ्ग्रहः।

११. उपमेयोपमा

सूत्रम्— **परस्परमुपमानोपमेयत्वमुपमेयोपमा**।।११।।

वृत्तिः— उपमानस्योपमेयता उपमेयस्याप्युपमानत्वमुपेति उपमेयोपमालङ्कारः।

उदाहरणम्— चन्द्राभिरामं मुखवत्किरीटं किरीटवद्भाति मुखं भवत्याः।
सपद्मरागोऽङ्घ्रिरिवाम्ब हारो विराजते हार इवैष तेऽङ्घ्रिः।।१०।।

---

१. निमित्तेन-ख.।

२. ....तदेकदेशेनावसितभेदेन वाऽनन्वयः-अ.र. सम्मतपाठः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१२. उदाहरणम्

सूत्रम्— **सामान्योद्दिष्टानामेकस्य निदर्शनमुदाहरणम्।।१२।।**

वृत्तिः— सामान्येनाभिहितानामेकस्येवादेरुपादानमुखेन प्रतीतिविशदीकरणार्थं निदर्शनमुदाहरणमलङ्कारः।

उदाहरणम्— अनन्यतुल्यर्द्धिरनन्यजस्य जेताखिलप्रह्वबुधोऽस्तमन्युः।
तपोभिराप्यः पतिरङ्गनाभिस्त्वयेव शर्वस्तुहिनाद्रिपुत्रि।।११।।

परिकरश्लोकः— उपमानोपमेयत्वं भिन्नयोरुपमेत्यतः।
सामान्यस्यास्फुटत्वेन जातस्य[1] स्फुटसंविदे।।
तदंशस्य विशेषस्य क्रियते यन्निदर्शनम्।
तदुदाहरणं तस्यामन्तर्भावोऽस्य किङ्कृतः।।

१३. प्रतिमा

सूत्रम्— [2]**अन्योन्यधर्मयोगादार्थतौपम्यं प्रतिमा।।१३।।**

उदाहरणम्— बलानि भग्नानि सहेमवाहरथैस्तथास्त्राणि निराकृतानि।
कार्यं त्वया यद्युधि दानवानां त्वद्वाहसिंहेन कृतं तदीशि।।१२।।

परिकरश्लोकः— कार्येण[3] (यथा कारणता) परस्य
तथैव चास्येति विभावनायाम्।
इयं विभिन्ना न च विद्यतेऽत्र
विरोधसंस्पर्शवती प्रतीतिः।।
अत एव च धर्मधर्मिणोर्यन्न विरूपत्वमिहास्ति लेशतोऽपि।
स्फुटमेव ततो विरूपयोगाद्विषमादत्र निरूप्यते विभेदः।।

१४. तुल्ययोगिता

सूत्रम्— **सकृद्धर्मस्य निर्देशे प्रस्तुतानामप्रस्तुतानां वा तुल्ययोगिता।।१४।।**

उदाहरणम्— श्रियं सुराणां दिशति प्रहृष्टा दत्ते विपत्तिं कुपितासुराणाम्।
हिनस्ति तापं भविनां दयार्द्रा दृष्टिश्च मूर्तिश्च शिवे त्वदीया।।१३।।

---

१. 'ज्ञातस्य' (अ.र.)।
२. 'अन्यधर्मयोगात् (अ.र.)। अन्योन्यधर्मयोगार्थ-ख; ३. 'कार्ये' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१५. दीपकम्

सूत्रम्— **मिश्राणां दीपकम्।।१५।।**

वृत्तिः— सकृदित्यनुषज्यते। सकृद्धर्मोपादानेन प्रस्तुतानामप्रस्तुतानां[1] सिद्धत्वे आर्थमौपम्यं दीपकम्।

उदाहरणम्— धृत्या समीरः शुचिरूष्मभासा दीप्त्या रविश्चन्द्रिकया शशाङ्कः।
भाति त्वयात्मानतिरिक्तयेशि शक्त्या जगत्कार्यकरो महेशः।।१४।।

१६. प्रतिवस्तूपमा

सूत्रम्— **वाक्यद्वयेऽसकृत्प्रतिवस्तूपमा।।१६।।**

वृत्तिः— धर्मस्य निर्देश इत्येव। वाक्यार्थयोरुपमानोपमेयभावस्यार्थत्वे साधारणधर्मस्यासकृदुपादाने प्रतिवस्तूपमा।

उदाहरणम्— त्वमेव संसाररुजापहारे महेश्वरानुग्रहशक्तिरीशा।
तृष्यच्चकोरामृतपानदाने राकापतेरेव रुचिः प्रगल्भा।।१५।।

१७. दृष्टान्तः

सूत्रम्— **प्रतिबिम्बेन दृष्टान्तः।**

वृत्तिः— वाक्यद्वये धर्मस्य बिम्बप्रतिबिम्बभावेनावस्थानम् आर्थमौपम्यं दृष्टान्तः।

उदाहरणम्— वार्येव शक्नोति नियन्तुमग्निं जगद्गतं हन्ति तमोऽर्क एव।
सप्तार्चिरेवेन्धनदाहदक्षः स्मृता त्वमेवेशि निहंसि मोहम्।।१६।।

१८. निदर्शना

सूत्रम्— **असति सम्बन्धे निदर्शना।।१८।।**

वृत्तिः— असति असम्भवति सम्बन्धे आर्थमौपम्यं निदर्शना।

उदाहरणम्— जग्राह लक्ष्मीं कमलान्मुखं ते कन्दर्पचापादपि वक्रतां भ्रूः।
नीलोत्पलात्कान्तिमथाम्ब चक्षुर्दया त्वया शंस कुतो गृहीता।।१७।।

परिकरश्लोकः— सम्बन्धबाधे सति लक्षणातो यत्रोपमायाः प्रतिपत्तिरस्ति।
निदर्शना तत्र यदा तु किञ्चिद्वस्त्वेव लक्ष्येत तदा परे स्युः।।

---

१. 'अप्रस्तुतानां अ.र. प्रस्तुतानां सिद्धत्वे-ख.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१९. स्मृतिः

सूत्रम्— **सदृशानुभवात् स्मरणे स्मृतिः ।।१९।।**

वृत्तिः— पूर्वानुभूतस्य सदृशवस्त्वन्तरदर्शनेन संस्कारप्रबोधात् स्मरणे यदार्थमौपम्यं स स्मृतिरलङ्कारः।

उदाहरणम्— मनुष्यलोके शिवभक्तियुक्तं गणत्वमाप्तं प्रतिहारगं माम्।
दृष्ट्वा ध्रुवं भस्मसिताङ्गरागं स्मरिष्यतीशानि शिलादसूनुम्।।१८।।
नीलाम्बुजाम्भोजमराललोकशैवालबालोर्मिविलोकनेन।
स्नातुं गतो मानसतीरगोऽहं दिक्सुन्दरीं मन्दगतिः स्मरामि।।१९।।

२०. विनोदः

सूत्रम्— **अन्यासङ्गाद् कौतुकविनोदो विनोदः।।२०।।**

वृत्तिः— असन्निहितेऽनुभूतेऽपि वाभिलष्यमाणेऽर्थे प्रतिच्छन्दसदृशादिवस्त्वन्तरानुभवात्मकादन्यासङ्गात्कौतुकातिवाहनं विनोदः।

उदाहरणम्— कदाचिदाम्नायमुखाच्छृणोमि पृच्छामि भक्त्याथ गुरून् कदाचित्।
त्वां द्रष्टुमुत्कण्ठितधीः शिवेऽम्ब चित्रे कदाचित्स्वयमुल्लिखामि।।२०।।

२१. व्यासङ्गः

सूत्रम्— **अनुभवस्मृत्यादिप्रत्यूहो व्यासङ्गः।।२१।।**

वृत्तिः— प्रक्रम्यमाणस्य प्रक्रान्तस्य वानुभवस्य स्मृतेः, आदिशब्दात् क्रियान्तरस्य वा पूर्ववदन्यासङ्गादन्तरायः प्रत्यूहो व्यासङ्गः।

उदाहरणम्— संसारदुःखस्मृतिबाध्यमानं क्लिष्टञ्च शब्दादिभिरिन्द्रियार्थैः।
चेतः सुखीकर्तुमिदं तवाम्ब पदारविन्दद्वितयं स्तवीमि।।२१।।

२२-२३ व्यतिरेकः

सूत्रम्— **उपमेयादन्यस्य न्यूनत्वं प्रतिकूलत्वं वा व्यतिरेकः।**

वृत्तिः— इह धर्माणां साधारणत्वे उपमानोपमेयभावः, तत्रापि प्रसिद्धगुणत्वेनाधिकगुणस्योपमानस्य विपर्ययादुपमेयत्वं तत्र यदा उपमेयोत्कर्षार्थमुपमानस्य केनचिद्धर्मेण साम्ये धर्मान्तरस्य तावन्न्यूनत्वमुपनिबध्येत, अर्थादितरस्याधिकगुणत्वं तदैको व्यतिरेकः। यत्र तु उपमेयप्रतिकूलतोपमानस्य विवक्ष्यते स द्वितीयः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— कृतार्थता यच्छति कामधेनुरुपेयुषां कल्पलता च कामान्।
विनापि याञ्चां वरसिद्धिदा त्वं दूरस्थितानामपि भक्तिभाजाम्।।२२।।

सूत्रम्— **सजातीयस्यातद्धर्मत्वं च**।।२३।।

वृत्तिः— व्यतिरेक इत्यनुषज्यते। येन यस्य सजातीयत्वं तस्यातद्धर्मत्वं व्यतिरेकः।

उदाहरणम्— यश्चन्द्रहृद्यो नखरांशुमैत्रीं व्यनक्ति मुक्तालिगुणानुषङ्गः।
हर्यक्षपत्रप्रणयी मृडान्याः स पादपद्मोऽवतु वोऽस्तपङ्कः।।२३।।

२४. प्रतीपम्

सूत्रम्— **अधिकगुणस्यानादरः प्रतीपम्**।।२४।।

वृत्तिः— अधिकगुणस्योपमानस्यान्यस्य वा न्यक्कारेण तुल्यत्वापादनेनानादरस्तिरस्कारः प्रतीपम्।

उदाहरणम्— चन्द्रो ययाचे वदनस्य कान्तिं श्रीहस्तपद्मश्चरणस्य शोभाम्।
भ्रुवोर्विलासं तव कामचापः कण्ठस्य लक्ष्मीमपि पाञ्चजन्यः।।२४।।

२५. वैधर्म्यम्

सूत्रम्— **उद्दिष्टस्य पक्षतयानुनिर्देशो वैधर्म्यम्**।।२५।।

वृत्तिः— पूर्वाभिहितार्थापेक्षया प्रतिभटभूतादर्थादर्थान्तराणां पश्चान्निर्देशो वैधर्म्यालङ्कारः। न चायं द्वितीयो व्यतिरेकः साधर्म्यगन्धस्याप्यभावात्।

उदाहरणम्— मर्त्योऽहमम्ब त्वममर्त्यमूर्तिरज्ञोऽहमीशि त्वमशेषवेत्री।
द्राग्दुर्भगोऽहं त्वममेयरूपा विश्वेश्वरी त्वं त्वहमस्मि दासः।।२५।।

२६. रूपकम्

सूत्रम्— **आरोपो रूपकम्**।।२६।।

वृत्तिः— भिन्नयोः सामानाधिकरण्येन निर्देश आरोपो न त्वन्यत्रान्यारोपः।

उदाहरणम्— नेत्रोत्पलानन्दकृदाननेन्दुः समप्रसादोऽवतु वः शिवायाः।
मनःसमुद्रं गिरिशस्य दृष्टं करोति जातोत्कलिकोत्करं यः।।२६।।

२७. अभेदः

सूत्रम्— **नियतधर्महानावारोप्यमाणस्यातिसाम्यमभेदः**।।२७।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— आरोप्यमाणस्य धर्मो गुणक्रियादिः, तस्य नियतस्य निषेधे परिशिष्टसमस्तधर्मान्तरसद्भावाऽभ्यनुज्ञाने विषयस्य तेन सहातिसाम्यप्रतिपादनं विषयविषयिणोर्भेदाभावादभेदोऽलङ्कारः।

उदाहरणम्— प्रकाशयन्त्या भुवनप्रसादं कालीति नाम प्रथितं वहन्त्याः।
स्कन्दाम्बिके तेऽथ कलिन्दजाया अनिम्नगत्वेन कृतोऽसि भेदः।।२७।।

२८. परिणामः

सूत्रम्— **प्रकृतोपयोगित्वे परिणामः।।२८।।**

वृत्तिः— आरोप्यमाणस्येत्यनुषङ्गः। आरोप्यमाणस्य यथासम्भव उचितो न तथारोपविषयस्येति प्रकृते प्रस्तावे उपयोगित्वाद्विषयरूपस्याप्रकृतस्य यत्कार्यं तत्प्रकृतारोपविषयेण वस्तुतः सम्पाद्यते न प्रतीतिमात्रेणेति प्रकृतमप्रकृतरूपतया परिणमतीति परिणामालङ्कारः।

उदाहरणम्— करावलम्बो निरयप्रपाते मोहान्धकारप्रशमे प्रदीपः।
प्लवो भवाब्धेस्तरणे नराणां गुहो रणे त्वच्चरणप्रणामः।।२८।।

परिकरश्लोकः— प्रकृतानुगुणत्वं नेष्टा प्रकृतोपयोगिता सा हि।
सर्वत्र रूपकेऽस्मिन् साक्षात्तत्कारिता किन्तु ।। इति सङ्क्षेपः।

२९. अपह्नुतिः

सूत्रम्— **विषयस्य मुखस्य[1] वापह्नवेऽन्यविधिरपह्नुतिः।।२९।।**

वृत्तिः— आरोपविषयस्य निषेधेऽन्यस्य विषयिणो विधानमेका, मुख्यस्य चन्द्रादेरन्यस्य मुखचन्द्रादेर्गौणस्य विधिरपरापह्नुतिः।

उदाहरणम्— असौ शशी दैन्यनिशातमोजित्
सुराम्बुजोल्लासकृदेष भानुः।
नाहं हि सिंहो मृगहेति भक्त्या
गणैः स्तुतोऽव्यात्स हरिर्भवान्याः।।२९।।

३०. सन्देहः

सूत्रम्— **तस्यापि सन्दिह्यमानत्वेन[2] सन्देहः।।३०।।**

---

१. 'मुख्यस्य' (अ.र.)।
२. 'सन्दिह्यमानत्वे' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— विषयस्य इत्येव। तच्छब्देनारोप्यमाणस्य प्रत्यवमर्शः। कमलं वदनं वेति वार्थसम्भिन्ना प्रतीतिः सन्देहः।

उदाहरणम्— अभीष्टदानाद्भवसिन्धुतारात्परासुजीवार्पणतस्त्वमीशि।
किं कल्पवल्लिः किमु नौः सुधा किं प्रोक्तेति भक्तैर्गिरिजावताद्वः।।३०।।
किं सिन्धुवारस्रगसौ निवीता तारावली किं वदनेन्दुमाप्ता।
किं कण्ठगा ते सखि हारवल्ली प्रोक्तेति गौरी जययावताद्वः।।३१।।

३१. वितर्कः

सूत्रम्— **सम्भावितसम्भाव्यमानापोहो वितर्कः।।३१।।**

वृत्तिः— सामान्येन दृष्टे वस्तुनि आशङ्कितस्य आशङ्क्यमानस्य वा विशेषस्य बाधकेनोत्पुंसनं वितर्कः। अत एव बाधकसद्भावात्साधकबाधकप्रमाणाभावनिमित्तात्सन्देहादस्य भेदः।

उदाहरणम्— इयं तडित्किं क्व स मेघखण्डो दावानलार्चिः किमु कुत्र धूमः।
चण्डांशुमूर्तिः किमु कुत्र तेऽश्वाः प्रोक्तेति दैत्यैर्युधि चण्डिकाव्यात्।।३२।।

परिकरश्लोकः— अर्थद्वयोल्लेखवती मतिर्या ससंशया केवलवस्तुनिष्ठा।
सम्भावनाबाधकबाधनीया यत्र स्फुटस्तत्र भवेद्वितर्कः।।

३२. उत्प्रेक्षा

सूत्रम्— **विषयत्वेन[1] सम्भावनमुत्प्रेक्षा।।३२।।**

वृत्तिः— विषयत्वेनार्थाद्विषयस्य सम्भावनं भवितव्यमनेन स्थाणुर्वेत्याद्य-[2] निश्चयात्मकवितर्कादिशब्दाभिधेयसम्भावनप्रत्ययविषयीकृतत्वमुत्प्रेक्षा। अतश्चानिश्चयात्मकतया सम्भावनायाः सन्देहमूलत्वं न त्वध्यवसायगर्भता। इवाद्युपादाने वाच्या तदप्रयोगे त्वार्थी।

उदाहरणम् — गौरीरुचा प्राप्तगुहानुषङ्गा सकेसरो यद्धरिपत्रयुक्ता।
पुनातु रत्याः कमितुः प्रियस्य सञ्जीवनीवौषधिरद्रिजा वः।।३३।।
भालस्थलीचित्र[3]कदेशनात्त भयादिव क्लृप्तपदो मृगेण।
ओष्ठप्रभाव्यञ्जितसान्ध्यरागः[4] पुनातु वः शैलभुवो मुखेन्दुः।।३४।।

---

१. 'विषयित्वेन' (अ.र.)।
२. 'स्थाणुर्नेत्याद्य' (अ.र.)। 'स्थाणुर्वेत्यादिनिश्चया-ख.।
३. 'चित्रित'-ख.;　　४. 'भानुरागः'-ख.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सङ्ग्रहश्लोक: — इवादौ निश्चयाभावाद् विषयस्य परिग्रहात्।
क्वचिदध्यवसायेन नोत्प्रेक्षापि तु संशयात्।।
अद्धा नूनं सत्यमित्येवमादौ शब्द(शाब्द:)
साक्षान्निश्चयोऽस्तीति युक्ता।
नैवोत्प्रेक्षा सा हि सम्भावनाया:[1]
सा चापि स्यात्संशयान्नात्र सोऽस्ति।।

३३. भ्रान्तिमान्

सूत्रम्— **अन्यरूपतया निश्चयो भ्रान्तिमान्।।३३।।**

वृत्ति:— विषयस्यान्यरूपस्यापि रूपान्तरत्वेनासम्यगभिमानरूपे निश्चये[2] भ्रान्तिमान्।

उदाहरणम्— देवि द्विपेन्द्रकटद्विरेफा: पादौ तवाम्भोजधिया प्रसन्ना:।
नमत्सुरोत्तंस गतेन्द्रनीलमणीन् व्रजन्त्युत्पलवाञ्छयापि।।३५।।

परिकरश्लोक:— सन्देहसम्भावनयोर्यथास्ति प्रतीतिभेद: स्फुट एव तद्वत्।
सादृश्यहेत्वन्तरयोर्भ्रमेषु न लेशत: क्वापि विशेषबुद्धि:।।
प्रतीतिभेदेन विना न वाच्य: कुत्राप्यलङ्कारगतश्च भेद:।
निमित्तभेदेन न भिन्नतायां प्रसज्यते सा खलु संशयादौ।।

३४. उल्लेख:

सूत्रम्— [3]**एकस्याप्यनेकधा कल्पनमुल्लेख:।।३४।।**

वृत्ति:— एकस्य वस्तुनस्तद्धर्मयोगेनानेकधाकल्पनमुल्लेख:।

उदाहरणम्— मातेति देवैर्दुहितु: सुतेति पितृव्रजै: स्वामिसुतेति शैलै:।
प्रभो: प्रियेति प्रमथै: प्रहृष्टैर्दृष्टा विवाहेऽवतु पार्वती व:।।३६।।

३५. प्रतिभा

सूत्रम्— **सम्भाव्यमानस्य प्रतिभा ।।३५।।**

वृत्ति:— कल्पनमित्यनुषज्यते। प्रमाणान्तरेणावगतस्य तत्तत्प्रस्तावादिकरणवशात्सम्भाव्यमानस्यार्थस्य कविना प्रतिभाख्येन चक्षुषा कल्पनमुल्लेखरूपं प्रतिभा।

---

१. 'सम्भावनायाम्' (अ.र.)।
२. 'रूपो निश्चयो' (अ.र.); ३. 'एकस्यानेकधा' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— साम्राज्यमुर्व्याममरालयाप्तिर्विद्याधरेशत्वमथेन्द्रता वा।
अवाप्यते देवि नरैर्यदि त्वं तुष्टासि विश्वेश्वरि शम्भुपत्नि।।३७।।

परिकरश्लोक:—यद्यप्यस्यां कल्पनं कारणानां सम्भाव्यानां नानुमानं तथापि।
पूर्वं क्लृप्तं ह्यत्र वस्तूपबद्धं तत्र त्वार्थ: कल्पनाया निबन्ध:।।

३६. क्रियातिपत्ति:

सूत्रम्— [१]**यद्यर्थव्यक्ताव्यक्तसम्भाव्यमानस्य क्रियातिपत्ति:।।३६।।**

वृत्ति:— कल्पनमित्यनुषज्यते। असम्भाव्यमानस्य कल्पनं क्रियातिपत्ति:, यदि शब्दार्थस्य यद्यादिभिरुक्तिश्चेत्स्यात्। अत एवातिशयोक्तेर्भेद:। तत्र हि सिद्धत्वम्।

उदाहरणम्— स्मरस्य देहं यदि नेन्दुमौलिस्त्वद्धेतुना देवि रुषादहिष्यत्।
तं जीवयित्वा तपसो बलेन तस्याहरिष्यो न शरीरतोऽर्धम्।।३८।।
मलेन्द्रकं स्याद्यदि वारिराशि: स्वर्णाकृतिर्मेरुरिणो यदि स्यात्।
शर्वाणि सर्वक्षिति भूर्जपत्रे तदा लिखेदादिकविर्गुणांस्ते।।३९।।

३७. अतिशयोक्ति:

सूत्रम्— **अध्यवसानमतिशयोक्ति:।।३७।।**

उदाहरणम्— सदैव सर्वत्रगता ददासि फलानि सर्वाणि नृणां प्रसन्ना।
हिमाचलादोषधिजन्मभूमेर्जाता त्वमेवौषधिरप्यपर्णा।।४०।।

सङ्ग्रहश्लोक:— अप्रस्तुतात्प्रस्तुतस्य गतिर्यातिशयं विना।
साप्रस्तुतप्रशंसान्या विज्ञेयातिशयोक्तिधी:।।

३८. अप्रस्तुतप्रशंसा

सूत्रम्— **अप्रस्तुतादन्यप्रतीतिरप्रस्तुतप्रशंसा।।३८।।**

वृत्ति:— सामान्याद्विशेषस्य कारणात्कार्यस्य कार्याद्वा कारणस्य सद्धर्मविरुद्धादेश्च तथाविधस्याप्रस्तुतात्प्रस्तुतस्य प्रतिपत्तिरप्रस्तुतप्रशंसा।।

उदाहरणम्— पादौ समाकृष्य चरन् वने य: कृश्नेन (कृष्णेन) लुब्धेन करे गृहीत:।
प्रीणाति चेत: स्फुटचन्द्रकश्री: स नीलकण्ठ: क्षितिभृत्सुते ते।।४१।।

---

१. 'यद्यर्थोक्तावसम्भाव्यमानस्य.........'(अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३९. व्याजस्तुतिः

सूत्रम्— **स्तुतिनिन्दाभ्यां व्याजस्तुतिः।।३९।।**

वृत्तिः— अन्यप्रतीतिरित्यनुषङ्गः। एषापि लक्षणामूलैव। तेनात्र निन्दास्तुत्योर्लक्ष्यत्वेन न पुनर्व्यङ्ग्यतया गम्यत्वं वक्तृप्रकरणादिपर्यालोचनेन आमुख एव वाच्यबाधनात्स्तुत्या निन्दा निन्दया वा स्तुतिर्यत्र भवति सा व्याजस्तुतिः।

उदाहरणम्— पानं सुराणां कुरुषे सतृस्ना (सतृष्णा) रुषा द्विषः पश्यसि सर्वदेवान्।
नीलं पिधत्से हरिणा प्रयासि सन्मङ्गलाचाररतापि का सा।।४२।।

त्वं ग्रावतो लब्धजनिर्जनित्री न ज्ञातजातिश्च पतिः कपाली।
पुत्रो विशाखः शरलब्धजन्मा जयत्यसौ योग्यसमागमो वः।।४३।।

मातॄः सदा पश्यसि नाग्निलग्ना न वन्दसे त्वं श्वशुरौ कदापि।
गृह्णासि देहादपि पत्युरर्धं वन्द्यासि पृथ्वीधरराजपुत्रि।।४४।।

सङ्ग्रहश्लोकः— लक्ष्यस्य यल्लक्षणया प्रतीतिस्तत्स्यादलङ्कारवचोनिमित्तम्।
फलस्य या व्यञ्जनतो गतिः सा ज्ञेया ध्वनित्वव्यपदेशहेतुः।।

इति सङ्ग्रहः।

उदाहरणम्— अधः कृतो येन वृषः सकामो
वक्रे विधौ मूर्ध्नि दिगम्बरो यः।
पाता सुराणां यमयोनिकृच्च
पतिस्तवोग्रः स नरेन्द्रपुत्रि।। ४५।।

४०. प्रत्यनीकम्

सूत्रम्— **प्रतिपक्षादिसम्बन्धिस्वीकारः प्रत्यनीकम्।**

वृत्तिः— व्याजस्तुतौ निन्दास्तुतिभ्यामन्यगतिः। इयं तु बलवतः प्रतिपक्षस्य तिरस्काराशक्तौ तत्सम्बन्धिनो दुर्बलस्य बाध्यतया स्वीकारतया स्वीकारमुखेन तिरस्कारं कर्तुर्निन्दाद्वारा बलवतः स्तुतिप्रतिपादनरूपमेकं प्रत्यनीकम्।

उदाहरणम्— जितास्त्वया गौरि तपश्चरन्त्या
ये शीतवातातपतृट्क्षुदाद्याः।
कामादयो ये रिपवश्च तेऽद्य
त्वत्सेवकं मामुभये रुजन्ति।।४६।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिकरश्लोक:— तत्सम्बन्धितिरस्कारद्वारा तस्यैव बाधनात्।
विभावना विशेषोक्त्योरत्र नाशङ्कनीयता।। इति सङ्क्षेप:।।

४१. विनोक्तिः

सूत्रम्— **विना कञ्चित्सदसत्त्वे विनोक्तिः।।४१।।**

वृत्तिः— केनचिद्विना कस्यचित्सन्निधानेनार्थान्तरसत्त्वं शोभनत्वमसत्त्वं शोभनं वा विनोक्ति:।

उदाहरणम्— मेघैर्विना द्यौरिव निर्मला त्वं रागादिदोषैर्वियुताम्ब भासि।
राकेव चन्द्रेण विना प्रियेण न शोभसे देवि विनेश्वरेण।।४७।।

४२. सहोक्तिः

सूत्रम्— **सहार्थवशादेकस्यानेकसम्बन्धे सहोक्तिः।।४२।।**

वृत्तिः— यत्र शाब्देन वृत्तेनार्थस्यैकेन[१] वान्वितत्वेन सह साकमित्यादिशब्द-वशादन्येनापि सम्बन्धे भवति सा सहोक्तिः।

उदाहरणम्— जातार्कजाद्ध्रीर्जरसा समं हि भग्ना च तन्वा सह जीविताशा।
देह्यम्ब कान्तिं सह चक्षुषा मे मूर्ध्न्यम्बिके शीतलमेत्य हस्तम्।।४८।।

४३. समासोक्तिः

सूत्रम्— **विशेषणानां साम्यादप्रस्तुतधर्मावच्छेदः समासोक्तिः।।४३।।**

वृत्तिः— समानविशेषणमहिम्ना यत्र प्रस्तुतस्याप्रस्तुतगतगुणक्रियादिरूप-धर्मावच्छेद: प्रतीयते सा समासोक्ति:।

उदाहरणम्— पत्या समं चन्द्रकिरीटभासा सिंहासनस्थां शशिभूषिताङ्गीम्।
अभीप्सितार्थं सुमनोगणानां गिरा दिशन्तीं गिरिजां स्तुमस्त्वाम्।।४९।।

सङ्ग्रहश्लोक:—प्रकृतस्याथवान्यस्य विशेषस्याभिधायकम्।
समानं यत्र नो तत्र समासोक्तिर्ध्वनिर्हि स:।।
विशेषणानां तुल्यत्वे विशेष्याणामपि क्वचित्।
अनेकार्थाभिधायित्वे श्लेष: स्यादिति निर्णय:।।

४४. श्लेषः

सूत्रम्— **विशेष्यस्यापि साम्ये द्वयोर्वाच्यत्वे श्लेषः।।४४।।**

---

१. नैवा......(अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— विशेषणानां साम्यादिति चानुषक्तम्। इह प्रस्तुताप्रस्तुतयोः क्वचिदेकस्य वाच्यत्वमपरस्य गम्यत्वम्। तत्र यदा विशेषणविशेष्य-प्रतिपादकयोर्द्वयोरपि साम्यं तत्रापि यदि द्वावप्यर्थौ प्रस्तुतौ, अप्रस्तुतौ तदा तुल्यन्यायत्वाद् द्वयोरपि वाच्यत्वे श्लेषः।

उदाहरणम्— दाता सुराणां विभवस्य भक्त्या हरे स्वभावाभयदानभावः।
हरित्पतिः श्लाघितदीप्ततेजाः पायात्स वोऽङ्घ्रिर्हरिरप्युमायाः।।५०।।
शाम्येत्प्रतीकैः सह मोहराशिः प्रबोधमायाति रुजेव पद्मः।
त्वां मातरद्रेरुदितां विलोक्य भास्वत्तनू खेचरवन्द्यपादाम्।।५१।।
देवीपक्षे अद्रेर्हिमाचलादुदितां रवितनूपक्षे अद्रेरुदयाचलादुदिताम्।

सङ्ग्रहश्लोकः— प्रधानभूतालङ्कारवियोगात्सावकाशता
कुत्रचित् प्रतिभोत्पत्तिहेतुत्वं क्वचिदङ्गता।
क्वचित्प्ररोहविरहात्प्रातिभत्वं परत्र च
अनुप्राणकतास्येति श्लेषोऽयं पञ्चभूमिकः।।

४५. परिकरः

सूत्रम्— **साभिप्रायत्वं परिकरः।।४५।।**

वृत्तिः— विशेषणानामित्यनुषज्यते। विशेषणानां साभिप्रायत्वं प्रतीयमानार्थ-गर्भता परिकरः।

उदाहरणम्— कुलाचलेन्द्रस्य सुता हिमाद्रेस्त्रिलोकनाथस्य शिवस्य पत्नी।
स्वयंवराभीतिकरा सती त्वं दातुं वरांस्त्रातुमुपेक्षसे किम्।।५२।।

४६. पर्यायोक्तम्

सूत्रम्— **सापेक्षत्वादुपादानेनान्यं प्रति भङ्ग्यन्तरेण वाभिधानं पर्यायोक्तम्।।४६।।**

वृत्तिः— इहाभिधेयस्यार्थान्तरावगमत्वे द्वयी गतिः। सापेक्षत्वं निरपेक्षत्वं वा। तत्रार्थान्तरनिरपेक्षत्वे ध्वनिः, सापेक्षत्वे तु 'कुन्ताः प्रविशन्ति' इतिवदर्थप्रतीतिर्लक्षणया न व्यञ्जनेन, उपादानलक्षणाया अस्तमय-प्रसङ्गात्। तेनोपादानात्मकलक्षणभेदेनात्मनः सापेक्षतापरिहारायार्थे-नार्थान्तरं यदाक्षिप्यते तदैकं पर्यायोक्तम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— शुम्भासुरेन्दीवरलोचनानां या साश्रुणा लोचनकज्जलेन।
लिलेख लेखाभयदानलेखां सा चन्द्रलेखाभरणप्रियाव्यात्।।५३।।

४७. निश्चयः

सूत्रम्— **विहितस्याशङ्कितस्य वा विशेषावगमाय निश्चयः।।४७।।**

वृत्तिः— क्रियया नञा वा विहितस्याशङ्कितस्य वार्थस्य केनचिन्निमित्तेन युक्ततया प्रतिभातस्य निषेधे क्रियमाणे कस्यचिद्विशेषस्य प्रतिपादनाय भ्रमवशादन्यथावगतस्य पश्चादन्यथानिश्चयनं निश्चयः।

उदाहरणम्— भवानि भक्तस्य भवाग्नितापं निवारयेस्त्वं करुणापरासि।
नैवेति वा वच्मि सुधामरीचिः किमर्थितो ह्लादनमातनोति।।५४।।

४८. आक्षेपः

सूत्रम्— **इष्टनिषेध आक्षेपः।।४८।।**

उदाहरण— वच्मि प्रसीदेति न तेऽस्तकोपे याचे वरान्नो वरदे स्वयं ते।
निवेदयेति न तवाखिलज्ञे दयस्व दीनस्य शिवे स्वयं मे।।५५।।

परिकरश्लोकः— विहितेऽर्थे निषेधस्य स्याच्चेदाभासमानता।
आक्षेपोऽसौ तदा ज्ञेयः प्ररूढत्वे तु निश्चयः।।

४९. विध्याभासः

सूत्रम्— **अनिष्टविधानं विध्याभासः।।४९।।**

वृत्तिः— यत्र विशेषप्रतीत्यर्थमनिष्टस्यार्थस्य विधानानर्हस्य विधानं बाधितत्वादाभासीभवति स विध्याभासः।

उदाहरणम्— मूर्खत्वमद्यास्तु दरिद्रतास्तु कुदेशजन्मास्तु विनेत्रतास्तु।
त्वद्भक्तिलक्ष्म्या हृदयाब्जभासा मा स्याद्वियोगः परमेशि जातु।।५६।

५०. सन्देहाभासः

सूत्रम्— **सन्दिह्यमानयोरेकत्र तात्पर्येच्छा सन्देहाभासः।।५०।।**

वृत्तिः— किमिदं कार्यमुतेदमिति सन्दिह्यमानयोरेकस्यावश्यस्वीकर्त्तव्यत्वविवक्षायां सन्देहबाधितत्वाद्विशेषप्रतीत्यर्थं यत्राभासत्वे पर्यवस्यति स सन्देहाभासः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— 'विभूतिभाजां गगनेचराणां विपज्जुषां भूतलवासिनां वा।
विचार्यतामादित एव देवि केषां प्रसादः प्रथमं विधेयः।।५७।।

५१. विकल्पाभासः

सूत्रम्— **विकल्पितयोर्विकल्पाभासः।।५१।।**

वृत्तिः— एकत्र तात्पर्येच्छेत्यनुषङ्गः। इह तुल्यप्रयोजनयोरितरपरिहारेणैकेनैव कार्यसम्पत्तौ युगपदनुप्रवेशाभावेन तुल्यप्रभावत्वेन च विरुद्धयोर्विकल्पः। यत्र तुल्यप्रयोजनत्वं नास्ति तत्र विकल्पो विधीयमानबाधितत्वाद्विशेषप्रतीत्यर्थं विकल्पवदाभासमानो विकल्पाभासः।

उदाहरणम्— उपेक्ष्य संरक्ष्य च भक्तलोकं स्फुरत्यपूर्वोभयथापि कीर्तिः।
उपेक्षणं सम्प्रति रक्षणं वा यद्रोचते ते कुरु तद्भवानि।।५८।।

५२. विरोधाभासः

सूत्रम्— **विरुद्धाभासत्वं विरोधाभासः।।५२।।**

वृत्तिः— जातिगुणक्रियाधर्ममात्रद्रव्याभावानां सजातीयत्वेन विजातीयत्वेन वा विरुद्धेन सम्बन्धे य आमुखावभासमानतया परस्परविरोध एव पर्यवसाने समाधानाद्विरोधाभासः।

उदाहरणम्— यस्याङ्घ्रिलग्ना भुजगा नटन्ति घना इवाग्रे भुवि चाप्तकामाः[२]।
लुब्धाँश्च यो रक्षति भूरिभक्त्या स नीलकण्ठः शर्वरि पतिस्ते।।५९।।

सङ्ग्रहश्लोकः— स्खलद्गतित्वप्रतिपादनार्थं विरोधबुद्धेः कथितः समाधिः।
पूर्वन्तु वाक्यार्थविरोधबोधो जायेत पश्चादविरोधधीश्च।।

५३. विभावना

सूत्रम्— **हेत्वभावे फलोत्पत्तिर्विभावना।।५३।।**

वृत्तिः— प्रसिद्धस्य हेतोरभावे फलोत्पत्तिर्विभावना।

उदाहरणम्— वक्त्रेण कात्यायनि भास्वता ते वदन्ति कान्तिं नयनोत्पलानि।
तुषारभासा हरिणा समेतो धत्ते विकासं तव पादपद्मः।।६०।।

५४. विशेषोक्तिः

सूत्रम्— **हेतुसाकल्ये फलानुत्पत्तिर्विशेषोक्तिः।।५४।।**

उदाहरणम्— त्वद्भक्तिचन्द्रप्रभया ममेशि मायानिशायामपि विस्फुरन्त्याम्।
धिग्वृद्धिमायाति तमो मतिस्थं मनश्चकोरश्च बिभर्ति तृष्णाम्।।६१।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५५. असङ्गतिः

सूत्रम्— **तयोर्देशकालान्यत्वमसङ्गतिः[१] ।।५५।।**

उदाहरणम्— सुपर्वशत्रोर्महिषस्य वक्त्रं युधि त्वयाम्ब त्रिशिखेन भिन्नम्।
उत्सर्पदस्रस्रुतिदृक्सहस्रं तदा सुरेन्द्रस्य मुदा बभूव।।६२।।

५६. अन्योन्यम्

सूत्रम्— **रूपधर्मयोः परस्परनिबन्धनत्वमन्योन्यम्।।५६।।**

वृत्तिः— द्वयोरर्थयोः स्वरूपस्य धर्मस्य वान्योन्यनिबन्धनत्वमन्योन्यम्।

उदाहरणम्— त्वत्पादपद्मद्वयपूजनेन मनीषिभिर्लभ्यमतीव पुण्यम्।
पुण्येन जन्मान्तरसञ्चितेन भवानि लभ्यस्तव पादपद्मः।।६३।।

५७. विपर्ययः

सूत्रम्— **धर्मिधर्मभावस्य धर्माणां च नियमो[२] विपर्ययः।।५७।।**

वृत्तिः— यत्रोपात्तस्य धर्मिणो धर्मस्य वा विपर्ययो धर्मिणो धर्मत्वं धर्मस्य धर्मित्वं स एवैकः। यत्र चान्योन्यसम्बन्धी धर्मः परस्य परसम्बन्धी चान्यस्य स धर्मविनिमयरूपो द्वितीयो विपर्ययः[३]।

उदाहरणम्— शिलीमुखाः संयति वैरिमुक्ताः पुष्पीभवन्ति त्वदुपासकस्य।
पुष्पाणि तेन प्रहितानि तेषां तव प्रभावेण शिलीमुखन्ति।।६४।।

५८. अचिन्त्यम्

सूत्रम्— **अविलक्षणाद्विलक्षणकार्योत्पत्तिविपर्ययश्चाचिन्त्यम्।।५८।।**

उदाहरणम्— चिरस्थितं नश्यति पापमेति चिरं गतं शर्म तव स्तवेन।
भवत्युदारः स तथानुदारस्त्वत्पादपद्मद्वयसेवको यः।।६५।।

५९. विषमम्

सूत्रम्— **अर्थानर्थपदे तदन्यस्योत्पत्तिर्विषमम्।।५९।।क।**

उदाहरणम्— द्रोणो दशत्येव शिरोधृतोऽपि प्लुष्यत्यपि श्लिष्टतनुर्हुताशः।
सुखार्थमूलोऽपि परिग्रहो मे दुःखं दिशत्येव सुपर्व मातः।।६६।।

---

१. अन्यथात्वम् (अ.र.); २. विनिमयो (अ.र.)।

३. 'यत्रोपात्तस्य धर्मिणो धर्मत्वं स एवैकः। यत्र चान्योन्यस्य सम्बन्धी धर्मः परस्परं सम्बन्धी वान्यस्य स धर्मनियमरूपो द्वितीयो विपर्ययः' इति ख. पाठः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुम्भासुरो येन विभिन्दितोरो हत्वा सुरत्वं गमितो विमुक्तिम्।
दैत्येन्धनप्लावणवीतिहोत्रं तदीशपत्नि त्रिशिखं स्तुमस्ते।।६७।।

सूत्रम्— [1]विरूपकार्योत्पत्तिविरूपसङ्घटनमसाकल्यं च।।५९।।ख।

उदाहरणम्— सितांशुरीशस्त्वमपीशिकाली त्वं सिंहवाहा वृषवाहनोऽसौ।
स सर्पकण्ठः पिककण्ठासि त्वं तदद्भुतं सङ्घटनं स्तुमो वाम्।।६८।।

६०. समम्

सूत्रम्— **तद्विपर्ययः समम्।।६०।।**

वृत्तिः— तच्छब्देन त्रयाणां विषमभेदानां परामर्शः। कविना विच्छित्ति-विशेषेणोपनिबद्धं कार्यकारणयोरानुरूप्यमनुरूपसंयोगः सामग्री-साकल्यं च समम्।

उदाहरणम्— स्थाणुर्महेशो जगति प्रतीतः प्राणेश्वरी तस्य भवत्यपर्णा।
पुत्रो विशाखो युवयोः प्रसन्नास्त्रयोऽपि यूयं फलदा जगत्सु।।६९।।

६१. विचित्रम्

सूत्रम्— **विफलः प्रयत्नो विचित्रम्।।६१।।**

वृत्तिः— कायिकस्य वाचिकस्य मानसस्य प्रवृत्तिरूपस्य निवृत्त्यात्मकस्य वा प्रयत्नस्य विफलं तु[2] विचित्रम्।

उदाहरणम्— हृद्योल्लसत्सद्मनि सम्पदुच्चैः कीर्तिर्दिवि स्फूर्जति चानवद्या।
आसाद्यते प्राज्यमपि द्युराज्यं देवि त्वदङ्घ्रिद्वयपूजनेन।।७०।।

परिच्छिनत्त्यम्बुघटैः स सिन्धुं नभो मिमीते स कराङ्गुलीभिः।
वाचस्पतिप्रख्यसुरैरमेयां भवानि यस्त्वां मनुजः स्तुवीत।।७१।।

मूर्तिः कुमारी परिवारिता ते शूलोऽनुषङ्गं न जहाति हस्तात्।
त्वत्पाणिगः पादतलाश्रितेन पुष्णाति खड्गो महिषेण सख्यम्।।७२।

६२. विशेषः

सूत्रम्— **अनाधारमाधेयमेकमनेकगोचरं सम्भावितादधिकस्य विरुद्धस्य (वा) सम्पत्तिश्च विशेषः।।६२।।**

वृत्तिः— आधारं विनाधेयस्य स्थितिरेको विशेषः। यच्च परिमितं वस्तु युगपदनेकत्र वर्त्तते स द्वितीयः। यद् सम्भावितादधिकस्य विरुद्धस्य वा वस्तुनो निष्पत्तिः स तृतीयो विशेषः।

---

१. 'अनर्थोत्पत्तिर्विरूप...........' (अ.र.); २. 'विफलत्वं' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— तवेशि भक्ताः सुरथक्षितीशजीमूतवाहप्रमुखा जयन्ति।
येषां यशः स्वर्गविमुक्तिभाजामाकल्पमेतां जगतीं पुनाति।।७३।।
सङ्क्रान्तमद्यापि हि दानवानां मनःस्वनेकेषु भयं त्वदीयम्।
निशुम्भशुम्भासुरदारुणि द्रागेकं स्फुरत्यर्क इव ह्रदेषु।।७४।।
महन्महादेवि महानुभावास्त्वद्दर्शनाच्छास्त्रधनं तदापुः।
यदर्थिषु प्रत्यहमर्प्यमाणं न क्षीयते याति तु वृद्धिमेव।।७५।।

६३. व्याघातः

सूत्रम्— **उत्पत्तिविनाशयोरेकोपायत्वे व्याघातः।।६३।।**

वृत्तिः— यत्र येनैवोपायेन किञ्चिन्निष्पद्यते तेनैव चान्यथा भवति स व्याघातः।

उदाहरणम्— रूपं श्रुतं श्रीः शुभवंशजन्म चत्वारि दर्पस्य समुद्भवाय।
तान्येव लब्धानि तव प्रसादाच्छमाय भूयस्त्वदुपासकस्य।।७६।।
शब्दादयो ये विषया जनस्य सुखापहाश्चित्तविमोहनेन।
भवन्त्यलं ग्रामदृशान्तरान्तास्त्वद्भक्तिभाजां सुखदास्त एव।।७७।।

६४. अशक्यम्

सूत्रम्— **प्रतिबन्धकादेर्विधानासामर्थ्यत्वमशक्यम्[१]।।६४।।**

वृत्तिः— कार्यस्य [२]जननिप्रतिबन्धकसम्भवादन्यतो वा निमित्ताद्यत्कर्तुमशक्यत्वं तदशक्यमलङ्कारः।

उदाहारणम्— अलक्ष्यमक्षातिगवृत्तिसूक्ष्मं स्थूलं जगद्व्यापि सुदुर्विभाव्यम्।
तदित्थमेवोभयथापि रूपं कथं तवेशानि वयं प्रतीमः।।७८।।

६५. व्यत्यासः

सूत्रम्— **दोषगुणयोरन्यथात्वं व्यत्यासः।।६५।।**

वृत्तिः— यत्र दोषस्य गुणत्वं गुणस्य च दोषत्वं भवति स व्यत्यासः।

उदाहरणम्— स्त्रियां धने श्रेयसि रागलोभद्वेषा नृणां ये निरपायदोषाः।
त्वत्पूजने त्वत्कथने त्वदीयसंसेवने देवि गुणास्त एव।।७९।।
येऽर्था वितीर्णा गृहमेत्य भूपैः पुत्राश्च जाताः कृतिनो वशाद्ये।
त एव नष्टा विधिवैवशेन स्मृत्वा हृदन्तर्न दहन्ति मातः।।८०।।

---

१. 'सामर्थ्यमशक्यम्' (अ.र.)।
६. 'जनन' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६६. समाधिः 'समता'

सूत्रम्— **तदन्याभ्यां समाधानं समाधिः[1] (समता)।।६६।।**

वृत्तिः— दोषगुणयोरित्यनुषज्यते, उत्तरत्र च। यत्र कस्यापि दोषस्तत्सम्बन्धिनैव गुणेन गुणो वा दोषेण समाधीयते समपसार्यते स दोषस्य गुणस्य वा उत्कटत्वाभावात् समता।

उदाहरणम्— या प्राप पापक्षितिपस्तवेन मालिन्यदैन्यं मम देवि वाणी।
सा पुण्ययुष्मद्गुणवर्णनेन वैमल्यमाप्ता तदपाकरोति।।८१।।

६७. उद्रेकः

सूत्रम्— **सजातीयविजातीयापेक्षया तुच्छत्वम् (उद्रेकः)।।६७।।**

वृत्तिः— सदोषस्य दोषान्तरापेक्षया गुणान्तरापेक्षया वा गुणस्य गुणान्तरापेक्षया उत्कटश्चतुर्भेद उद्रेकः।

उदाहरणम्— जन्मामले ब्रह्मकुलेऽर्थलाभः ख्यातिश्च पूजां च गुणेन मेऽस्ति।
त्वद्भक्तिलक्ष्म्यैव विभामिं मातः प्रबोधदा आर्करुचेव पद्मः।।८२।।
व्यालाकुले तीव्रतमः कराले गृहान्तराले वरमस्तु जन्म।
भूयासमिन्द्रस्य पदेऽपि जातो नाहं भवद्भक्तिवियुक्तचेताः।। ८३।।

६८. तुल्यम्

सूत्रम्— **निवृत्तावन्योदयस्तुल्यम्।**

वृत्तिः— एकस्य दोषस्य निवृत्तौ दोषान्तरोदयः, गुणस्योदये गुणान्तरनिवृत्तिश्चेति दोषनिवारणे दोषान्तराविर्भावाद् गुणाश्रयणे गुणान्तरे निवृत्तेराधिक्याभावात्तुल्यम्।

उदाहरणम्— जहाति भास्वद्गुरुपादसेवी विमोहनिद्रां यदि जीवपद्मः।
लब्धप्रकृष्टात्मरसोऽभ्युपेत्य गिरत्यमुं षट्चरणोऽम्ब कालः।।८४।।
ध्यानक्षणे शान्तमनोविकल्पस्त्वत्प्रत्ययैक्यात्सुखमाश्रयामि।
व्युत्थानवेलाधिगतोऽपयाति त्वत्तोऽत्र गीतिश्रुतिजः प्रमोदः।।८५।।

६९. अनादरः

सूत्रम्— **अप्राप्तार्थं तत्तुल्यानादरेऽनादरः[2]।।६९।।**

---

१. 'समता' (अ.र.)। २. 'अनादरोऽनादरः' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— यदा यद्रूपे वस्तुनि प्राप्ते तत्तुल्याप्राप्तवस्त्वन्तरावाप्त्यर्थं तस्यानादरः स्तदनादराख्योऽलङ्कारः।

उदाहरणम्— वक्त्रं निरस्यामलनेत्रसङ्गं तवेशि धत्तेऽमलनेत्रसङ्गम्।
विमुच्य पारुष्यमपि स्ववाचा पारुष्यमिन्दुप्रभया बिभर्त्ति।।८६।।

७०. आदरः

सूत्रम्— **त्यक्तस्वीकार आदरः।**

वृत्तिः— अधिकगुणप्राप्ते तुच्छत्वेन व्यक्तस्य तदपागमे पुनः स्वीकारः।

त्यागमात्रे वा पुनरुपादानमन्येन वाक्यार्थस्य[१] ग्रहणमिति त्रिभेद आदरः।

उदाहरणम्— स्त्रीयौवनं चिन्तयतोऽन्यदीया त्यक्ता हृदोत्तारकता श्रिताक्ष्णा।
जरस्य प्राप्ता शुचितात्मना मे केशैर्गृहीता मलिनैर्महेशि।।८७।।

७१. अनुकृतिः

सूत्रम्— **हेत्वन्तरादन्यस्यापि तथात्वमनुकृतिः।।७१।।**

वृत्तिः— केनचिन्निमित्तेन कस्मिंश्चिद्वस्तुनि कस्यापि रूपस्योदये निमित्तान्तरेणान्यस्यापि ताद्रूप्यमनुकृतिः।

उदाहरणम्— अनुत्तमां काञ्चनतां वहन्ती मूर्तिस्त्वाप्ता समदृष्टियोगात्।
स्वेनेह हर्यक्षमधः करोति मातर्ममापि त्वदनुग्रहेण।।८८।।

७२. प्रत्यूहः

सूत्रम्— **प्राप्तस्य प्रतिबन्धः प्रत्यूहः।**

वृत्तिः— हेत्वन्तरादनुषज्यते। कुतश्चिन्निमित्तात्प्राप्तस्य हेत्वन्तरात् प्रतिबन्धः प्रत्यूहः।

उदाहरणम्— न दह्यते क्षेत्रमिदं मदीयं दवीयसा दुःखदवानलेन।
यतो विवेकामृतमेकदा तु (त्वं) हृद्व्योम्नि स्फूर्जसि देवमातः।।८९।।

७३. प्रत्यादेशः

सूत्रम्— **स्थितस्यान्यथापत्तिः प्रत्यादेशः।।७३।।**

वृत्तिः— हेत्वन्तरादित्यनुषज्यते। स्थितिश्च प्रवृत्तेर्निवृत्तेर्वेति द्विधा सती प्रवृत्तप्रवर्तित्वनिवृत्तनिवर्तित्वभेदेन चतुर्धा। तेन कुतश्चिन्निमित्तात्

१. 'अन्येन वा व्यक्तस्य' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्थितस्य स्थापितस्य वा निवृत्तस्य निवर्तितस्य वा निवृत्तिः प्रवृत्तिश्च प्रत्यादेशः।

उदाहरणम्— असौ गुरुर्दुश्चरितो ममात्मा लघूभवत्येव तवस्तवेन।
त्वद्भक्तिसंयोगपरो लघुः सन् गुरुत्वमायाति पुनर्भवानि।।९०।।

७४. समाधिः

सूत्रम्— **उपोद्वलनं समाधिः।।७४।।**

वृत्तिः— स्थितस्येत्यनुवर्तते। षष्ठी चात्र कर्मणि कर्त्तरि वा तेन स्थितस्यागन्तुकेन आगन्तुकस्य स्थितेन वा कारणस्य कार्यजननप्रवृत्तस्य कारणान्तरेणार्थान्तरस्य कार्यस्य वान्येनोपबृंहणं समाधिः।

उदाहरणम्— रागादिदोषाविलचित्तशुद्धौ मैत्रादिकं भावयतः सुखादौ।
ममेश्वरि त्वत्प्रणिधानकर्त्री प्राज्या हृदि स्फूर्जति हन्त भक्तिः।।९१।।

७५. अर्थान्तरन्यासः

सूत्रम्— **विशेषस्यान्तरेण समर्थनमर्थान्तरन्यासः।।७५।।**

वृत्तिः— यत्र विशेषोऽभिहितः सामान्येन व्याप्तिप्रदर्शनरूपतया समर्थ्यते स्थिरीक्रियते सोऽर्थान्तरन्यासः।

उदाहरणम्— तमांसि हन्त्येव महान्ति तेजो दयालुरेवोपकरोति दीनान्।
त्वं देवि तेजोमयमूर्तिरेका हत्वासुरान् विश्वमिदं ह्यपासीः।।९२।।
त्वां देवि संसेव्य स वत्सराजो विद्यानरेन्द्रानजयन्नरोऽपि।
प्रभुप्रसादेन विना न कोऽपि तृणस्य कुब्जीकरणे समर्थः।।९३।।
द्विषद्धृतक्ष्मातलराज्यलब्धिं भवानि मन्वन्तरनाथतां च।
त्वत्सेवया यत्सुरथोऽर्थिनां हि दयालवः किं प्रभवो न दद्युः।।९४।।

सङ्ग्रहश्लोकः—सामान्यस्य विशेषाद्विशदीकरणं वितन्यते येन।
आर्थोदाहरणं स्यात्तत्रेवादिप्रयोगविरहेण।।

७६. व्याप्तिः

सूत्रम्— **सर्वथा सम्भवोऽसम्भवो वा व्याप्तिः।।७६।।**

वृत्तिः— यत्र समग्रपक्षावलम्बनेऽपि कस्यचिदर्थस्य सम्भवः, असम्भवो वा निबध्यते सा समग्रपक्षव्यापनाद् व्याप्तिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— निषेवितो वा परिवर्जितो वा शब्दादिकोऽयं विषयप्रपञ्चः।
न सौख्यदायी न च दुःखदो वा त्वद्भक्तिलब्धात्मसुखस्य मातः।।९५।।

७७. अनुमानम्

सूत्रम्— **साधनात्साध्यप्रतीतिरनुमानम्।।७७।।**

वृत्तिः— यत्राप्रतीतोऽर्थः साधनाच्छाब्देनार्थेन वा वृत्तेन स्वयमवगम्यते तदनुमानम्।

उदाहरणम्— विना तपः किञ्चिदपीह नाप्यं तपोभिरीशो हि पतिस्त्वयाप्तः।
मन्येत एवाखिलमङ्गलां त्वां प्राक्प्राप्तुमीशोऽपि तपांसि चक्रे।।९६।।

७८. हेतुः

सूत्रम्— **परप्रत्यायिकं (प्रत्यायकं) लिङ्गं हेतुः।**

वृत्तिः— परेणावगतस्य वस्तुनः प्रतिपादकं गमकरूपं लिङ्गं हेतुः।

उदाहरणम्— रन्ध्रैरपेतां सरलस्वभावो भक्तिं त्वदीयां तरणिं प्रतीमः।
आश्रित्य यां धीवर एष लोकः सुखं तरत्यम्बु भवाम्बुधिं यत्।।९७।।

७९. आपत्तिः

सूत्रम्— **गतनिष्टाप्रतिपादनमापत्तिः[१]।।७९।।**

वृत्तिः— कस्यचित्किञ्चित्कुर्वतो यद्यनिष्टमापद्यते सा प्रसङ्गात्मिकानिष्टस्यापादनादापत्तिः। यथोक्तं 'पराभ्युपगतेन परस्यानिष्टापादनं प्रसङ्गः' इति।

परिकरश्लोकः— अनुमानादेरस्याः साधनरूपाच्च[२] दूषणत्वजुषः।
आपत्तेः सुव्यक्तो भेदो ज्ञेयः प्रसङ्गरूपाख्यः।।

उदाहरणम्— सन्ध्याक्षणे चण्डि जगद्धिताय या ताण्डवं चण्डतरं तनोषि।
भूयादघातैः करवर्तनाभिर्नक्षत्रपाली विनयत्यधो यत्।। ९८।।

८०. अर्थापत्तिः

सूत्रम्— **दण्डापूपिकयापातनमर्थापत्तिः[३]।।८०।।**

---

१. 'अनिष्टापादनम्' (अ.र.)।
२. 'साधनरूपश्च (अ.र.)। ३. 'पतनम्' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— मूषकैर्दण्डानां भक्षणेऽपूपभक्षणमर्थात् सिद्धमिति न्यायो दण्डापूपिका। अनेन न्यायेन कस्यचिदर्थस्य निष्पन्नावर्थान्तराद्यापतनमर्थापत्तिः।

उदाहरणम्— तवाननेनाचलराजपुत्रि नेत्राभिरामामलकान्तिभाजा।
सुधाकरः पूर्णकलो जितश्चेत् पद्मः सरोगो विकलः क्व गण्यः।।९९।।

सङ्ग्रहश्लोकः— दण्डापूपनयेन वस्तुनिमितिः[1] सामर्थ्यतो जायते।
नान्तर्भावमसौ प्रयात्यनुमितौ यत्सम्भवात्मन्यतः[2]।।
अर्थापत्तिरलङ्कृतिः पृथगियं नो लक्षणीयेत्यसत्।
तर्कोऽङ्गं यदयं बुधैरनुमितः[3] सम्भावनोत्पादितः।।

८१. विधिः

सूत्रम्— **असम्भाव्यहेतुफलप्रेषणं विधिः।।८१।।**

वृत्तिः— यस्मिन् सति प्रेषणं तत्तस्य निमित्तं फलं च तस्य प्रेषणं[4] पुरुषप्रवृत्तिस्तयोर्हेतुफलयोरसम्भाव्यते यत्कस्यचित्प्रेषणं स विधिः।

उदाहरणम्— लघुं कुरुष्वाघभरं निवार्य वितीर्य शास्त्राणि गुरुं विधेहि।
प्लुतं कुरूद्धृत्य भवाम्बुराशेः सद्वर्णमेत्येश्वरि मां स्वदासम्।।१००।।

८२. नियमः

सूत्रम्— **अन्यनिषेधार्थोऽपि विधिर्नियमः।।८२।।**

वृत्तिः— इहाज्ञातज्ञापनं विधिः स चेद् विधावेव पर्यवसितस्तदा विधिः, यदा तु कस्यचिदर्थस्य नियमेनाज्ञातस्य विधानं क्रियमाणमर्थान्तरनिषेधार्थमपि सम्पद्यते तदा नियमः, यतोऽप्राप्तप्राप्तिमात्रपर्यवसितो विधिः अप्राप्तार्थप्रापणरूपमन्यनिषेधापर्यवसायित्वविधानं नियमः सर्वप्रकारं प्राप्तस्य विधानमर्थान्तरनिषेधमात्रतत्परं परिसंख्येति निर्णयः।

उदाहरणम्— प्रसादयेदुन्मदनां सरागां मदोद्धतां देवि धियं न येषाम्।
सदर्थदं ते भजते स्वरूपं न जातरूपं त्वदुपासको यः।।१०१।।

८३. परिसंख्या

सूत्रम्— **प्राप्तस्य परिसंख्या।।८३।।**

---

१. 'वस्त्वनुमितिः' (अ.र.)। २. 'सम्भावनात्मोदितः' (अ.र.)।
३. .....'नुमितेः' (अ.र.)। ४. 'प्रेष्यमाणः' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— अन्यनिषेधार्थ इति विधिरिति चानुषक्तम्। इहापि पूर्ववदेव यत्र सर्वथा प्राप्तत्वादप्राप्तांशपरिपूर्णस्याप्यसम्भवे विधानं क्रियमाणमर्थान्तरनिषेधमात्राय पर्यवस्यति सा परिसंख्या अत एव नियमाद्भेदः।

उदाहरणम्— भ्रूरेव वक्रा शिर एव नम्रं दृगेव लोला मुख एव रागः।
दोषानुबन्धः करयुग्म एव त्वत्सेवकस्यास्य गुणाग्रमूर्तेः।।१०२।।

८४. प्रतिप्रसवः

सूत्रम्— **प्रत्यापत्तिः प्रतिप्रसवः।।८४।।**

वृत्तिः— निवृत्तस्यार्थस्य पुनः प्राप्तिः प्रत्यापत्तिः प्रतिप्रसवोऽलङ्कारः।

उदाहरणम्— पातालतोये विबुधान्विजित्य दैत्यान्महेन्द्रालयमध्यवात्सः।
जिताः सुरानुग्रहतस्त्वयाम्ब पातालमेवापुरमी भयार्ताः।।

८५. तन्त्रम्

सूत्रम्— **नानाफलप्रयुक्तः प्रयत्नस्तन्त्रम्।।८५।।**

वृत्तिः— अनेकस्य फलस्य तुल्यतया साध्यस्य यत्र प्रयत्नः प्रयोजकत्वं तत्तन्त्रम्।

उदाहरणम्— नीलाम्बरासङ्गभृतं हिमाद्रौ विलोक्य कालीं शरवर्षिणीं त्वाम्।
दिवौकसो द्राङ्मिलिता जहर्षुः प्रदुद्रुवुर्दानवराजहंसाः।।१०४।।

८६. प्रसङ्गः

सूत्रम्— **प्रसङ्गादन्यार्थः प्रसङ्गः।।८६।।**

वृत्तिः— प्रयत्न इत्यनुषक्तम्। यत्र प्राधान्यात्केनचित्फलेन कस्यचित्प्रयुक्तस्य प्रयत्नस्यावान्तरकार्यकारिता प्रसङ्गाद्भवति स प्रसङ्गः।

उदाहरणम्— तपश्चरन्त्याः पतिकाम्ययोच्चैस्तवेशि देवासुरवन्द्यपादः।
जगत्पतिः शम्भुरुपागतोऽग्रं जाता जगद्व्याप्तिकरी च कीर्तिः।।१०५।।

८७. विकल्पः

सूत्रम्— **विरुद्धयोस्तुल्यत्वे पाक्षिकत्वं विकल्पः।।८७।।**

वृत्तिः— यत्र द्वयोरर्थयोर्विरुद्धत्वात्समुच्चयाभावेन तुल्यबलवत्वाच्च एकस्य बाधसम्भवादनियतैकतरावलम्बनेन पाक्षिकत्वं स विकल्पः।

उदाहरणम्— प्रच्छायरम्ये भवने वने वा पश्यन्प्रसन्नाः सुदृशो दृशो वा।
हृद्यात्मयोनिं मदनं हरिं वा ध्यायन्सुखी तिष्ठति तेऽम्ब दासः।।१०६।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८८. समुच्चयः

सूत्रम्— **धर्मयौगपद्यमन्यस्यापि तत्करत्वं समुदायः**[1] ।।८८।।

वृत्तिः— गुणक्रियाणामभावादेर्व्यस्तसमस्तत्वेन यौगपद्यं तथैकेन यन्निष्पद्यतेऽन्यस्यापि तत्कारित्वञ्च समुच्चयः।

उदाहरणम्— त्वां शृण्वतस्त्वां स्मरतोऽर्चतस्त्वां
त्वां ध्यायतस्त्वां जपतश्च जन्तोः।
धर्मे शितादींश्चतुरो गुणान् धीः
पुष्णाति धर्मप्रमुखांश्च जह्यात्।।१०७।।

८९. परिवृत्तिः

सूत्रम्— **विनिमयः परिवृत्तिः।।८९।।**

वृत्तिः— अन्यत्र दानपूर्वमेवादानं विनिमयः। इह तु क्वचित्त्यागपूर्वमेव क्वचित्तु प्रतिकृतिरिति, उभयरूपो विनिमयः परिवृत्तिः।

उदाहरणम्— आवर्जितस्तावकविक्रमेण दत्त्वा स्वजीवं महिषासुरेन्द्रः।
जग्राह पादं तव पद्मरागं निर्मुक्तलक्ष्मीपदमुत्तमाङ्गे।।१०८।।

९०. पर्यायः

सूत्रम्— **क्रमेणैकमनेकत्रान्यथा वा पर्यायः।।९०।।**

वृत्तिः— क्रमेणैकमाधेयमनेकत्र, अनेके वा एकत्र यद्भवति स पर्यायः।

उदाहरणम्— भवानि भूमीतलतोऽन्तरिक्षं खात्स्वर्गमस्माद्विधिलोकमाप।
निर्मथ्नतः शुम्भसुरारिसैन्यं त्वद्वाहसिंहस्य स सिंहनादः।।१०९।।
ध्यायन्ति चन्द्रामलवक्रकण्ठवक्षस्तटां मेचकबाहुवल्लिम्।
रक्तौष्ठहस्ताङ्घ्रितलां विचित्रवर्णेतराङ्गीं तव केऽपि मूर्तिम्।।११०।।

९१. क्रमः

सूत्रम्— **आरोहावरोहादिः क्रमः।।९१।।**

वृत्तिः— क्रमेणेत्यनुषज्यते। कस्यचिदर्थस्याधिकस्थानासादनमारोहः, विपर्ययोऽवरोहः। आरोहावरोहादिः क्रमेण यत्र परिवध्यते स क्रमः।

उदाहरणम्— आधारतः षट्कमलानि भित्त्वा विन्दोः खगं कुण्डलिनि श्रितासि।
खगात्पुनस्तेन यथावरूढा कन्दे सुधास्यन्दसुखप्रदासि।।१११।।

---

१. 'समुच्चयः' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आदौ स्वहुङ्कारहुताशधूमैर्निःश्वासजातैः प्रथमैस्तथाग्रैः।
ततोऽसुरास्त्रौघनिवारकास्त्रैस्त्वयाम्बरं शून्यमिदं पुपूरे।।११२।।

परिकरश्लोकः— येनोद्देशः क्रमेणादावपरेण पुनर्यदि।
क्रियते प्रतिनिर्देशो दोषः प्रक्रमभङ्गतः।।

९२. वर्धमानकम्

सूत्रम्— रूपधर्माभ्यामाधिक्यं वर्धमानकम्।।९२।।

वृत्तिः— क्रमेणेत्यनुषक्तमुत्तरत्र च। एकस्य वस्तुनो बहूनां वा स्वरूपेण धर्मेणोपचयः क्रमेण निबध्यते तद्वर्धमानकम्।

उदाहरणम्— हृदि ज्वलद्दीपशिखाम्बुरूपां
बिन्दौ स्फुरद्भूरितडिल्लताभाम्।
ध्यायन्ति मातः शिरसीन्दुबिम्ब-
वृन्दप्रभापूरितरोदसीं त्वाम्।।११३।।

९३. अवरोहः

सूत्रम्— **विपर्ययोऽवरोहः।।९३।।**

वृत्तिः— रूपधर्माभ्यामित्येव। गुणधर्मेणोत्तरोत्तरस्यैकस्य बहूनां वा परिचयो वर्धमानकविपरीतोऽवरोहः।

उदाहरणम्— आसन् युगादौ चिरजीविनस्ते क्लेशास्तपोभिर्बहुसिद्धिभाजः।
अल्पायुषोऽनल्परुजोऽर्थहीनाः किं कुर्महे देवि कलौ विमूढाः।।११४।।
भजत्यपूर्वाणि यशांसि सोऽत्र महापदं सम्प्रति पद्यते सः।
भवानि नित्यं शुचिनिष्ठितोऽसौ यस्त्वां जनः पूजयते न वा यः।।११५।।

९४. अतिशयः

सूत्रम्— **सम्भावनयाऽन्यथा वातिशयोऽतिशयः।।९४।।**

वृत्तिः— क्रमेण उत्तरोत्तरस्मिन्सम्भावनयाऽसम्भावनया वाऽतिशयोऽतिशयालङ्कारः।

उदाहरणम्— भवानि भूयो यदि जन्म तत्स्याद्भूदेववंशे श्रुतवृत्तभाजि।
तत्रापि भक्तिर्भवतीं प्रति स्यात्तथापि भूयाद्भवदुःखमुक्तिः।।११६।।

९५. शृङ्खला

सूत्रम्— **उत्तरोत्तरस्य पूर्वपूर्वानुबन्धित्वं शृङ्खला।।९५।।**

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणम्— धर्मस्य मूलं निखिलस्य वेदा वेदस्य मूलं भगवान्महेशः।
महेश्वरस्य त्वमभिन्नरूपा विज्ञानशक्तिः सवितुः प्रभेव।।११७।।

९६. तद्गुणः

सूत्रम्— **अन्यधर्मस्वीकारस्तद्गुणः।।९६।।**

वृत्तिः— [1]येन केनचिदर्थान्तरस्य धर्माः गुणाः[2]।

उदाहरणम्— यत्पङ्कजं प्लुष्यसि दुःखजातं यत्क्लेशजं तापमपाकरोषि।
यत्कम्पदा दैत्यकुलेऽपि गौरि स पैतृकस्तेन हि न स्वभावः।।११८।।

९७. मीलितम्

सूत्रम्— **धर्मसाम्याद्भेदाप्रतीतिर्मीलितम्।।९७।।**

वृत्तिः— यत्र गुणक्रियादेर्धर्मस्य समानतयार्थस्यार्थान्तरेणाच्छादितत्वाद्भेदेनाप्रतिपत्तिस्तन्मीलितम्।

उदाहरणम्— हिमाद्रिकच्छे तप आचरन्त्यास्तवेशि कम्पोत्पुलकाङ्गकायाः।
महेशसङ्कल्पसमागमोक्तौ रोमाञ्चकम्पौ ग्लपितावभूताम्।।११९।।

९८. विवेकः

सूत्रम्— **अस्यां[3] कुतश्चिद्विवेको विवेकः।।९८।।**

वृत्तिः— गुणसाम्याद्भेदाप्रतीतौ सत्यामपि केनचिन्निमित्तेन वैलक्षण्यावगतेर्विवेको विवेकालङ्कारः।

उदाहरणम्— लावण्यकान्तिग्लपिता सखीभिः स्पर्शेन जज्ञे कनकाङ्गदाली।
तवेशि कर्णोत्पलनिर्विशेषं नेत्रं च सस्नेहविलोकनेन।।१२०।।

९९. परभागः

सूत्रम्— **अनुभूतस्य प्रार्थस्यान्तरोपलब्धौ[4] परभागः।।९९।।**

वृत्तिः— विवेक इत्यनुषज्यते। स्वरूपमात्रेणावगतस्य वस्तुनो वस्त्वन्तरोपलम्भसमये तस्माद्भेदप्रतीतिः परभागः।

उदाहरणम्— शक्रादिभिस्तावद् देवि देवैर्वज्रप्रभृत्यायुधवर्तिवीर्यम्।
यावन्न दृष्टं जितसर्वहेति शुम्भासुरध्वंसि तवास्त्रतेजः।।१२१।।

---

१. 'यदा' (अ.र.)।

२. 'यदा केनचिदर्थान्तरस्य धर्मा गुणादयः स्वीक्रियन्ते तदा तद्गुणः' (अ.र.)।

३. 'तस्याम्' (अ.र.)।

४. 'अर्थान्तरोपलब्धौ' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१००. उद्भेदः

सूत्रम्— **निगूढस्य प्रतिभेद उद्भेदः।।१००।।**

वृत्तिः— यत्र किञ्चित्प्रच्छादितत्वे निगूढमपि कुतश्चित्प्रतिभिद्यते प्रकटीभवति स उद्भेदः।

उदाहरणम्— सन्ध्यानुरक्तं हरमीक्ष्य जातं मन्युं निगूढं त्वयि या विभेद।
अक्ष्णारुणेन स्फुरताधरेण स्मेरानना साद्रिसुतावताद्वः।।१२२।।

१०१. गूढम्

सूत्रम्— **गूढमाकाङ्क्षोपनिबन्धो[1] गूढम्।।१०१।।**

वृत्तिः— यत्रानभिहितस्य गूढस्य वस्तुनोऽनुपादानात्साकाङ्क्षं वस्तूपनिबध्यते तद्गूढार्थत्वाद् गूढम्।

उदाहरणम्— मौलीन्दुसन्दर्शनतः प्रहृष्टा दृष्टावतंसा हि विलोकनेन।
वरप्रदानेन हरस्य तुष्टा क्लिष्टा तपोभिर्गिरिजावताद्वः।।१२२।।

१०२. सूक्ष्मम्

सूत्रम्— **सूक्ष्मार्थसूचनं सूक्ष्मम् ।।१०२।।**

वृत्तिः— सूक्ष्मः स्थूलमतिभिरसंलक्ष्यो वाक्येन संज्ञया वा गूढतया परस्मै प्रकाश्यते तत्सूक्ष्मम्।

उदाहरणम्— निबध्य यस्याः शशिरत्नहारं कुचद्वयाग्रे शशिचूर्णगौरे।
शशिप्लुतं वीक्ष्य जया जहास प्रीणातु सा वः शशिमौलिपत्नी।।१२४।।

१०३. व्याजोक्तिः

सूत्रम्— **उद्भेदप्रच्छादनं व्याजोक्तिः।।१०३।।**

वृत्तिः— यत्राशङ्क्यमानस्योद्भेदस्योत्पन्नस्य वा वचनेन चेष्टादिना वा प्रच्छादनं सा चतुर्विधा व्याजोक्तिः।

उदाहरणम्— पार्श्वस्थितेशप्रणयाङ्गसङ्गमनोभवोल्लासरसास्नुताङ्गी।
द्युसद्गुणाकीर्णसभोष्मजातं स्वेदं वहन्ती गिरिजावताद्वः।।१२५।।

१०४. वक्रोक्तिः

सूत्रम्— **अन्यथा सम्भावितयोः शब्दार्थयोरन्यथा योजनं वक्रोक्तिः।।१०४।।**

---

१. 'गूढसाकाङ्क्षोपनिबद्धं गूढम्' (अ.र.)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृत्तिः— यत्र वक्त्रा श्रोत्रा वा शब्दस्यार्थस्य वान्यथा सम्भावितस्य प्रकारान्तरेण योजनं सा वक्रोक्तिः। अस्याश्च क्वचिच्छ्लेषेण काक्वा धर्मसामान्येन वान्यथा योजनम्, क्वचित्त्वौपचारिके प्रयोगे मुख्यार्थापादनम्, कुत्रचिदर्थान्तर एव योजनम्, क्वापि सम्भावितेऽपीत्यनेकप्रकारा वक्रोक्तिः।

उदाहरणम्— गवि स्थितः प्रेक्ष्य हरेः पदस्थां कालीं मुदा नृत्यति कः सतृष्णः।
जये मयूरो न हि हंसकोऽन्यः प्रियस्तवेशीत्युदिताद्रिजाव्यात्।।१२६।।
अद्रेः सुता त्वं प्रथितासि काली रवेस्तनूजा यमुनास्मि नाहम्।
गिरीशजायासि नगेन्द्रजा क्व यामीति सख्याः कथयन्त्युमाऽव्यात्।।१२७।

१०५. स्वभावोक्तिः

सूत्रम्— **सम्यक्स्वभाववर्णनं स्वभावोक्तिः।।१०५।।**

वृत्तिः— द्विविधो वस्तुनः स्वभावः—स्थूलः सूक्ष्मश्च। तत्र कवितृमात्रगोचरः स्थूलस्तस्य वर्णनं न कश्चिदलङ्कारः, सर्वस्य काव्यस्य स्वभावोक्ति-प्रसङ्गात्। सम्यग्वर्ण्यमानस्तु स्वभावः सूक्ष्मः, स तु महाकवि-विरचितः, तस्य सम्यग्वर्णनम्अन्यूनानतिरिक्तत्वेन स्वभावोक्तिः।

उदाहरणम्— इलातलास्त्रोपलभेदलीलाः कट्यामपङ्क्त्प्लवखेलनानि।
गणार्भकैः सार्धमुपाचरन्तं कदाम्बिके मोचयसे मृडं माम्।।१२८।।

१०६. भाविकम्

सूत्रम्— **विप्रकृष्टस्य प्रत्यक्षायमाणत्वं भाविकम्।।१०६।।**

वृत्तिः— देशकालाभ्यां स्वभावेन वा विप्रकृष्टस्यार्थस्य साक्षाद्ग्रहणायोग्य-स्यापि सामग्रीबलेन प्रत्यक्षायमाणत्वं स्फुटतया पुरः स्फूरद्रूपत्वेनैव प्रतीतिर्भाविकम्।

उदाहरणम्— इहातलस्थोपलभेदलीलाः स्थित्वा मदंसोपरि कुर्वतो द्राक्।
कदा कुमाराद्बहुशैलचारखिन्नं शिवे मोचयसे मृडं माम्।।१२९।।
सद्रत्नचक्राङ्कशिखासनाथ षडाननेन्दुं हरचाटुगीतीः।
गणार्भकैः सार्धमुदाहरन्तं प्रेक्ष्य प्रहृष्टा गुहमद्रिजाव्यात्।।१३०।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परिकरश्लोक:— सूक्ष्मस्वभावकथनेन विनापि साक्षा-
दर्थप्रतीतिरिह केवलभाविकाङ्गम्।
शुद्धः समग्रजनतानुभवप्रसिद्ध-
सम्यक्स्वभावभणितौ तु भवेत्स्वभाव:।।

१०७. उदात्तम्

सूत्रम्— **उदात्तचरिताङ्गमुदात्तम्।।१०७।।**

वृत्ति:— उदात्तचरितानां यत्र चरितं वस्त्वन्तराङ्गतामुपयाति तदुदात्तम्।

उदाहरणम्— मृगाननं गृत्समदेशमश्ववक्त्रै: समं दन्तिमुखस्य गीती:।
गायन्तमग्रे समवेक्ष्य जातहासा हराद्रौ गिरिजावताद्व:।।१३१।।

जीवनपरिचय:

प्रद्युम्नस्य चकार यत्र गिरिजा श्रीशारिकानुग्रहं
नद्या यत्र वराहलोचनभुवा मारीसरित्सङ्गता।
राजा स प्रवराभिधो हरगिरिं यात: सदेहो यत-
स्तिष्ठंस्तत्र पुरे यशस्करकविस्तुष्टाव गौरीमिति।।

श्रीशोभाकरसूत्रार्थस्वल्पोहामात्रघट्टनम्।
निर्मितं रत्नकण्ठेन देवीस्तोत्रेऽत्र चारुणि।।

**।। इति श्रीकश्मीरदेशवास्तव्यश्रीयशस्करकविरचितमलङ्कार-
रत्नाकरोदाहरणनिबद्धं देवीस्तोत्रं समाप्तम्।।**

।। शुभम्।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहृतपद्यानामकारादिक्रमेण सूची

क्रमाङ्काः	पद्यानि	पृष्ठाङ्काः
१.	अगण्यकारुण्यवती.	४
२.	अद्रेः सुता त्वं	३४
३.	अधःकृतो येन वृषः सकामो	१५
४.	अनन्यतुल्यर्द्धि.	०५
५.	अनुत्तमां काञ्चनतां वहन्ती	२५
६.	अभीष्टदानाद् भवसिन्धुतारात्	११
७.	अलक्ष्यमक्षातिगवृत्तिसूक्ष्मं	२३
८.	असौ गुरुर्दुश्चरितो ममात्मा	२५
९.	असौ शशी दैन्यनिशा.	१०
१०.	आदौ स्वहुङ्कारहुताशधूमौ	३०
११.	आधारतः षट्कमलानि भित्त्वा	३०
१२.	आवर्जितस्तावकविक्रमेण	३०
१३.	आसन् युगादौ चिरजीविनस्ते	३१
१४.	इयं तडित्किं क्व स	११
१५.	इलातलास्त्रोपलभेदलीलाः	३४
१६.	इहातलस्थोपलभेदलीलाः	३५
१७.	उपेक्ष्य संरक्ष्य च भक्तलोकं	१९
१८.	कदाचिदाम्नायमुखाच्छृणोमि	८
१९.	कम्पात्कृतान्तस्य	२
२०.	करावलम्बो निरयप्रपाते	१०
२१.	किं सिन्धुवारस्त्रगसौ निवीता	११
२२.	कुलाचलेन्द्रस्य सुता हिमाद्रे.	१७
२३.	कृतार्थना यच्छति	८
२४.	क्षमावनीलोकजन.	१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२५.	गङ्गेव नित्याश्रितपुण्डरीका	४
२६.	गवि स्थितः प्रेक्ष्य हरेः	३४
२७.	गौरीरुचा प्राप्तगुहानुषङ्गा	१२
२८.	चन्द्राभिरामं मुखवत्किरीटं	०५
२९.	चन्द्रो ययाचे वदनस्य कान्तिं	०९
३०.	चिरस्थितं नश्यति पापमेति	२०
३१.	जगद्रणोपद्रव.	०२
३२.	जग्राह लक्ष्मीं कमलान्मुखं	०७
३३.	जन्मामले ब्रह्मकुलेऽर्थलाभः	२३
३४.	जहाति भास्वद्गुरुपादसेवी	२४
३५.	जातार्कजाद्रीर्जरसा समं	१६
३६.	जितास्त्वया गौरी तपश्चरन्त्या	१५
३७.	तपश्चरन्त्याः पतिकाम्ययोच्चै.	२९
३८.	तमांसि हन्त्येव महान्ति तेजो	२६
३९.	तवाननेनाचलराजपुत्रि	२७
४०.	तवेशि भक्ताः सुरथक्षितीश.	२२
४१.	त्वत्पादपद्मद्वयपूजनेन	२०
४२.	त्वद्भक्तिचन्द्रप्रभया ममेशि	१९
४३.	त्वं ग्रावतो लब्धजनिर्जनित्री	१४
४४.	त्वमेव संसाररुजापहारे.	७
४५.	त्वां देवि संसेव्य स वत्सराजो	२६
४६.	त्वां शृण्वतस्त्वां स्मरतो	३०
४७.	दाता सुराणां विभवस्य भक्त्या	१६
४८.	देवि द्विपेन्द्रकटद्विरेफा.	१२
४९.	द्विषद्धृतक्ष्मातलराज्यलब्धिं	२६
५०.	द्रोणो दशत्येव शिरोधृतोऽपि	२१
५१.	धर्मस्य मूलं निखिलस्य	३२
५२.	धृत्या समीरः शुचि.	६
५३.	ध्यानक्षणे शान्तमनोविकल्प.	२४
५४.	ध्यायन्ति चन्द्रामलवक्त्रकण्ठ.	३०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५५.	न दह्यते क्षेत्रमिदं मदीयं	२५
५६.	निबध्य यस्याः शशिरत्नहारं	३३
५७.	निषेवितो वा परिवर्जितो वा	२६
५८.	नीलाम्बरासङ्गभृतं हिमाद्रौ	२९
५९.	नीलाम्बुजाम्भोजमराललोक.	०७
६०.	नेत्रोत्पलानन्दकृदाननेन्दुः	०९
६१.	पत्या समं चन्द्रकिरीटभासा	१६
६२.	परिच्छिनत्त्यम्बुघटैः स सिन्धुं	२१
६३.	पातालतोये विबुधान्विजित्य	२९
६४.	पादौ समाकृष्य चरन् वने यः	१४
६५.	पानं सुराणां कुरुषे	१४
६६.	पार्श्वस्थितेशप्रणयाङ्गसङ्ग	३४
६७.	प्रकाशयन्त्या भुवनप्रसादं	१०
६८.	प्रच्छायरम्ये भवने वने वा	२९
२९.	प्रसादयेदुन्मदनां सरागां	२८
७०.	बलानि भग्नानि	०५
७१.	भजत्यपूर्वाणि यशांसि सोऽत्र	३१
७२.	भवानि भक्तस्य भवाग्नितापं	१८
७३.	भवानि भूमीतलतोऽन्तरिक्षं	३०
७४.	भवानि भूयो यदि जन्म.	३१
७५.	भालस्थलीचित्रदेश.	१२
७६.	भ्रूरेव वक्रा शिर एव नम्र.	२८
७७.	मनुष्यलोके शिवभक्तियुक्तं	०७
७८.	मलेन्द्रकं स्याद्यदि वारिराशिः	१३
७९.	महन्महादेवि महानुभावा	२२
८०.	मर्त्योऽहमम्ब त्वममर्त्यमूर्ति.	९
८१.	मातॄः सदा पश्यसि नाग्निलग्ना	१४
८२.	मातेति देवैर्दुहितुः सुतेति	१३
८३.	मूर्खत्वमद्यास्तु दरिद्रतास्तु	१८
८४.	मूर्तिः कुमारी परिवारिता ते	२२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८५.	मृगाननं गृत्समदेशमश्व.	३५
८६.	मेघैर्विना द्यौरिव निर्मला त्वं	१५
८७.	मौलीन्दुसन्दर्शनत: प्रहृष्टा	३३
८८.	यत्पङ्कजं प्लुष्यसि दु:खजातं	३२
८९.	यश्चन्द्रहृद्यो नखरांशुमैत्रीं	०९
९०.	यस्याङ्घ्रिलग्ना भुजगा नटन्ति	१९
९१.	यस्यास्तुलां दर्पणगा.	०४
९२.	या प्राप पापक्षितिपस्तवेन	२३
९३.	येऽर्था वितीर्णा गृहमेत्य	२३
९४.	रन्ध्रैरपेतां सरलस्वभावो	२७
९५.	रागादिदोषाविलचित्तशुद्धौ	२५
९६.	रूपं श्रुतं श्री: शुभवंशजन्म	२२
९७.	लघुं कुरुष्वाघभरं निवार्य	२८
९८.	लावण्यकान्तिग्लपिता.	३२
९९.	वक्त्रं निरस्यामलनेत्रसङ्गं	२४
१००.	वक्त्रेण कात्यायनि भास्वता	१९
१०१.	वच्मि प्रसीदेति न तेऽस्तकोपे	१८
१०२.	वार्येव शक्नोति नियन्तु	०७
१०३.	विना तप: किञ्चिदपीह	२६
१०४.	विभूतिभाजां गगनेचराणां	१८
१०५.	व्यालाकुले तीव्रतम: कराले	२४
१०६.	शक्रादिभिस्तावदवेदि देवै:	३३
१०७.	शब्दादयो ये विषया जनस्य	२२
१०८	शाम्येत्प्रतीकै: सह मोहराशि:	१४
१०९.	शिलीमुखा: संयति वैरिमुक्ता:	२०
११०.	शुम्भासुरेन्दीवरलोचनानां	१७
१११.	शुम्भासुरो यो विभिन्दितोरो	११
११२.	श्रियं सुराणां दिशति	०६
११३.	सदैव सर्वत्रगता ददासि	१४
११४.	सद्रत्नचक्राङ्कशिखासनाथ	३५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

११५.	सन्ध्याक्षणे चण्डि जगद्धिताय	२७
११६.	सन्ध्यानुक्तं हरमीक्ष्य जातं	३३
११७.	साम्राज्यमुर्व्याममरालयाप्ति.	१३
११८.	सितांशुरीशस्त्वमपीशि काली	२१
११९.	सुपर्वशत्रोर्महिषस्य	२०
१२०.	सुरासुरेन्द्रामल.	०२
१२१.	संक्रान्तमद्यापि हि दानवानां	२२
१२२.	संसारदु:खस्मृतिबाधमानं	०८
१२३.	स्त्रियां धने प्रेयसि	२३
१२४.	स्त्रीयौवनं चिन्तयतो	२४
१२५.	स्थाणुर्महेशो जगति प्रतीत:	२१
१२६.	स्मरस्य देहं यदि नेन्दुमौलि.	१३
१२७.	हर्यक्षहर्यक्षरथाधिरूढा	०३
१२८.	हिमाद्रिकच्छे तप आचरन्त्या	३२
१२९.	हृदि ज्वलद्दीपशिखाम्बुरूपां	३१
१३०.	हृद्योल्लसत्सद्मनि सम्पदुच्चै:	२१
१३१.	हृन्मेरुगां कल्पलतामिव	०४

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघु-ग्रन्थमाला
[५८]

श्रीहरिरायविरचिता

तर्कचन्द्रिका

(न्यायदर्शनस्य प्रकरणग्रन्थः)

सम्पादकः
डॉ. हरेरामत्रिपाठी
प्राध्यापकः
सर्वदर्शनविभागे (न्यायस्य)
जम्बूस्थ-श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वि.सं. २०५७

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भूमिका

न्यायशास्त्रस्यादिमो ग्रन्थो न्यायसूत्रमस्ति। तस्य प्रणेता गौतममुनिर्विद्यते। न्यायशास्त्रस्य विभाग द्विविध इत्यवलोक्यते। प्रमेयप्रधानः प्रमाणप्रधानश्चेति। येषु ग्रन्थेषु प्रमेयविचाराणां प्राधान्यं भवति ते प्रमेयप्रधानाः सन्ति। यथा—न्यायसूत्रं, वात्स्यायनभाष्यं, न्यायवार्तिकतात्पर्यटीका, न्यायवार्तिकतात्पर्यपरिशुद्ध्यादयो ग्रन्थाः सन्ति। येषु ग्रन्थेषु प्रमाणविचाराणां प्राधान्यं भवति ते प्रमाणप्रधानाः। यथा—तत्त्वचिन्तामणिः, तत्त्वचिन्तामणिदीधितिः, तत्त्वचिन्तामणिदीधितिगादाधरी, जागदीशी चेत्यादय इति। न्यायदर्शने चतुर्विधः प्रकरणग्रन्थ उपलभ्यते—

प्रथमः प्रकरणग्रन्थः

अत्र प्रमाणपदार्थानां निरूपणमस्ति। न्यायदर्शनस्वीकृतप्रमाणातिरिक्त-पञ्चदशपदार्थानामन्तर्भावः प्रमाणेष्वेव विद्यते। यथा—भासर्वज्ञस्य 'न्यायसारः' इति।

द्वितीयः प्रकरणग्रन्थः

अत्र षोडशपदार्थानामुद्देशलक्षणपरीक्षाः सन्ति। तत्र षोडशपदार्थेष्वेव वैशेषिकदर्शनस्वीकृतसप्तपदार्थानामन्तर्भावो विद्यते। एते ग्रन्था निम्नोक्ताः सन्ति—

लेखकाः	ग्रन्थाः
१. श्रीवरदराजाचार्यः	'तार्किकरक्षा' (११५०ई.)
२. केशवमिश्रः	'तर्कभाषा' (१२७५ई.)
३. हरिरायः	'तर्कचन्द्रिका'

तृतीयः प्रकरणग्रन्थः

अत्र वैशेषिकदर्शनस्य पदार्थानां निर्वचनं विद्यते। यथा—

क्र.सं.	लेखकाः	ग्रन्थाः
१.	उदयनाचार्यः	'लक्षणावली'
२.	वल्लभाचार्यः	'न्यायलीलावती'
३.	अन्नम्भट्टः	'तर्कसङ्ग्रहः'

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४.	विश्वनाथन्यायपञ्चाननः	'न्यायसिद्धान्तमुक्तावली'
५.	लौङ्गाक्षिभास्करः	'तर्ककौमुदी'
६.	जगदीशभट्टाचार्यः	'तर्कामृतम्'

चतुर्थः प्रकरणग्रन्थः

अत्र न्यायवैशेषिकयोः केषाञ्चित् पदार्थानां निरूपणं विद्यते।

लेखकाः	**ग्रन्थाः**
१. शशधरः	'न्यायसिद्धान्तदीपः'
२. माधवाचार्यः	'सर्वदर्शनसङ्ग्रहः'

प्रकरणस्य लक्षणमित्थं विद्यते—

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आह प्रकरणं नाम ग्रन्थभेदविपश्चितः ।। इति।

हरिरायकृता 'तर्कचन्द्रिका' न्यायदर्शनस्य प्रकरणग्रन्थो विद्यते। यथा केशवमिश्रकृततर्कभाषायां षोडशपदार्थानां विवेचनं वैशेषिकपदार्थानां षोडशपदार्थेष्वेवान्तर्भावश्च विद्यते, तथैव तर्कचन्द्रिकायामपि विद्यते।

तर्कचन्द्रिका-तर्कभाषयोः कुत्रचिद् वाक्यसाम्यम्

तर्कचन्द्रिका	तर्कभाषा
१. तर्काः प्रमाणादिषोडशपदार्थाः। तथा च सूत्रम्—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्य प्रथमं सूत्रम्।	१. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम्।
२. लक्षणं त्वसाधारणधर्मप्रतिपादकं पदम्।	२. लक्षणं त्वसाधारणधर्मवचनम्।
३. अत्र प्रथमोद्दिष्टस्य प्रमाणस्य साम्प्रतं लक्षणमुच्यते। प्रमाकरणं प्रमाणम्।	३. तत्रापि प्रथममुद्दिष्टस्य प्रमाणस्य तावल्लक्षणमुच्यते। प्रमाकरणं प्रमाणम्।
४. तच्च कारणं त्रिविधं समवाय्यसम-वायिनिमित्तभेदात्। तत्र यत्समवेतं कार्य-मुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्।	४. तच्च कारणं त्रिविधम्। समवाय्यसम-वायिनिमित्तभेदात्। तत्र यत्समवेतकार्य-मुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य समवायिकारणम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

५. तच्चानुमानं द्विविधम्। स्वार्थं परार्थञ्चेति। स्वप्रतिपत्तिजनकं स्वार्थं, परप्रतिपत्तिजनकं परार्थम्।

६. नन्वर्थापत्तिरपि पृथक् प्रमाणान्तरमस्तीति चेत्, तथा हि पीनो देवदत्तो दिवा न भुङ्क्त इति दृष्टे श्रुते वा दिवा भुञ्जानस्य पीनत्वं रात्रिभोजनमन्तरेणानुपपन्नमित्यर्थाक्षिप्तं रात्रिभोजनं कल्प्यत इति चेन्न।

७. तथाप्यभावग्रहणार्थमनुपलब्धिरूपमभावाख्यं पृथक् प्रमाणान्तरं स्वीकार्यमिति चेत्।

८. अथ प्रमेयाण्युच्यन्ते।

९. तत्रात्मत्वसामान्यवानात्मा। स च नित्यो विभुश्च बुद्ध्यादिगुणलिङ्गादनुमेयः।

१०. भोगायतनमन्त्यावयविशरीरम्। यदवच्छेदेनात्मनि भोगो जायते तद् भोगायतनम्। भोगस्तु सुखदुःखसाक्षात्कारः। द्रव्यानारम्भकं कार्यं द्रव्यमन्त्यावयवि चेष्टाश्रयो वा शरीरम्। चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रियेति।

११. शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियम्।

१२. तत्र पृथिवीत्वसामान्यवती पृथिवी।

१३. तेजस्त्वसामान्यवत्तेजः।

५. तच्चानुमानं द्विविधम्। स्वार्थं परार्थञ्चेति। स्वार्थं स्वप्रतिपत्तिहेतुः।

६. नन्वर्थापत्तिरपि पृथक् प्रमाणान्तरमस्ति। अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनमर्थापत्तिः। तथा हि पीनो देवदत्तो दिवा न भुङ्क्त इति दृष्टे श्रुते वा रात्रिभोजनं कल्प्यते।

७. नन्वभावाख्यमपि पृथक् प्रमाणमस्ति तच्चाभावग्रहणायाङ्गीकरणीयम्।

८. प्रमाणान्युक्तानि। अथ प्रमेयाण्युच्यन्ते।

९. तत्रात्मत्वसामान्यवानात्मा। स च देहेन्द्रियादिव्यतिरिक्तः, प्रतिशरीरभिन्नो नित्यो विभुश्च। स च मानसप्रत्यक्षः। विप्रतिपत्तौ तु बुद्ध्यादिगुणलिङ्गकः।

१०. तस्य भोगायतनमन्त्यावयविशरीरम्। सुखदुःखान्यतरसाक्षात्कारो भोगः। स च यदवच्छिन्न आत्मनि जायते तद्भोगायतनम्, तदेव शरीरम्। चेष्टाश्रयो वा शरीरम्। चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रिया, न तु स्पन्दनमात्रम्।

११. शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियम्।

१२. तत्र पृथिवीत्वसामान्यवती पृथिवी।

१३. तेजस्त्वसामान्यवत्तेजः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थकारस्य परिचयः

तर्कचन्द्रिकाख्यस्य प्रकरणग्रन्थस्य प्रणेतुर्हरिरायस्य विवरणं न कुत्रापि प्राप्यते, तथापि तर्कचन्द्रिकाया मङ्गलाचरणेन प्रतीयते यदस्य लेखकः पण्ड्यागोपालस्य पुत्रोऽस्ति। यथोक्तम्—

हाटकेशं सिद्धनाथं प्रणिपत्य गुरुं तथा।
पण्ड्यागोपालपुत्रेण क्रियते 'तर्कचन्द्रिका' ।।इति।

तर्कचन्द्रिकाख्यस्य प्रकरणग्रन्थस्य लेखको हरिरायो विद्यते। हरिरायस्तैजसपायसगोत्रोत्पन्नो विद्यते। अस्य पिता पण्ड्यागोपालः, ज्येष्ठभ्राता श्रीमान् पण्ड्याभगवतीदासः, कनिष्ठभ्राता श्रीपतिश्च विद्यत इति तर्कचन्द्रिकाया अन्तिमश्लोकेन ज्ञायते। तथा हि—

हरिरायेण पण्डितेन निर्मिता तर्कचन्द्रिका ।।इति।

श्रीमद्गोपालजीपुत्रेण श्रीमत्पण्ड्याभगवतीदासकनिष्ठेन श्रीपण्ड्याश्रीपतेर्ज्येष्ठेन हरिरायेण विरचिता तर्कचन्द्रिका ।। इति।

कालः

पण्ड्याहरिरायस्य कालविषये प्रामाणिकं तथ्यं न किञ्चिदवाप्यते, तथापि तर्कचन्द्रिकाख्यस्य प्रकरणग्रन्थस्यान्ते इत्थं लिखितमस्ति—

''वेदबाणमुनीन्द्वब्दे शुक्लभाद्रस्य सप्तमी।
अस्यां हरिरायेण निर्मिता तर्कचन्द्रिका'' ।। इति।

तथा च हरिरायकृततर्कचन्द्रिकाया निर्माणकालः १७५४ संवत्सरस्य भाद्रपदमासस्य शुक्लपक्षस्य सप्तमी तिथिर्विद्यते। तर्कभाषायाः प्रणेतुः केशवमिश्रस्य स्थितिकालस्त्रयोदशशताब्दी विद्यते। तथा हि हरिरायः केशवमिश्रस्य परवर्ती विद्यते। हरिरायस्य स्थितिकालः सप्तदशशताब्दी विद्यत इति।

कृतज्ञताज्ञापनम्

परमश्रद्धेयानामाचार्यप्रवराणां **श्रीविद्यानिवासमिश्रमहोदयानां** पादपद्मयोर्भूयो भूयः सश्रद्धं प्रणतिं समर्पयामो येऽस्मान् नितरां स्निह्यन्ति। तत्कृपयैव चेदं कार्यं सम्पादितम्। परमश्रद्धेयानामाचार्यप्रवराणां **श्रीवशिष्ठत्रिपाठिमहोदयानां** चरणकमलयोर्भूयो भूयः सश्रद्धं प्रणतिं समर्पयामो येऽस्मान् नितरां स्निह्यन्ति। तत्कृपयैव सत्प्रेरणया चेदं कार्यं सम्पादितं मया।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अस्य हस्तलेखस्य मूलस्य छायाप्रतिः सरस्वतीभवनपुस्तकालयतः प्राप्ता। एतदर्थं तद्विश्वविद्यालयस्य कुलपतयः, अधिकारिणः, पुस्तकाध्यक्षाश्च धन्यवादार्हाः सन्ति। **डॉ.केशवप्रपन्नशर्माणः**, **डॉ.ललितकुमारत्रिपाठिनः**, **डॉ.वैद्यनाथझाश्च** धन्यवादार्हाः। अतः परं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याङ्गीभूतस्य प्रकाशन-संस्थानस्य निदेशकानां **डॉ.हरिश्चन्द्रमणित्रिपाठिमहोदयानां** सत्प्रेरणया कार्यमेतत् पूर्णतामगात्। अतस्तान् प्रति कार्तज्ञ्यं शिरसा वहामि। सहायकसम्पादकैः **डॉ०ददनोपाध्यायैः** अन्यैश्च संस्थाने कार्यरतैः कर्मचारिभिश्चापि सततपरामर्शपूर्वकं मुद्रणसौविध्यं सम्पादितमतस्तान्प्रति हृदयेन कृतज्ञतां वितरामि। **श्रीकृष्णमुरारीत्रिपाठिनो** धन्यवादार्हाः, अन्ये मुद्रकाश्च धन्यवादार्हाः, यैरस्य ग्रन्थस्य मुद्रणं शीघ्रमेव कृतम्। प्रकृतग्रन्थस्य सम्पादनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसरस्वतीभवनपुस्तकालयतः प्राप्तां पाण्डुलिपिमाश्रित्य कृतम्। ग्रन्थस्यास्य अन्यापि पाण्डुलिपिः, वा द्वितीया 'ख' इति पाण्डुलिपिरपि सरस्वतीभवनपुस्तकालयतः प्राप्ता। अस्य ग्रन्थस्य सम्पादने यथामति पाठनिर्धारणार्थं कश्चन प्रयत्नो व्यधायि, तथाप्यत्र यदि क्वचन त्रुटयः स्युस्तर्हि क्षमां याचे। अन्ते च हनुमन्तं प्रणम्य विरमामि।

विदुषां वशंवदः

हरेरामत्रिपाठी

प्राध्यापकः, सर्वदर्शनविभागे (न्यायस्य)

जम्बूस्थ-श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

क्र.सं.	विषयः	पृष्ठसंख्या
१.	भूमिका	१-५
२.	न्यायसूत्रस्यादिमं सूत्रम्	१
३.	प्रमाणस्य लक्षणम्	१
४.	व्यापारस्य लक्षणम्	१
५.	कारणस्य लक्षणम्	१
६.	अन्यथासिद्धेर्लक्षणम्	२
७.	समवायिकारणस्य लक्षणम्	२
८.	असमवायिकारणस्य लक्षणम्	२
९.	निमित्तकारणस्य लक्षणम्	२
१०.	प्रत्यक्षस्य लक्षणम्	२
११.	सन्निकर्षः	२
१२.	योगस्य लक्षणम्	३
१३.	योगभ्रष्टे सति कथं शुचीनां गेहे जन्म भवति?	३
१४.	अनुमानम्	४
१५.	व्याप्तेः सिद्धान्तलक्षणम्	४
१६.	मणिकारोक्तव्याप्तेर्लक्षणम्	५
१७.	अनुमानस्य भेदः	५
१८.	हेतुभेदः	६
१९.	व्यतिरेकव्याप्तेर्लक्षणम्	६
२०.	हेत्वाभासः	७
२१.	उपमानप्रमाणम्	७
२२.	शब्दप्रमाणम्	८
२३.	आकाङ्क्षायोग्यतासत्तीनां लक्षणम्	८

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२४. अर्थापत्तिः ९
२५. अभावः ९
२६. प्रामाण्यवादः १०
२७. प्रमेयाणि १०
२८. पृथिव्यादिलक्षणम् ११
२९. चतुर्णां भूतानामुत्पत्तिविनाशक्रमः १२
३०. गुणाः १३
३१. कर्माणि १४
३२. विशेषाः १५
३३. समवायः १५
३४. अभावाः १६
३५. अपवर्गः कथमुत्पद्यत इति १६
३६. नव्यमते मोक्षस्य स्वरूपम् १६
३७. परे तु मते मोक्षस्य स्वरूपम् १७
३८. संशयः १७
३९. दृष्टान्तः १७
४०. सिद्धान्तः १७
४१. अवयवाः १८
४२. तर्कः १८
४३. निर्णयः १८
४४. वादः १८
४५. जल्पः १८
४६. वितण्डा १८
४७. छलम् १८
४८. जातिः १८
४९. निग्रहस्थानम् १८
५०. अतिव्याप्त्यव्याप्त्यसम्भवानां दूषकताबीजम् १८-१९

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीहरिरायविरचिता

तर्कचन्द्रिका

हाटकेशं सिद्धनाथं प्रणिपत्य गुरुं तथा।
पण्ड्यागोपालपुत्रेण क्रियते तर्कचन्द्रिका ।।

तर्काः प्रमाणादिषोडशपदार्थाः। तथा च सूत्रं प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्य प्रथमं सूत्रम्। तत्र प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानमुद्देशलक्षणपरीक्षाजन्यम्। तत्रोद्देशस्तु अभिधानादेव पदार्थकथनमुद्देशः। कथनमुद्देश इत्युक्ते काकरवेऽतिव्याप्तिरतः पदार्थेत्युक्तम्। पदार्थकथनमुद्देश इत्युक्ते तु गङ्गायां घोष इत्यत्र लक्षणावाक्येऽतिव्याप्तिरतोऽभिधानादिति अभिधानात्पदार्थ-कथनमित्युक्ते तु प्रमाकरणं प्रमाणमिति लक्षणवाक्येऽतिव्याप्तिरत एवकार इति।

अत्रोद्देशस्तु प्रथमसूत्रेण[1] प्रमाणादिषोडशपदार्थानां कृतः। अत्रालक्ष्ये लक्षण-गमनमतिव्याप्तिः। लक्षणं त्वसाधारणधर्मप्रतिपादकं पदम्, यथा—गोः सास्नाशृङ्ग-वत्त्वम्। परीक्षालक्षणं चाग्रे वक्ष्यते। अत्र प्रथमोद्दिष्टस्य प्रमाणस्य साम्प्रतं लक्षण-मुच्यते। प्रमाकरणं प्रमाणम्। करणं प्रमाणमित्युक्ते छिदाकरणे कुठारेऽतिव्याप्ति स्तद्वारणाय मापदम्। माकरणमित्युक्ते दुष्टेन्द्रियेऽतिव्याप्तिः। दुष्टेन्द्रियस्य भ्रमरूप-माकरणत्वात्तद्वारणाय प्रपदम्। तथा च प्रमाकरणं प्रमाणमिति लक्षणं सिद्धम्। प्रमा च यथार्थानुभवः। याथार्थ्यं तु तद्वति तत्प्रकारकत्वम्, भवति हि रजते इदं रजतमिति ज्ञानं रजतत्ववति रजतत्वप्रकारकमिति यथार्थम्। शुक्ताविदं रजतमिति ज्ञानं तु रजतत्वाभाववति रजतत्वावगाहित्वान्न यथार्थम्। अनुभवपदं स्मृतिवारणाय। अत्रानुभवत्वं स्मृतिभिन्नज्ञानत्वमित्युक्तत्वात्। ननु स्मृतेरपि यथार्थत्वात् प्रमात्व-मस्त्विति किमर्थं तद्वारणमिति चेत्, न, स्मृतेः साक्षात्कारादिप्रमाविलक्षणत्वात्तत् करणमपि विलक्षणं पञ्चमं प्रमाणं स्यादिति प्रमालक्षणेऽनुभवपदं देयमिति सङ्क्षेपः। किं करणमिति चेत्, अत्रोच्यते—व्यापारवदसाधारणं कारणं करणम्। अत्र तज्जन्यत्वे सति तज्जन्यजनकोऽवान्तरव्यापारः। भवति हि चक्षुर्घटसंयोगश्चक्षुर्जन्यः, चक्षुर्जन्यघटज्ञानजनकश्चेति चक्षुर्घटसंयोगोऽवान्तरव्यापार[2] इति। एवमन्यत्रापि व्यापारलक्षणं संयोजनीयम्। ईश्वरज्ञानवारणायासाधारणेति। अत्र कारणत्वमनन्यथा-सिद्धनियतपूर्ववर्तित्वम्। तथा हि घटादिकं प्रति दण्डादिकमनन्यथासिद्ध-

१. ख. प्रथमसूत्रे; २. ख. संयोगो व्यापार इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नियतपूर्ववर्तीति तद्दण्डादिकं घटादिकं प्रति कारणम्। यद्यपि दण्डत्वं दण्डरूपादिकं घटं प्रति नियतसर्ववर्ति भवत्येव, तथापि तन्न कारणं दण्डत्वादीनामन्यथासिद्धत्वात्। अन्यथासिद्धत्वं त्ववश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवति[१] सति तत् सहचरितत्वम्। भवति हि घटं प्रति दण्डादिकमवश्यक्लृप्तनियतपूर्ववर्तित[२] एव घटादिकार्ये सम्भवति सति तत्सहचरितदण्डत्वदण्डरूपगगनकुलालपितारासभादेरन्यथासिद्धत्वमिति। तच्च कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्। तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा तन्तवः पटस्य समवायिकारणम्। समवायिकारणसमवेतत्वे सति यत्कारणं तदसमवायिकारणम्। यथा तन्तुसंयोगः पटस्यासमवायिकारणं, तन्तुरूपं तु पटरूपस्यासमवायिकारणम्।

ननु तन्तुरूपं पटगतरूपस्य कथमसमवायिकारणम्, तस्य पटरूपसमवायिकारणपटे समवेतत्वाभावादिति चेत्, अत्रोच्यते—समवायिकारणत्वं द्विविधम्, एकं कार्यैकार्थसमवेतत्वमपरं कारणैकार्थसमवेतत्वम्। तत्र कार्यैकार्थसमवेतत्वं यथा पटस्य तन्तुसंयोगोऽसमवायिकारणम्, तस्य पटसमवायिकारणे तन्तौ समवेतत्वात् पटं प्रति कारणत्वाच्च। कारणैकार्थसमवेतत्वं तु पटरूपकारणपटसमवायवति तन्तौ तन्तुरूपस्य समवेतत्वादिति पटरूपं प्रति कारणत्वाच्च। समवायिकारणासमवायिकारणभिन्नत्वे सति यत्कारणं तन्निमित्तकारणम्। यथा तुरीवेमादिकं पटस्येति सङ्क्षेपः।

अथ प्रमाणनिरूपणम्

तच्च प्रमाणं चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दभेदात्। तथा च न्यायसूत्रम्—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति। तत्र साक्षात्कारप्रमाकरणं प्रत्यक्षम्। साक्षात्कारत्वं हि साक्षात्करोमीत्यनुभवसिद्धो जातिविशेषः। तच्च प्रत्यक्षं घ्राणरसनचक्षुःश्रोत्रत्वग्मनांसीति भेदात् षड्विधम्। साक्षात्कारप्रमापि षड्विधान्द्रियजन्यत्वात्। तत्सन्निकर्षोऽपि षड्विधः। तथा हि संयोगः संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। तत्र द्रव्यं द्रव्यग्राहकचक्षुस्त्वङ्मनोरूपेन्द्रियसंयोगेन गृह्यते। शब्दभिन्नगुणकर्मद्रव्यगतजातिः संयुक्तसमवायेन। शब्दत्वभिन्नगुण[३]कर्मगतजातिः संयुक्तसमवेतसमवायेन। विशेषणविशेष्यभावेनाभावो गृह्यते। सा च विशेषणता बहुविधावसेया सन्निकर्षाणां बहुविधत्वात्। तथा हि—इन्द्रियसंयुक्तविशेषणतया भूतले घटाभावः। इन्द्रियसंयुक्तसमवेतविशेषणतया शुक्ले पीतत्वाभावः। चक्षुःसंयुक्तसमवेतसमवेतविशेषणतया शुक्लत्वे पीतत्वाभावः। श्रोत्रे शब्दाभावो विशेषणतया, गकारे घत्वाभावः

१. ख. कार्ये सम्भवति सति।
२. ख. पूर्ववर्ति तत एव घटादिकार्ये....।
३. ख. गुणगतकर्मगतजातिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समवेतविशेषणतया। गत्वे घत्वाभावः समवेतसमवेतविशेषणतया, अनयैव च रीत्याऽन्यत्रापि विशिष्य[१] कार्यकारणभावः सुधीभिर्विभाव्य विभाव्य बोद्धव्यमिति[२] सङ्क्षेपः। एवं सन्निकर्षा अपि लौकिकालौकिकभेदेन द्विविधाः। लौकिकसन्निकर्षास्तु प्रोक्ताः। अलौकिकसन्निकर्षा अधुनोच्यन्ते। ते च सामान्यलक्षणाज्ञानलक्षणायोगजधर्मलक्षणाभेदेन त्रिविधाः। तत्र सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः। सामान्यं लक्षणं विषयो यस्या इत्यर्थे सामान्यज्ञानं प्रत्यासत्तिः। तेनैकस्मिन् धूमे वह्निव्याप्तौ गृह्यमाणायां धूमत्ववह्नित्वसामान्यलक्षणप्रत्यासत्त्या सर्वेषु धूमेषु सर्वेषां वह्नीनां व्याप्तिग्रहः। चन्दनेन समं चक्षुःसंयोगे सति सौरभेण समं घ्राणं[३] संयुक्तसमवायाभावेऽपि सुरभिचन्दनमित्यादौ सौरभज्ञानं ज्ञानलक्षणां विना न सम्भवति। योगजधर्मप्रत्यासत्तिरपि द्विविधा, युक्तयुञ्जानभेदेन योगिनो द्वैविध्यात्। [४]युक्तयोगिनश्चिन्तनसहकारेणातीतानागतानां सर्वदातीतानागतपदार्थानां भानम्। युञ्जानस्य तु चिन्तनेन भानमिति सङ्क्षेपः।

ननु [५]युञ्जानयोगिपदार्थविषयकं ग्रहणमित्युक्तम्। योगस्य चित्तवृत्तिनिरोधात्मकत्वेन चिन्तनासम्भव इति चेत्, अत्रोच्यते—बाह्यविषयचित्तवृत्तिनिरोधो योगस्तज्जन्यधर्मः प्रत्यासत्तिः, न तु चित्तवृत्तिनिरोधमात्रम्, तत्सत्त्वे प्रतिबन्धकवशात्तज्जन्यधर्मानुत्पत्तौ चिन्तनसत्त्वेऽप्यतीतादिपदार्थग्रहणाभाव इति। तदा योगभ्रष्टो भवति। तस्य शरीरपाते सति शुचीनां श्रीमतां योगिनां वा कुले जन्म भवति। तदुक्तं भगवता—

'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते'।

अथवा योगिनामेव कुले भवति धीमतामिति। तथा च सकलानीन्द्रियाण्युपसंहृत्य मनश्च हृदये संस्थाप्य बाह्यविषयग्रहणं न सम्भवति। योगजधर्मोत्पत्तौ तु योगिनां बाह्यपदार्थत्वे[६]चिन्तनेऽपि न योगक्षतिः, योगजन्यधर्मोत्पत्तौ योगसिद्धेर्जायमानत्वात्। यागजन्यधर्मोत्पत्तौ तत्सम्बन्धेन स्वर्गोत्पत्तेर्जायमानत्वात्। परे तु

१. ख. विशेषण।
२. ख. बोधव्य इति सङ्क्षेपः।
३. ख. घ्राणसंयुक्तसमवायाभावेऽपि।
४. ख. युक्तयोगिनां सर्वदातीतानागतपदार्थानां भानम्। युञ्जानस्य तु चिन्तनेन भानमिति सङ्क्षेप इति पाठ उपलभ्यते।
५. ख. ननु युञ्जानयोगिनश्चिन्तनसहकारेणातीतानागतपदार्थविषयकं ग्रहणमित्युक्तम्।
६. ख. बाह्यपदार्थचिन्तनेऽपि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बाह्यपदार्थविषयकचित्तवृत्तिनिरोधे सत्यपि सर्वात्मकस्य ब्रह्मणश्चिन्तनाद् बाह्यपदार्थावगम इत्याहुः। ब्रह्मचिन्तनन्तु भ्रुवोर्मध्ये मूर्ध्नि च सुषुम्नामार्गेण प्राणं संस्थाप्य योगधारणं भवति। तथा प्राणप्रयाणोत्सवे ओमित्येकाक्षरं ब्रह्मवाचकपदमुच्चारयन् परं ब्रह्म स्मरति। तदा ब्रह्मसद्म प्रयातीति सङ्क्षेपः। निरुक्तसाक्षात्कारोऽपि पुनर्द्विविधः, सविकल्पकनिर्विकल्पकभेदात्। सम्बन्धावगाहिसप्रकारकं वा ज्ञानं सविकल्पकम्। सम्बन्धानवगाहिनिष्प्रकारकं वा ज्ञानं निर्विकल्पकमिति।

अत्र केचित्—निर्विकल्पकमेव साक्षात्कारः, परमार्थसत्स्वलक्षणशुद्धघटविषयत्वात्। सविकल्पकन्तु अनुमित्युपमितिशाब्दबोधवदलीकावगाहित्वान्न प्रत्यक्षमित्याहुः, तन्न अनुगतधर्मस्य घटत्वादेरयं घट[1] इति प्रत्यक्षसिद्धस्यालीकत्वासिद्धेरिति सङ्क्षेपः। इति व्याख्यातं प्रत्यक्षम्।

अथानुमानं निरूप्यते। तच्चानुमितिकरणमनुमानम्। तत्र व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यं ज्ञानमनुमितिः। व्याप्तिप्रकारकपक्षधर्मताज्ञानं तु वह्निव्याप्यधूमवान् पर्वत इत्याकारकपरामर्शात्मकम्। तज्जन्यं पर्वतो वह्निमानित्याकारकज्ञानमनुमितिः। धूमो वह्निव्याप्य इत्याकारकं लिङ्गज्ञानमनुमानम्।

ननु ज्ञायमानं लिङ्गमतीतलिङ्गस्थले लिङ्गाभावेनानुमितिर्न स्यात्। अस्मन्मते[2] तु तत्रापि लिङ्गज्ञानस्य सत्त्वादनुमितिर्भवत्येव। अथानुमानं न प्रमाणमुपाधिसंशयात्। योग्योपाधीनां योग्यानुपलब्ध्यभावनिश्चयेऽप्ययोग्योपाधिसंशयाद् व्यभिचारसंशयात्।

न च भूयः सहचारदर्शनाद्व्याप्तिग्रहो भविष्यतीति वाच्यम्। शतशः सहचरितयोरपि पार्थिवत्वलोहभेद्यत्वयोर्हीरके व्यतिरेकदर्शनात्। धूमदर्शनानन्तरं वह्नौ प्रवृत्तिस्तु प्रायो वह्निर्भविष्यतीति सम्भावनामात्रत्वादिति। प्रत्यक्षातिरिक्तमनुमानोपमानशब्दानां न प्रमाणत्वमिति चेत्, न, अप्रमाणसाधकानुमानस्य प्रमाणत्वेऽनुमानस्य प्रामाण्यं सिद्धमेव।

अथ तदनुमानस्याप्रमाणत्वेऽनुमानस्याप्रामाण्यरूपविषयबाधादनुमानस्य प्रामाण्यं सिद्धमेव। अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्ये शब्दस्य प्रामाण्यं सिद्धमेव। तद्वाक्यस्याप्रामाण्ये त्वनुमानाप्रामाण्यरूपविषयबाधादनुमानस्य प्रामाण्यं सिद्धमेव। अथानुमितिहेतुव्याप्तिज्ञानविषयीभूता का व्याप्तिः।

अत्रोच्यते—प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यविशिष्टहेतुतावच्छेदकं

१. ख. घटत्वजात्यादेरयं घट;

२. ख. अस्मिन्मते तु।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्याप्तिः। अत्र सामानाधिकरण्यविशिष्टहेतुतावच्छेदकपदोपादानात्तादृशसाध्यसामानाधिकरण्यस्य पर्वतवर्तिरासभादौ सत्त्वेऽपि न क्षतिः। भवति हि वह्निमान् धूमादित्यादौ धूमसमानाधिकरणा घटपटादीनामभावास्तत्प्रतियोगितावच्छेदकं घटत्वपटत्वादिकं वह्निमत्त्वमनवच्छेदकं तदवच्छिन्नवह्निसामानाधिकरण्यं धूम इति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तु वह्निसमानाधिकरणधूमाभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकं धूमत्वमस्तीति न लक्षणसमन्वयः। कपिसंयोगि एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन एतद्वृक्षत्ववति कपिसंयोगाभावस्यासत्त्वात् तत्प्रतियोगितावच्छेदकं कपिसंयोगत्वमित्यव्याप्तिरत उक्तं प्रतियोग्यसमानाधिकरणेति। अत्र प्रतियोगित्वविरोधित्वम्। लक्ष्यैकदेशे लक्षणस्यावर्त्तनमव्याप्तिः। कपिसंयोगाभावस्य कपिसंयोगरूपप्रतियोगिसमानाधिकरणत्वान्नाव्याप्तिः। सेयं व्याप्तिर्यत्र धूमस्तत्राग्निर्यथा महानस इति सहचारदर्शनगम्येति सद्धेतौ सर्वत्र निरुपाधिकसम्बन्धोऽस्ति। अत एवानौपाधिकसम्बन्धो व्याप्तिरिति मणिकारोक्तमपि सङ्गच्छते। कोऽयमत्रोपाधिः। साध्याव्यपकत्वे सति साधनाव्यापक उपाधिः। स चात्रार्द्रेन्धनं, तच्च धूमस्य साध्यस्य व्यापकं यत्र धूमस्तत्रार्द्रेन्धनमिति। साध्यस्य वह्नेरव्यापकं तथा चायःपिण्डे आद्रेन्धनाभावेन धूमाभावः साध्यते। वह्निमान् धूमादित्यादौ तु नोपाधिरस्ति। यदि स्यात्तर्ह्युपलभ्येत इति अनुपलम्भेनोपाध्यभावो निश्चीयते। यत्र च साध्यनिश्चयोऽस्ति तत्र नानुमितिरिति साध्यनिश्चयाभावः कारणमिति।

ननु पर्वतो वह्निमानिति पर्वते यदि साध्यनिश्चयोऽस्ति पर्वते वह्निमनुमिनुयामिति सिषाधयिषाऽप्यस्ति तदा पर्वते त्वनुमितिदर्शनात्। सिषाधयिषाविरहविशिष्टसाध्यनिश्चयाभावः पक्षता। सा च सिद्धिसत्त्वेऽप्यस्तीति सिषाधयिषा उत्तेजिका वाच्या। उत्तेजकत्वं प्रतिबन्धकप्रतिबन्धकत्वम्।[1] प्रतिबन्धिका सिषाधयिषा सा च साध्यनिश्चयाभावः कारणं तत्प्रतियोगिसाध्यनिश्चयस्तत्प्रतिबन्धिका सिषाधयिषा सा च साध्यनिश्चये प्रतिबन्धिकेति साध्यनिश्चये सत्यपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येवेति सङ्क्षेपः। तच्चानुमानं द्विविधम्—स्वार्थं परार्थञ्चेति। स्वप्रतिपत्तिजनकं स्वार्थं, परप्रतिपत्तिजनकं परार्थम्। तथा हि स्वयमेव महानसादौ धूमे वह्निव्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तस्मिन् पर्वतेऽयं पर्वतो वह्निमान्न वेति सन्दिग्धः [2]अविच्छिन्नमूलां गगनगतां धूमरेखां पश्यन्नेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति धूमाग्न्योर्व्याप्तिं स्मरति धूमो वह्निव्याप्य इति। ततो वह्निव्याप्यधूमवान्

---

१. ख. प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वम्। तथा चानुमितौ साध्यनिश्चयाभावः कारणं तत्प्रतियोगिसाध्यनिश्चयस्तत्प्रतिबन्धिका सिषाधयिषा सा च.....इति पाठ उपलभ्यते।

२. ख. अनव्यवच्छिन्न।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पर्वत इति व्याप्तिप्रकारकपक्षधर्मताज्ञानं स एव परामर्शः, तज्जन्यज्ञानं पर्वतो वह्निमानित्यनुमितिस्तत्स्वार्थानुमानम्।

परार्थानुमानन्तु परं बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते। तथा हि पर्वतोऽयं वह्निमानिति शिष्यं प्रतिपत्तिज्ञाते कुत इति शिष्येण पृष्टे धूमादिति गुरुणा हेतुप्रयोगः कृतः। ततो धूमोऽस्तु वह्निमांस्त्विति शिष्यवचनं श्रुत्वा यो यो धूमवान् सोऽग्निमान् यथा महानस इत्युदाहरणं शिष्यं प्रत्युक्तम्। तथा चायं वह्निव्याप्यधूमवानित्युपनयवाक्यं प्रयुक्तम्। ततो वह्निव्याप्यधूमवत्त्ववान् पर्वतोऽयं वह्निमानिति निगमनम्। पञ्चावयवास्तु—पर्वतो वह्निमानिति प्रतिज्ञा, धूमादिति हेतुः, यो यो धूमवान् सोऽग्निमान्, यथा महानस इत्युदाहरणम्, तथा चायमित्युपनयः, तस्मात्तथेति निगमनमिति पञ्चावयववाक्यात् पञ्चरूपोपपन्नाद् हेतोः परोऽप्यग्निं प्रतिपद्यते। पञ्चरूपाणि तु पक्षधर्मत्वम्, सपक्षसत्त्वम्[1], विपक्षाद् व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वञ्चेति। अत्र पर्वते अग्निः साध्यः, धूमो हेतुः। स चान्वयव्यतिरेकी, अन्वयेन व्यतिरेकेण च व्याप्तेः सत्त्वात्। यत्र धूमस्तत्राग्निरित्यन्वयः। यत्र वह्निर्नास्ति, तत्र धूमो नास्तीति व्यतिरेकः। तदेवं धूमो हेतुरन्वयव्यतिरेकी, अन्वयेन व्यतिरेकेण च दृष्टान्तस्य सत्त्वात्। अन्वयव्यतिरेकिहेतुस्तु पञ्चरूपोपपन्न एव स्वसाध्यं साधयितुं समर्थः, न त्वेकेन रूपेणापि हीनः। धूमस्य हेतोः पर्वतपक्षधर्मत्वमस्ति, पक्षे पर्वते धूमस्य सत्त्वात्। सपक्षे महानसे धूमस्य सत्त्वमस्ति। विपक्षाद् ह्रदात् व्यावृत्तिरप्यस्ति। धूमेन पर्वते वह्नौ साध्ये वह्निरूपो विषयोऽबाधितोऽस्ति। केनापि प्रमाणेन न बाध इति धूमेन पर्वते वह्नौ साध्ये वह्न्यभावसाधकं हेत्वन्तरं नास्तीति धूमस्यासत्प्रतिपक्षत्वमस्तीति। के ते पक्षसपक्षविपक्षाः। सन्दिग्धसाध्यवान् पक्षः। यथा धूमानुमाने पर्वतः। निश्चितसाध्यवान् सपक्षः, यथा तत्रैव महानस इति। निश्चितसाध्याभाववान् विपक्षः, यथा तत्रैव महाह्रद इति। केवलान्वयिकेवलव्यतिरेकिहेतुः चतूरूपोपपन्न एव स्वसाध्यं साधयितुं समर्थः, केवलान्वयिनि विपक्षाभावात्, केवलव्यतिरेकिणि सपक्षाभावाच्च। केवलान्वयिहेतुस्तु वाच्यः, ज्ञेयत्वादित्यादिरूपः। केवलव्यतिरेकिहेतुस्तु पृथिवीतरेभ्यो भिद्यते, गन्धवत्त्वादित्यादिरूपः। अन्वयव्याप्तिस्तूक्तैव, व्यतिरेकव्याप्तिस्त्वधुनोच्यते। सा तु साध्याभावव्यापकाभावप्रतियोगित्वरूपा। तदर्थस्तु यत्र वह्न्यभावस्तत्र धूमाभाव इति। वह्न्यभावव्यापकीभूतो यो धूमाभावस्तत्प्रतियोगिधूम इति।

---

१. (ख) सपक्षे सत्त्वम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ननु साध्याभावहेत्वभावयोर्व्याप्तिग्रहात् कथं साध्यानुमितिरन्यथा वह्नि-धूमयोर्व्याप्तिग्रहाद् घटानुमितिः स्यादिति चेत्, न, साध्याभावव्यापकाभाव-प्रतियोगित्वेन पक्षधर्मतानिश्चयः साध्यानुमापकस्तथा च वह्न्यभावव्यापकाभावप्रति-योगिधूमवान् पर्वत इति परामर्शात् पर्वतो वह्निमानित्यनुमितिर्भवत्येवेति सङ्क्षेपः।

अथ सद्धेतुं निरूप्य हेत्वाभासा निरूप्यन्ते। ते चासिद्धविरुद्धानैकान्तिक-प्रकरणसमकालात्ययापदिष्टाः। तत्रासिद्धादिपञ्चान्यतमत्वं हेत्वाभासत्वमिति। तेषु व्यभिचाराद्यन्यत्वे सति परामर्शप्रतिबन्धकतावच्छेदकधर्मवत्त्वमसिद्धत्वम्। स च त्रिविधः—आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति। पक्षे पक्षता-वच्छेदकासिद्धिः आश्रयासिद्धः[१], यथा गगनारविन्दं सुरभि अरविन्दत्वात्, सरोजा-रविन्दवदित्यत्र पक्षे अरविन्दे गगनीयत्वमसिद्धमिति अरविन्दत्वरूपहेतोर्गगनीयत्व-विशिष्टारविन्दात्मकाश्रयः सिद्धः। स्वरूपासिद्धस्तु पक्षे हेत्वभावः। यथा पर्वतो द्रव्यं जलत्वात्, इत्यत्र पर्वते हेत्वभावः। एतदुभयभिन्नासिद्धो व्याप्यत्वासिद्धं यथा पर्वतो वह्निमान् धूलीपटलादित्यत्र धूलीपटले धूमनिष्ठव्याप्त्यभावविरुद्धत्वं साध्यव्यापकाभावप्रतियोगित्वं, यथा गौरश्वत्वादित्यत्र गोत्वव्यापको योऽश्वत्वा-भावस्तत्प्रतियोग्यश्वत्वमिति। अनैकान्तिकस्त्रिविधः। साधारणासाधारणानुपसंहारि-भेदात्। तत्र साधारणादित्रितयान्यतमत्वमनैकान्तिकत्वम्। स एव सव्यभिचारी-त्युच्यते। तत्र साध्यवदन्यवृत्तित्वं साधारणत्वम्। यथा धूमवान् वह्नेरित्यत्र धूमवदस्मिन्नयःपिण्डे वह्नेर्विद्यमानत्वात्। सपक्षव्यावृत्तो हेतुरसाधारणः, यथा शब्दो नित्यः शब्दत्वादित्यत्र शब्दत्वं हि [२]नित्यत्वनिश्चयवद् गगनादिव्यावृत्तमिति। अवृत्तिसाध्यसाधनान्यतरत्वमनुपसंहारित्वम्। यथा पर्वतः आकाशवान् घटात्। घटवानाकाशाद् वा। उभयावृत्तिपक्षे तु आकाशवान् दिश इत्यपि बोध्यम्। प्रकरणसमशब्देन सत्प्रतिपक्ष इत्युच्यते। तथा च यस्य साध्याभावसाधकं हेत्वन्तरमस्ति स सत्प्रतिपक्षः, यथा शब्दो नित्यः श्रावणत्वात्, शब्दत्ववत्, शब्दोऽनित्यः कार्यत्वाद् घटवदिति। पक्षे साध्याभावनिश्चयः कालात्ययापदिष्टः स एव बाध इत्युच्यते। यथा ह्रदो वह्निमान् धूमात्। उत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादिति सङ्क्षेपः। इति निरूपितमनुमानम्।

अथोपमानं निरूप्यते। तत्रोपमितिकरणमुपमानम्। तत् सादृश्यविशिष्टपिण्डज्ञानम्, तथा हि क्वचिद् गवयमजानन् आरण्यकपुरुषं प्रति कीदृग् गवय इति पृच्छति, तेन गोसदृशो गवय इत्युत्तरितो...... मनुसरन् गोसदृशं पिण्डं पश्यति, तदा गोसदृशोऽयं गवय इति जानाति, तदेवोपमानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। ततो गवयो

१. ख. आश्रयासिद्धिरिति पाठः; २. ख. नित्यत्वे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गवयपदवाच्य इत्युपमितिरिति। नन्वतिदेशवाक्यार्थज्ञानं कथं भविष्यतीति वाक्यस्य पदघटितत्वात्। पदं तु वर्णघटितं वर्णानामाशुतरविनाशित्वात्। वर्णघटितपदज्ञानाभावे वाक्यार्थज्ञानाभावादिति चेत्, न, तत्तद्वर्णानुभवजनितसंस्कारसहकृतान्त्यवर्णानुभवकाले तत्तद्वर्णस्मृत्या पदप्रतीतिर्जन्यते। एवं तत्तत्पदानुभवजनितसंस्कारैरुद्बोधकसमवधानादन्तिमपदानुभवसहायेन वाक्यार्थप्रतीतिरिति पदसमूहो वाक्यमिति।

अथ शब्दो निरूप्यते। शाब्दप्रमितिकरणं शब्दः। शाब्दत्वं हि, शब्दात्प्रत्येमीत्यनुभवसिद्धो जातिविशेषः। तत्र मौनिश्लोकादौ शब्दाभावेऽपि शाब्दबोधोदयात्। शब्दज्ञानमेव करणं, वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः। वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। पदजन्यपदोपादानात् प्रत्यक्षादिना पदार्थोपस्थितौ शाब्दबोधाभावेऽपि न क्षतिः। घटपदात् समवायेनाकाशोपस्थितावाकाशस्य शाब्दबोधः स्यादिति वृत्त्येत्युक्तम्। तस्य निराकाङ्क्षादौ शाब्दबोधाभावादाकाङ्क्षादिकं सहकारि। तत्र यत्पदं यत्पदेन विनान्वयबोधाजनकं तत्पदं तत्पदेन सह साकाङ्क्षं, यथा घटपदमम्पदेन विना घटकर्मकान्वयबोधाजनकमिति पटपदमम्पदेन सह साकाङ्क्षम्, एवमानयनपदादावपि बोध्यम्। अर्थाबाधो योग्यता। तेन पयसा सिञ्चतीति वाक्यं योग्यं शेके पयःकरणत्वरूपार्थस्याबाधात्। वह्निना सिञ्चतीति वाक्यं न योग्यं शेके वह्निकरणत्वस्य बाधितत्वादिति। पदाव्यवधानमासत्तिः। गिरिरग्निमान् भुक्तं देवदत्तेनेति वाक्यमासन्नम्। गिरिर्भुक्तमग्निमान् देवदत्तेनेति वाक्यमनासन्नमिति। तात्पर्यज्ञानमपि शाब्दबोधे कारणम्। तच्च तात्पर्यप्रकरणादिना ग्राह्यम्। तेन सैन्धवमानयेत्यादौ तुरगतात्पर्यग्रहात्तुरगबोधः। लवणतात्पर्यग्रहाच्च लवणबोध इति, तात्पर्यञ्च तत्प्रतीतीच्छयोच्चरितत्वम्। अत्र वृत्तिशब्देन शक्तिलक्षणान्यतरसम्बन्ध इत्युक्तम्। तत्र शक्तिः का? अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाशक्तिः। यथा घटपदस्य घटे शक्तिः। शक्यसम्बन्धो लक्षणा यथा गङ्गापदशक्यः प्रवाहस्तत्सम्बन्धस्तीर इति गङ्गापदस्य तीरे लक्षणा। सा तु गङ्गायां घोष इत्यादौ गङ्गापदं स्वार्थप्रवाहं परित्यज्य लक्षणया तीरं बोधयतीत्यत्र जहत्स्वार्था लक्षणा 'श्वेतोऽश्वो[१] धावति' इत्यत्र श्वेतपदं श्वेतगुणमपरित्यज्य श्वेताऽश्वे लाक्षणिकमित्यजहत्स्वार्था लक्षणा। तत्त्वमसीत्यादौ जहदजहल्लक्षणा। इयमेव भागलक्षणेत्युच्यते। तथा हि तत्पदेन सर्वज्ञत्वविशिष्टचैतन्यमुच्यते, त्वंपदेन किञ्चिज्ज्ञत्वविशिष्टं चैतन्यमुच्यते। तत्र सर्वज्ञत्वविशिष्टस्य[२] किञ्चिज्ज्ञत्वांशपरित्यागादिविरुद्धांशद्वयपरित्यागे सति चैतन्यमात्र-

---

१. ख. श्वेतो धावतीत्यत्र।

२. सर्वज्ञत्वविशिष्टचैतन्यस्य ऐक्यासम्भवात् सर्वज्ञत्वविशिष्टचैतन्यस्य सर्वज्ञत्वांशपरित्यागः। किञ्चिज्ज्ञत्वविशिष्टचैतन्यस्य किञ्चिज्ज्ञत्वांशपरित्यागादि.....इति पाठः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मवशिष्यत इति जहदजहल्लक्षणेति सङ्क्षेपः। सा च लक्षणा पदनिष्ठा वृत्तित्वाच्छक्तिवत्। यथा गभीरायां नद्यां घोष इत्यत्र नदीपदं गभीरनदीतीरे लाक्षणिकं गभीरपदं तात्पर्यग्राहकम्। न च विनिगमनाविरहाद् गभीरपदमेव गभीर-नदीतीरे लाक्षणिकं नदीपदं तात्पर्यग्राहकं गम्भीरपदोत्तरसप्तम्या घोषाधारत्व-बोधकत्वमिति वाच्यम्। गभीरायामिति विशेषणविभक्तेः पदसाधुत्वार्थकत्वात्। न तु वाक्ये लक्षणा वाक्ये शक्यत्वात्[१] शक्यसम्बन्धरूपा लक्षणा नास्तीति नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वाद् राजपुरुष इत्यादौ राजपदं राजसम्बन्धिनि लाक्षणिकमिति राजसम्बन्ध्यभिन्नपुरुष इत्यभेदान्वयः। आख्यातस्य कृतौ शक्तिः। पचति पाकं करोतीत्यादौ कृत्यर्थकेन कृधातुना सर्वाख्यातविवरणात्। विवरणन्तु तत्समानार्थकेन तदर्थकथनम्। तथा 'पचति चैत्रः' इत्यत्र पाकानुकूलकृतिमान् चैत्र इति बोधः। अचेतने रथो गच्छतीत्यादौ गमनानुकूलव्यापारवान् रथ इत्यादि-बोधादाख्यातस्य व्यापारे लक्षणा। यजेतेत्यादाविष्टसाधनत्वं बलवदनिष्टा-ननुबन्धित्वकृतिसाध्यत्वं च विध्यर्थः। तेनेष्टाजनके मण्डलीकरणादौ बलवदनिष्ट-जनके मधुविषसम्पृक्तान्नभोजनादौ सुमेरुशृङ्गारोहणादौ कृत्यसाध्ये च न प्रवृत्ति-रिति। यागस्याशुतरविनाशिनः कालान्तरभाविफलजनकत्वासम्भवात् फलपर्यन्ता-वस्थायिव्यापाररूपस्थाय्यपूर्वं कल्प्यत इति सङ्क्षेपः। इति निरूपितानि चत्वारि प्रमाणानि। एतदतिरिक्तं प्रमाणान्तरं नास्ति।

नन्वर्थापत्तिरपि पृथक् प्रमाणान्तरमस्तीति चेत्, तथा हि 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति दृष्टे श्रुते वा दिवाभुञ्जानस्य पीनत्वं रात्रिभोजनमन्तरेणानुपपन्न-मित्यर्थाक्षिप्तं रात्रिभोजनं कल्प्यत इति चेत्, न, रात्रिभोजनस्यानुमानगम्यत्वात्। तथा हि 'पीनो देवदत्तो रात्रिभोजनवान्' रोगियोगिभिन्नत्वे सति दिवाभुञ्जानत्वे सति च पीनत्वात्। यत्र रात्रिभोजनत्वाभावः, तत्र रोगियोगिभिन्नत्वे सति दिवाभुञ्जानत्वे सति च पीनत्वाभावः, यथा दिवारात्र्यभुञ्जानोऽपीन इति केवलव्यतिरेक्यनुमानेनैव रात्रिभोजनस्यावगमादिति। तथाप्यभावग्रहणार्थमनुपलब्धि-रूपमभावाख्यं पृथक् प्रमाणान्तरं स्वीकार्यमिति चेत्। तथा हि अभावेन समं संयोगादिक्लृप्तसन्निकर्षाणामभावाद् योग्यानुपलब्धिरूपपृथक् प्रमाणान्तरं स्वीकार्यम्। तदर्थस्तु घटो यदि स्यात्तर्ह्युपलभ्येत नोपलभ्यत इति कृत्वा नास्तीति योग्यानुपलब्ध्या घटाभाव ज्ञानमित्याहुः। तन्न। प्रमाणान्तरकल्पनापेक्षया संयुक्त-विशेषणतादिरूपसन्निकर्षान्तरकल्पनाया लघीयस्त्वात्। प्रमाणान्तरकल्पनेऽपि व्यापाररूपसन्निकर्षान्तरकल्पनाया आवश्यकत्वाद् व्यापारवद् असाधारणकारणं

१. ख. शक्त्यभावात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

करणमित्युक्तत्वात्। तथा च योग्यानुपलब्धिरप्यभावग्रहे सहकारिणी। तथा हि संसर्गाभावग्रहे योग्यप्रतियोग्यनुपलब्धिः कारणं यथा घटानुपलम्भे घटाभावग्रहः। भूतले पिशाचात्यन्ताभावस्य न प्रत्यक्षं, पिशाचरूपप्रतियोगिनोऽयोग्यत्वात्। अन्योन्याभावग्रहे त्वधिकरणयोग्यत्वस्य कारणत्वम्। स्तम्भो न पिशाच इति योग्ये स्तम्भरूपाधिकरणे त्वयोग्यस्यापि पिशाचस्य स्तम्भो न पिशाच इत्यन्योन्याभावः प्रत्यक्ष इति सङ्क्षेपः।

अथ[१] ज्ञानप्रामाण्यं स्वतो ग्राह्यमिति मीमांसकाः। तेषामयमाशयः—भट्टमते ज्ञानमतीन्द्रियं तेन घटादिविषये ज्ञातताख्यं फलं जन्यते। ज्ञातो घट इति ज्ञाततायाः प्रत्यक्षत्वात्। तथा च ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञाते गृहीते ज्ञानगतं प्रामाण्यमपि अर्थापत्त्यैव गृह्यत इति यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमिति। गुरुमते तु घटमहं जानामीत्यादिज्ञानाकार इति। स च त्रिपुटीप्रत्यक्षवादीति ज्ञानं ज्ञेयमात्मेति ज्ञाने त्रितयमेव भासते स्वेनैव स्वग्रहे स्वनिष्ठप्रामाण्यमपि स्वेनैव गृह्यत इति गुरुमते स्वतस्त्वम्। मुरारिमते तु घटोपममिति ज्ञानाकारः, तज्ज्ञानं घटमहं जानामीत्यनुव्यवसायेन यदा ज्ञानं गृह्यते तदा तज्ज्ञानप्रामाण्यमप्यनुव्यवसायेन गृह्यत इति। त्रयाणां मतेऽपि यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमिति। तदपरे न क्षमन्ते। तथा हि तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वरूपं प्रामाण्यं तवाभिमतम्, यथा रजते इदं रजतमिति ज्ञाने रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वरूपप्रामाण्यं व्यवसायोपनीतमनुव्यवसायेन गृह्यत इति तावन्मात्रं न प्रामाण्यम्, भ्रमसाधारण्यात्। तथा हि रङ्गरजतयोरिमे रजतरङ्गे इति भ्रमात्मके ज्ञाने रजतत्ववद् विशेष्यकत्वस्य रङ्गत्ववद्विशेष्यकत्वस्य रजतत्वप्रकारकत्वस्य रङ्गत्ववत्प्रकारकत्वस्य[२] सत्त्वात् तद्वारणार्थं रजतत्ववद्विशेष्यकत्वावच्छेदेन रजतत्वप्रकारकत्वस्य रङ्गत्ववद्विशेष्यकत्वावच्छेदेन रङ्गत्वप्रकारकत्वस्य प्रामाण्ये विवक्षितत्वात्तादृशं प्रामाण्यं व्यवसायेनानुपनीतत्वादनुव्यवसायेन न गृह्यत इति ग्रन्थाधिक्यभयादधिकं न लिख्यत इति वाचा[३] प्रमाणानि निरूपितानि।

अथ प्रमेयनिरूपणम्

अथ प्रमेयाण्युच्यन्ते। तान्यात्माद्यपवर्गान्तानि। तथा च न्यायसूत्रम्—

"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः प्रमेयम्" इति। तत्र आत्मत्वसामान्यवानात्मा। स च नित्यो विभुश्च बुद्ध्यादिगुणलिङ्गा-

---

१. ज्ञानप्रामाण्यं परतो ग्राह्यमिति नैयायिका वदन्ति। ज्ञानप्रामाण्यं स्वतो ग्राह्यमिति मीमांसका वदन्ति। अत्र मीमांसकमतमुपस्थाप्य अनन्तरं खण्डयति ग्रन्थकारः।

२. ख. रङ्गत्वप्रकारकत्वस्य।

३. ख. वाचा इति पाठो नास्ति। चत्वारि इति पाठः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दनुमेयः। तथा हि बुद्ध्यादयो विशेषगुणाः, अनित्यत्वे सत्येकेन्द्रियग्राह्यत्वाद् रूपादिवत्। रूपत्वे व्यभिचारवारणायानित्यत्वे सति, घटेऽतिव्याप्तिवारणायैकेति। न च पृथिव्यप्तेजोवाय्वाकाशगुणाः, मानसप्रत्यक्षरूपत्वात्[१]। न च दिक्काल-मनोगुणाः, विशेषगुणत्वात्, गुणाश्च गुण्याश्रिता इति परिशेषात्तदाश्रय आत्मेति। स चात्मा द्विविधः। जीवात्मा परमात्मा चेति। जीवात्मनस्त्वस्मदादयोऽनन्ता एवेति, परमात्मा तु ईश्वरः एक एव, स च सर्वज्ञः।

भोगायतनमन्त्यावयवि शरीरम्। यदवच्छेदेनात्मनि भोगो जायते तद्भोगा-यतनम्। भोगस्तु सुखदुःखसाक्षात्कारः। द्रव्यानारम्भकं कार्यं द्रव्यमन्त्यावयवि चेष्टाश्रयो वा शरीरं, चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रियेति।

शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियम्[२]। आत्मन्यतिव्याप्तिवारणायाती-न्द्रियेति। आत्मा तु मनोरूपेन्द्रियग्राह्यः। कालादावतिव्याप्तिवारणाय ज्ञानकारणेति। निर्विकल्पकेऽतिव्याप्तिवारणाय शरीरसंयुक्तमिति। पदार्थौ[३] द्विविधः, भावाभाव-भेदात्। भावाः षडेव पदार्थाः। ते च द्रव्यगुणकर्मसामान्यसमवायाख्याः। द्रव्यत्व-सामान्यवद् द्रव्यं, गुणाश्रयो वेति। तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकाल-दिगात्ममनांसि नवैव। तत्र पृथिवीत्वसामान्यवती पृथिवी। सा च नित्यानित्यभेदाद् द्विविधा। नित्या परमाणुरूपा, अनित्या कार्यरूपा। सा पुनस्त्रिविधा, शरीरेन्द्रिय-विषयभेदात्। शरीरमस्मदादीनां प्रत्यक्षसिद्धम्। तच्च द्विविधम्। योनिजमयोनिजं द्विविधम्, जरायुजाण्डजभेदात्[४]। जरायुजं मनुष्यपश्वादीनां[५], जरायुशब्देन वेष्टन-चर्मोच्यते। अण्डजं पक्षिसर्पादीनाम्। अयोनिजमपि द्विविधम्, स्वेदजोद्भिजादिभेदात्। स्वेदजं कृमिकीटमशकादीनाम्। उद्भिज्जन्तु वृक्षलतादीनामिति। इन्द्रियं घ्राणरसन-चक्षुश्रोत्रत्वङ्मनांसीति[६] भेदात् षड्विधम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। रसग्राहकमिन्द्रियं रसनम्। तच्च जिह्वाग्रवर्ति। रूपग्राहकमिन्द्रियं चक्षुः। तच्च कृष्णताराग्रवर्ति। शब्दग्राहकमिन्द्रियं श्रोत्रम्। तच्च कर्णशष्कुल्यवच्छिन्नं नभः। स्पर्शग्राहकमिन्द्रियं त्वक् सम्पूर्णशरीरवर्ति। विषयो मृत्पाषाणादिरिति।

अप्त्वसामान्यवत्य आपः। ताश्च द्विविधाः, नित्यानित्यभेदात्। नित्याः परमाणुरूपाः, अनित्याः कार्यरूपाः, ता आपः शरीरेन्द्रियविषयभेदात्त्रिविधाः, शरीरं वरुणलोके प्रसिद्धम्। इन्द्रियं रसग्राहकं रसनं तच्च जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

---

१. ख. मानसाः प्रत्यक्षरूपत्वात्।

२. ख. ज्ञानकारणमतीन्द्रियमिन्द्रियम्।

३. ख. अर्थौ द्विविधः।

४. ख. योनिजं द्विविधं, जरायुजाण्डजभेदात्।

५. ख. मनुष्यपशूनां;

६. ख. मनांसीति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेजस्त्वसामान्यवत्तेजः। तद्द्विविधम्—नित्यमनित्यञ्च। नित्यं परमाणुलक्षणं, कार्यलक्षणमनित्यम्। तत्त्रिविधम्, शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके, इन्द्रियं रूपग्राहकं चक्षुः। विषयश्चतुर्विधः, भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अविन्धनं दिव्यं विद्युदादि। भुक्तान्नपरिणामहेतुरौदर्यं, आकरजं सुवर्णादिः। सुवर्णस्य तैजसत्वे किं मानमिति चेत्, अत्रोच्यते—सुवर्णं तैजसम्, अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वात्। पृथिवीजलयोर्द्रवत्वस्यात्यन्तानलसंयोगनाश्यत्वात्तदुभयद्रवत्वं विलक्षणं द्रवत्वस्य सुवर्णे सत्त्वात् सुवर्णं तैजसमिति सङ्क्षेपः।

वायुत्व[1]सामान्यवान् वायुः। स च द्विविधः, नित्यानित्यभेदात्। नित्यः परमाणुलक्षणः। अनित्यः कार्यलक्षणः। स च चतुर्विधः, शरीरेन्द्रियविषयप्राण-भेदात्। शरीरं वायुलोके प्रसिद्धम्। इन्द्रियं स्पर्शग्राहकं त्वक्। विषयो वृक्षादिकम्पजनकः। प्राणः शरीराभ्यन्तरसञ्चारी वायुः। स च पञ्चस्थानभेदात् पञ्चविधः, प्राणापानव्यानोदानसमान इति।

> हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
> उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः।। इति।

स च वायुः शाखाकम्पादिनानुमेयः, स च न प्रत्यक्षः, उद्भूतरूपाभावात्। आत्मान्यप्रत्यक्षत्वावच्छिन्नं प्रत्युद्भूतरूपस्य हेतुत्वात्, वायुस्तदभावान्न प्रत्यक्ष इति प्राञ्चः।

नव्यास्तु चाक्षुषप्रत्यक्षं प्रत्येवोद्भूतरूपस्य हेतुत्वं, स्पार्शनप्रत्यक्षत्वा-वच्छिन्नं प्रति महत्त्वसमानाधिकरणोद्भूतस्पर्शवत्त्वेन हेतुत्वम्। वायौ स्पार्शनप्रत्यक्षं भवत्येव, वायुं स्पृशामीति प्रतीतेः। न चेयं स्पर्शविषयिणी प्रतीतिस्तस्या वायु-विशेष्यकत्वं न स्यादिति सङ्क्षेपः।

अथ चतुर्णां भूतानामुत्पत्तिविनाशक्रमः कथ्यते। महेश्वरसंजिहीर्षावशात् परमाणुक्रिया ततः परमाणुद्वयविभागः। विभागात् पूर्वसंयोगनाशस्ततो द्व्यणुकनाशः, द्व्यणुकनाशात् त्र्यणुकनाश इत्यादिक्रमेण ब्रह्माण्डान्तपर्यन्तविनाशः, एवं जलतेजो-वायुनाशः। त्र्यणुकादीनां समवायिकारणनाशाद् विनाशः। अत्र द्व्यणुकनाशस्थले चासमवायिकारणनाशस्यावश्यकत्वात् त्र्यणुकादीनामप्यसमवायिकारणविनाशाद् विनाश इत्यपरे। एवं यदा करुणानिधानेश्वरस्य सिसृक्षावशाद् जीवादृष्ट-सहकृतपरमाणौ क्रिया ततः परमाण्वाकाशविभागः। ततः पूर्वसंयोगनाशस्ततो द्व्यणुकारम्भकसंयोगस्ततो द्व्यणुकोत्पत्तिः, ततस्त्र्यणुकोत्पत्तिरिति। एवं क्रमेण महती पृथिवी[2] महज्जलं महत्तेजः महान्वायुरित्यादिक्रमेण ब्रह्माण्डान्तोत्पत्तिरिति।

---

१. रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम्। कालादावतिव्याप्तिवारणाय स्पर्शवत्त्वपदं, पृथिव्यादावतिव्याप्तिवारणाय रूपरहितत्वपदम्।

२. क.ख. उभयोः महती पृथिवीति पाठो नोपलभ्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दगुणमाकाशम्, शब्दग्राहकमिन्द्रियं तु कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। कालो दिग्विपरीतपरत्वापरत्वानुमेयः। कालकृतपरत्वापरत्वयोर्दिग्विपरीतत्वमेवं सन्निहिते वृद्धे दिक्कृतापरत्वयोग्ये कालकृतं परत्वं प्रतीयते। एवं विप्रकृष्टयूनि दिक्कृतपरत्वयोग्ये कालकृतमपरत्वं प्रतीयत इति सङ्क्षेपः। प्राच्यादिव्यवहारकारणं दिक्। सुखादिसमवायिकारणमात्मा। स चाहं सुखीत्यादिप्रतीत्या प्रत्यक्षसिद्धः। निस्पर्शमणु मन इति।

अथ गुणा[1] उच्यन्ते। ते च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिरेव। अत्र गुणत्वजातिमान् गुणः। न च गुणादीनां निर्गुणत्वात्कथं चतुर्विंशतिसंख्या प्रोक्तेति वाच्यम्, एकार्थसमवायप्रत्यासत्त्या सामान्ये सदिति प्रत्ययेन सत्तावद् अत्रापि संख्याया स्वीकारात्। चक्षुर्ग्राह्यो विशेषगुणो रूपं, तच्च शुक्लनीलपीतरक्तकृष्णकपिलचित्रभेदात् सप्तविधम्। तच्च सप्तविधमपि रूपं पृथिव्यामेव। अभास्वरं शुक्लं जले, शुक्लभास्वरं तेजसि। रसनग्राह्यो गुणो रसः। स च मधुरकटुकतिक्ताम्ललवणकषायभेदात् षड्विधः। षड्विधोऽपि रसः पृथिव्यामेव, जले तु मधुर एव। चित्ररसोऽपि स्वीकार्यः मधुरकटुकपरमाण्वारब्धद्व्यणुकादिक्रमेणारब्धावयविनोनीरसत्वे रसप्रत्यक्षं न स्यादिति सङ्क्षेपः।

घ्राण[2]ग्राह्यो गुणो गन्धः। स च द्विविधः—सुरभिरसुरभिश्च, पृथिवीमात्रवृत्तिः। त्वगिन्द्रियग्राह्यो विशेषगुणः स्पर्शः। स च पृथिवीजलतेजोवायुवृत्तिः। रूपादिचतुष्टयं पाकजं पृथिव्यामेव। जलादावपाकजमिति। एवं रूपादिस्पर्शान्तमुद्भूतं सत् प्रत्यक्षम्। अनुद्भूतमप्रत्यक्षम्। उद्भूतत्वं न जातिः, शुक्लत्वादिना सङ्करप्रसङ्गात्; किन्तु अनुद्भूतत्वरूपं जात्यभावः। परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशो जातिसङ्करः। एकत्वादिव्यवहारहेतुः संख्या। सा च द्विविधा—नित्याऽनित्या च। तत्रैकत्वं नित्यगतं नित्यमनित्यगतमनित्यम्। द्वित्वादिकं नित्यानित्यगतमपेक्षाबुद्धिजन्यं सर्वत्रानित्यमेव। मानव्यवहारासाधारणं कारणं परिमाणम्। तच्चतुर्विधम्—अणु महद् दीर्घं ह्रस्वञ्चेति। पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। संयुक्तव्यवहारहेतुः संयोगः। स त्रिविधः—एकतरकर्मजः, उभयतरकर्मजः, संयोगजसंयोगश्चेति। एकतरकर्मजो यथा पक्षिपर्वतयोः संयोगः। उभयतरकर्मजो यथा मल्लमेषयोः संयोगः। संयोगजसंयोगो यथा हस्ततरुसंयोगात् कायतरुसंयोगः। विभक्तप्रत्ययहेतुर्विभागः। स च संयोगवत्त्रिविधः।

---

१. ख. कर्मभिन्नत्वे सति निर्गुणत्वे सति द्रव्याश्रयत्वं गुणस्य लक्षणमिति।

२. घ्राणग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। रूपादावतिव्याप्तिवारणाय घ्राणग्राह्यत्वमिति। गन्धत्वादावतिव्याप्तिवारणाय गुणत्वपदमिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परापरव्यवहारकारणे परत्वापरत्वे, ते तु द्विविधे कालकृतदिक्कृते च। कालकृतं परत्वं ज्येष्ठे, अपरत्वं कनिष्ठे। दूरस्थे दिक्कृतं परत्वं सन्निहिते दिक्कृतमपरत्वम्।

आद्यपतनासमवायिकारणं गुरुत्वम्। तच्च चक्षुःसंयुक्तसमवाये सत्यपि न प्रत्यक्षं तस्यातीन्द्रियत्वम्। आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। तच्च द्विविधम्—सांसिद्धिकं नैमित्तिकञ्चेति। तत्र सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादौ तेजसि सुवर्णादौ। स्नेहत्वजातिमान् स्नेहः। जलमात्रवृत्तिः। घृतादौ चिक्कणता तु तदन्तर्वर्त्तिजलगतस्नेहादेव।

[१]शब्दत्वजातिमान् शब्दः। आकाशविशेषगुणो वा शब्दः। स द्विविधः—ध्वन्यात्मको वर्णात्मकश्चेति। तत्र ध्वन्यात्मको भेर्यादौ, वर्णात्मकस्ताल्वोष्ठपुट-व्यापारजन्यः संस्कृतभाषादौ। अर्थप्रकाशो बुद्धिः। सा च स्मृत्यनुभवभेदाद् द्विविधा। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः। अनुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमिति-शाब्दभेदात्। तत्र षड्विधमपि प्रत्यक्षं द्विविधम्, सविकल्पकनिर्विकल्पकभेदात्। निरूपितमेतदनुपदमिति। सुखत्वजातिमत् सुखम्। तद् द्विविधमैहिकं पारलौकि-कञ्च। ऐहिकं स्त्रीपुत्रपौत्रादिजन्यम्। पारलौकिकं स्वर्गादिः। उभयमपि धर्मजन्यम्। तच्चानुकूलं सर्वेषाम्। दुःखत्व[२]जातिमद्दुःखम्। तदपि द्विविधम्—ऐहिकं पुत्रादिशोकजन्यम्, अन्यं यमलोकादियातनाजन्यम्। तच्च सर्वेषां प्रतिकूलवत्त्वाच्चा-धर्मजन्यम्। इच्छात्वजातिमतीच्छा। सा द्विविधा—उपायेच्छा फलेच्छा चेति। उपायेच्छां प्रति फलेच्छा कारणमिति। अन्येच्छानधीनेच्छाविषयत्वं फलत्वम्। द्वेषत्वजातिमान् द्वेषः। द्वेषः क्रोधः। प्रयत्नत्वजातिमान् प्रयत्नः। स त्रिविधः, प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात्। प्रवृत्तिस्तु धर्माधर्मजनिका क्रिया। तस्या इष्टसाधनताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं कृतिसाध्यताज्ञानञ्च कारणम्। निवृत्तिं प्रति इष्टसाधनताज्ञानं द्वेषश्च कारणम्। जीवनयोनिप्रयत्नस्त्वतीन्द्रियः। स च जीवनान्यथानुपपत्त्या कल्प्यत इति यावज्जीवनमस्ति अधिकश्वासोच्छ्वा-सादिरूपशरीरसञ्चारस्तु प्रयत्नं विना न सम्भवति। तेन तदनुमानमिति। विहितकर्मजन्यो धर्मः। स च भोगात् कर्मनाशादिजलस्य स्पर्शात् कीर्तनाद् वा नाश्यः, धर्मः क्षरति कीर्तनादिति वचनाच्चेति सङ्क्षेपः। अधर्मो निषिद्धकर्मजन्यः। स च दुःखोत्पादकः, नरकजनकश्चेति सोऽपि प्रायश्चित्तादिनाश्यः।

---

१. वैशेषिकसूत्रोपस्कारेण शङ्करमिश्रेण शब्दः द्रव्यमिति मतमुपस्थाप्य तत्खण्डितम्। श्रोत्रग्रहणयोग्योऽर्थः शब्द इति। अर्थात् श्रोत्रेन्द्रियमात्रग्राह्यत्वे गुणत्वं शब्दस्य लक्षणम्। आकाशस्य विशेषगुणत्वं वा शब्दस्य लक्षणम्।

२. प्रतिकूलवेदनीयं दुःखम्। यथा एका एव नारी पुत्रादीनां कृते अनुकूलवेदनीयत्वात् सुखस्वरूपा, संन्यासिनां कृते प्रतिकूलवेदनीयत्वाद् दुःखस्वरूपा विद्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ धर्माधर्मयोर्भोगादिनाश्यत्वात् तत्त्वज्ञानिनः कथं न भोगः। अत्रोच्यते— प्रारब्धेतरकर्मणां ज्ञाननाश्यत्वाभ्युपगमात्। प्रारब्धं तु शरीरारम्भकं कर्म, तत्तु भोगनाश्यम्। अत एव—

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।। इति।

प्रारब्धेतरकर्म तु ज्ञाननाश्यमत एव—

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।। इति।

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ।। इति च साधु सङ्गच्छते।

संस्कारस्त्रिविधः, वेगभावनास्थितिस्थापकभेदात्। वेगाख्यसंस्कारो द्विविधः— कर्मजो वेगजश्च। वेगः पृथिव्यप्तेजोवायुमनोवृत्तिः। यत्र नोदनजनितकर्मणा वेगो जन्यते स कर्मजः। यत्र तु वेगवतावयवेन अवयविनि वेगो जन्यते स वेगजवेगः। स्थितिस्थापकस्तु कुण्डलितपत्रादीनां मोचने सति पूर्वावस्था स्थितिस्थापकजन्या। भावनाख्यसंस्कारस्तु आत्मनिष्ठः, स च स्मृतिं प्रति कारणमिति।

कर्मत्वजाति[१]मत्कर्म तच्चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि। एवकारो भ्रमणादीनां कर्माधिक्यव्यवच्छेदार्थः। भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनानां गमनान्तर्भावादिति नाधिक्यम्।

नित्यत्वे सति अनेकसमवेतं सामान्यम्। तत्सामान्यं त्रिविधम्—परमपरं परापरञ्चेति। परं सत्ता, अपरं घटत्वादिकम्, परापरं द्रव्यत्वपृथिवीत्वादिकमिति।

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव। नित्यद्रव्याणां सदृशानां जलपरमाणूनां मुक्तात्मनाञ्च परस्परं भेदबुद्धिजनका विशेषाः। ते पुनः स्वत एव स्वस्वरूपभेदबुद्धिजनकाः। अत्र शिरोमणयः—यथा स्वस्वरूपभेदजनका विशेषास्तथा परमाणवोऽपि स्वस्वरूपभेदबुद्धिजनका इति किमर्थमतिरिक्तपदार्थान्तरकल्पनयेत्याहुः।

अ[२]युतसिद्धानामाधाराधेयभूतानामिहेति प्रत्ययहेतुः सम्बन्धः समवायः। तत्प्रमाणं तु रूपवानिति विशिष्टबुद्धिविशेषणविशेष्यसम्बन्धविषयकविशिष्टबुद्धित्वाद् दण्डीति विशिष्टबुद्धिवद् इत्यनुमानमभ्युपेयम्। स चैको नित्यश्च। न च तस्यैकत्वे वायौ रूपसमवायसत्त्वाद् वायौ रूपवत्ताप्रतीतिः स्यादिति वाच्यम्,

---

१. गुणभिन्नत्वे सति कर्मानाश्रयत्वे सति समवायसम्बन्धेन द्रव्यवृत्तित्वं कर्मणः लक्षणम्।

२. ययोर्द्वयोर्मध्ये एकमविनश्यद् अपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा घटकपालौ, पटतन्तू इति। नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रूपाभावादेव तत्प्रतीतेरभावात्। जले स्नेहसमवायो न गन्धसमवाय इत्यादि-प्रतीतिरेव। समवायस्य नानात्वे प्रमाणमिति समवायत्वं त्वखण्डोपाधिरिति शिरोमणिचरणाः। पदार्थान्तराघटितत्वे सति जातिभिन्नधर्मत्वमखण्डोपाधित्वम्। समवायत्वं नित्यसम्बन्धत्वमिति प्राञ्चः।

अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्। स चाभावो द्विविधः, संसर्गाभावा-न्योन्याभावभेदात्। तत्र संसर्गाभावस्त्रिविधः, प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात्। तत्रानादिः सान्तः प्रागभावः। सादिरनन्तः प्रध्वंसः। नित्यसंसर्गाभावोऽत्यन्ताभावः। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः। अत्रायमर्थः—संयोग-सम्बन्धेन घटवति भूतले समवायसम्बन्धेन घटवति कपाले च घटान्योन्याभावस्य सत्त्वात्। तादात्म्यसम्बन्धेन घटवति घटान्योन्याभावस्यासत्त्वात्। तादात्म्यसम्बन्ध एवान्योन्याभावस्यं प्रतियोगितावच्छेदकसम्बन्ध इति। पटादौ च घटतादात्म्याभावात् पटादौ च पटतादात्म्याभावादन्योन्याभावसत्त्वादिति सङ्क्षेपः। बुद्धिरुपलब्धिर्ज्ञानमिति पर्यायः। सा च बुद्धिः प्राग्व्याख्याता। अन्तरिन्द्रियं मनः, प्रवृत्तिर्यागादिक्रिया सा जगद्व्यवहारहेतुः। दोषो रागद्वेषमोहादिः। राग इच्छा प्रीतिरिति यावत्। द्वेषो मन्युःशब्देन क्रोधो मोहो मिथ्याज्ञानं मृतस्य पुनरुत्पत्तिः प्रेत्यभावः इति प्राञ्चः। ज्ञातस्य हि ध्रुवो मृत्युरिति भगवद्वाक्याद् भूत्वा प्रैतीत्यर्थः। प्रेत्यभाव उत्पन्नस्य नाश इति नव्याः। स च पूर्वदेहनिवृत्तिरपूर्वदेहान्तरप्राप्तिरिति यावत्। फलं भोगः सुखदुःखसाक्षात्काररूपः। दुःखं पीडा। अपवर्गो[1] मोक्षः, स चैकविंशतिभेद-भिन्नदुःखस्य ध्वंसः। एकविंशतिदुःखानि तु षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः शरीरं सुखं दुःखं चेति। अत्र सुखस्यापि दुःखसंवलितत्वात् सुखमपि दुःखमेव, मधुविषसम्पृक्तान्नभोजने मध्वपि विषसम्पृक्तत्वाद्विषमेवेतिवत् सुखमपि दुःख-संवलितत्वाद् दुःखमेव। स पुनरपवर्गः कथमुत्पद्यत इति चेत्, अत्रोच्यते—शास्त्रा-दवगतपदार्थतत्त्वस्य विषयदोषदर्शनाद् वैराग्ययुक्तस्य ध्यानासक्तस्य मोक्षार्थिनो ध्यानपरिपाकवशादेव सकलक्लेशहीनस्य निष्कामकर्मानुष्ठानाद् धर्माधर्माननुत्पाद-यतः पूर्वोपात्तधर्माधर्मान् योगाभ्यासवशाद् विदित्वा तत्तद्भोगयोग्यकायव्यूहं विधाय तत्तद्भोगं भुञ्जानस्य प्रारब्धकर्मजन्यशरीरनाशे सति एकविंशतिदुःखात्यन्तिक-दुःखध्वंसो भवति। स एव मोक्ष इति प्राञ्चः।

नव्यास्तु आत्यन्तिकदुःखध्वंसो मोक्षः। आत्यन्तिकत्वं[2] स्वसमानाधिकरण-दुःखप्रागभावासमानकालीनत्वम्। तथा च दुःखप्रागभावासमानकालीनं यद्दुःखं तस्य

---

१. ख. दुःखात्यन्तिकनिवृत्तिर्मोक्षः।

२. ख. अत्रात्यन्तिकत्वमिति पाठः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वंसो मोक्षः। आधुनिकदुःखध्वंसेऽतिव्याप्तिवारणाय दुःखप्रागभावासमानकालीनेति दुःखविशेषणं न तु दुःखध्वंसविशेषणम्। तेन चरमदुःखप्रागभावासमानकालीनोपान्त्यदुःखध्वंसे नातिप्रसङ्गः। उपान्त्यदुःखस्य तु चरमदुःखप्रागभावसमानकालीनत्वात्। शुकमुक्तावव्याप्तिवारणाय स्वसमानाधिकरणेति। स्वं दुःखध्वंसः, वा शुकदुःखध्वंसः चरमदुःखं वा तस्यास्मदीयदुःखप्रागभावसमानकालीनत्वेऽपि स्वसमानाधिकरणशुकदुःखप्रागभावासमानकालीनत्वान्न दोषः। स्वसमानाधिकरणदुःखासमानकालीनदुःखध्वंसो मोक्ष इत्युक्ते सुषुप्तिकालीनदुःखध्वंसेऽतिव्याप्तिः। दुःखप्रागभावस्य दुःखध्वंससमानकालीनत्वान्न दोषः। परे त्वविद्यानिवृत्तिर्मोक्षः। तदर्थस्तु तत्त्वज्ञानादविद्यानिवृत्तौ जातायां रागद्वेषादिदोषनाशः, दोषनाशे प्रवृत्तिनाशः, प्रवृत्तिनाशे जन्मनाशः, जन्मनाशे दुःखनाशः, दुःखनाश एव मोक्षः। तथा च न्यायसूत्रम्—दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायात्तदनन्तरापायादपवर्गः। अत्र मिथ्याज्ञानशब्देनाविद्या सूत्रार्थस्तूक्तप्राय इति प्रमेयं व्याख्यातम्।

एकस्मिन् धर्मिणि विरुद्धानेककोटिकं ज्ञानं संशयः। स त्रिविधः। एको विशेषदर्शनाभावे सति समानधर्मदर्शनजन्यः। स्थाणुर्वा पुरुषो वेति। द्वितीयस्तु विशेषदर्शनाभावे सति विप्रतिपत्तिजन्यः। यथानेकचिच्छब्दो नित्य इत्युक्तम्, परेणोक्तमनित्यमिति विप्रतिपत्तौ जातायां मध्यस्थस्य शब्दो नित्यो न वेति संशयः। तृतीयस्त्वसाधारणधर्मजन्यो यथा नित्यादाकाशादेर्व्यावृत्तेन पुनरनित्याज्जलादेर्व्यावृत्तेन गन्धवत्त्वेन विशेषदर्शनाभावे सति किमियं भूर्नित्या उतानित्येति च संशय इति यमुद्दिश्य पुरुषः प्रवर्तते तत्प्रयोजनम्। तच्च सुखं दुःखाभावो वा..... तदर्था हि सर्वेषां प्रवृत्तिः। वादिप्रतिवादिनोर्निश्चयविषयो दृष्टान्तः[२]। यथा—यत्र वह्न्यभावस्तत्र धूमाभाव इति, यथा ह्रद इति। प्रामाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः। स चतुर्विधः—सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तश्चेति। तत्र सर्वतन्त्रसिद्धान्तो यथा धर्मिमात्रसद्भाव इदमंशे वर्तमानत्वम्, सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति सर्वशास्त्रकाराणां सिद्धान्त इत्यर्थः। प्रतितन्त्रसिद्धान्तो यथा नैयायिकस्य मन इन्द्रियं तत्समानतन्त्रे वैशेषिके सिद्धम्। अधिकरणसिद्धान्तो यथा क्षित्यादिकर्तृत्वेनेश्वरसिद्धौ तस्य सर्वज्ञत्वसिद्धिः। अभ्युपगमसिद्धान्तो यथा नैयायिकानां शब्दस्य नित्यानित्यविचारे

१. ख. वादिप्रतिवादिनोर्निश्चयविषयो दृष्टान्तः। स च द्विविधः, अन्वयव्यतिरेकिदृष्टान्तभेदात्। अन्वयदृष्टान्तो यथा यत्र धूमस्तत्र वह्निः, यथा महानस इति। व्यतिरेकदृष्टान्तो यथा यत्र वह्न्यभावस्तत्र धूमाभाव इति, यथा ह्रद इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवतु तावच्छब्दो गुण इति। अनुमानवाक्यैकदेशावयवा:। ते च प्रतिज्ञादय: पञ्च। तथा च न्यायसूत्रम्—''प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा:। तत्र साध्यविशिष्ट-पक्षप्रतिपादकं वचनं प्रतिज्ञा, यथा पर्वतो वह्निमानिति। पञ्चम्यन्ततृतीयान्तहेतुप्रति-पादकं वचनं हेतु:। यथा धूमादिति धूमेन वा। सव्याप्तिकं दृष्टान्तवचनमुदाहरणम्। यथा यो यो धूमवान् सोऽग्निमान् यथा महानस इति। पक्षे व्याप्तिविशिष्टहेतूपसंहार उपनय:। यथा वह्निव्याप्यधूमवानयमिति। पक्षे साध्योपसंहारो निगमनम्। यथा तस्माद् वह्निव्याप्यधूमवत्त्वाद् वह्निमानिति। तस्मात्तथेति वा। अत्रावयवशब्देनावयवा इवावयवा:, न त्वनुमानवाक्यस्य समवायिकारणम्। अनुमानवाक्यस्य शब्दात्मक-त्वेनाकाशसमवेतत्वात्। व्याप्यारोपेण व्यापकारोपस्तर्क:, अनिष्टप्रसञ्जनं वा तर्क:। अस्यायमर्थ:—यद्ययं पर्वतो निर्वह्नि: स्यात् तदा निर्धूमोऽपि स्यादिति धूमाभावव्याप्यवह्न्यभावारोपेण धूमाभावारोप इत्यनिष्टप्रसञ्जनमपि। इत्थं चायं तर्कोऽनुमानानुग्राहक:, निर्णयो निश्चयात्मकं ज्ञानम्। तच्च प्रमाणानां फलम्। तत्त्वबुभुत्सो: कथा वाद:। स चाष्टनिग्रहस्थानानामधिकरणम्। ते च न्यूनाधिकाप-सिद्धान्तहेत्वाभासाश्च पञ्चेति[१] निग्रहा:। उभयसाधनवती विजिगीषो: कथा जल्प:। परपक्षे दूषिते सति स्वपक्षसाधनावसानो वा जल्प:। असौ सर्वनिग्रहस्थानामधि-करणम्। स्वपक्षस्थापनाहीनापरपक्षदूषणावसाना कथा वितण्डा। पूर्वपक्षसिद्धान्तप्रति-पादकवाक्यसमूह: कथा। ये तु पक्षधर्मत्वादिरूपाणामेकेनापि रूपेण हीना हेतुवदाभासमानास्ते हेत्वाभासास्ते तूक्ता:। अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरेण दूषणाभिधानं वाक्छलम्, तथा हि नवकम्बलोऽयं देवदत्त इति नूतनाभिप्रायेण प्रयुक्तस्य नवशब्दस्यार्थान्तरेण वाक्यं कश्चिद् दूषयति। नास्य नवकम्बला: सन्ति, दरिद्रत्वात्, एकोऽप्यस्य दुर्लभ: कुतो नवकम्बला इति छलवादितया पराजीयते। असदुत्तरं जाति:। पराजयकारणं निग्रहस्थानम्। तच्च न्यूनाधिकमपसिद्धान्तार्थान्तरविरोधमतानुज्ञाप्रतिभादिभेदेनानन्तविधमपि विस्तरभिया न लिख्यते। स्वपक्षे दोषमनुद्धृत्य परपक्षे दूषणाभिधानं मतानुज्ञा। उत्तरस्या-प्रतिपत्तिरप्रतिभा। अत्रेदं प्रतिभाति यल्लक्षणमपि केवलव्यतिरेकिहेतुर्विशेष:। तत्र लक्षणेऽतिव्याप्त्यव्याप्त्यसम्भवादयो दोषा: सन्ति। तेऽपि हेत्वाभासादि-रूपत्वान्निग्रहस्थानेऽन्तर्भवन्ति। तथा हि अतिव्याप्तेर्दूषकताबीजं व्याप्यत्वासिद्ध:। यथा गोर्लक्षणं पशुत्वं, तत्र गोत्वनिरूपिता व्याप्ति: पशुत्वे सिद्धेति पशुत्वं व्याप्यत्वासिद्धम्। सोपाधिकञ्चेति[२] सास्नाशृङ्गत्वोपाधे: सत्त्वात्। अव्याप्तेर्दूषकताबीजं

१. ख. पञ्च वेति।
२. ख. सोपाधिकञ्चेति तत्रेति पाठ:।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भागासिद्धिः। सा च भागे हेतोरसिद्धः। यथा गोर्लक्षणं कपिलत्वम्, तच्चान्यगवि नास्ति। लक्ष्यैकदेशे लक्षणागमनमव्याप्तिरित्यव्याप्तेर्लक्षणमित्युक्तत्वात्। एवं लक्ष्ये [1]क्वाप्यवर्तमानमसम्भवः। सोऽपि स्वरूपासिद्धः। यथा गोर्लक्षणमेकखुरत्वमिति। तच्च कुत्रापि गवि नास्ति। एवमन्यान्यपि निग्रहस्थानानि बहूनि सन्ति, तथापि विस्तरभयान्न प्रदर्शितान्येतावतैव व्युत्पित्सोर्व्युत्पत्तिसम्भवादिति।

तैजपायसगोत्रेण श्रीमद्गोपालसूनुना।
हरिरायपण्डितेन निर्मिता तर्कचन्द्रिका ।।

वेदबाणमुनीन्द्वब्दे शुक्लभाद्रस्य सप्तमी।
अस्यां हरिरायेण निर्मिता तर्कचन्द्रिका ।। इति।

।। इति श्रीमत्पण्ड्यागोपालजीपुत्रेण, श्रीमत्पण्ड्याभगवतीदासकनिष्ठेन, श्रीपण्ड्याश्रीपतेर्ज्येष्ठेन श्रीहरिरायेण विरचिता तर्कचन्द्रिका ।।१।।

---

१. ख. क्वाप्यवर्तनमसम्भवः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्जीकरणसंख्या—६९८१/५७

सुसङ्ग्राह्याणि अभिनवप्रकाशनानि

१. **वेदान्तपरिभाषा** : वेदान्तविषयकोऽयं वादग्रन्थः श्रीमद्धर्मराजाध्वरीन्द्रप्रणीतो रामकृष्णाध्वरिकृत'**शिखामणि**'टीकया, स्वामिश्रीमदमरदासप्रणीत'**मणिप्रभा**'टीकया चोपेतः प्रो.पारसनाथद्विवेदिमहोदयस्य टिप्पण्यादिभिः, भूमिकया, अनुसन्धानात्मकपरिशिष्टैश्च सम्भूष्य सम्पाद्य च प्रकाशितः— ४००.००

२. **गाथासप्तशती (गाहासत्तसई)** : ग्रन्थोऽयं हालोपनामकमहाकविश्रीसातवाहनसङ्कलितः, भट्टश्रीमथुरानाथशर्मकृतया प्राकृतगाथासप्तशत्याश्छायारूपया **संस्कृतगाथासप्तशत्या, व्यङ्ग्यसर्वङ्कषा**ख्यव्याख्यया च विभूषितः सुसम्पाद्य प्रकाशितः— ४००.००

३. **कातन्त्रव्याकरणम्** : आचार्यशर्ववर्मप्रणीतो व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थः श्रीदुर्गसिंहकृताभ्यां **कातन्त्र-वृत्ति-टीकाभ्यां** श्रीमत्रिलोचनदासकृतया '**कातन्त्रवृत्तिपञ्जिका**'टीकया कविराजसुषेणशर्मकृतया '**कलापचन्द्र**'-टीकया, अथ च डॉ.जानकीप्रसादद्विवेदिकृतया **समीक्षया**, विवरणात्मिकया भूमिकया, अनुसन्धानात्मकपरिशिष्टैश्च सनाथीकृत्य सुसम्पाद्य प्रकाशितः— प्रथमो भागः ३५०.००
द्वितीयो भागः खण्डम्-१ ५००.००
द्वितीयो भागः खण्डम्-२ ६००.००

४. **सर्वानन्दकरणम्** : ज्योतिषशास्त्रस्य महनीयोऽयं ग्रन्थः पण्डितश्रीगोविन्द-आप्टेमहोदयेन विरचितः स्वोपज्ञव्याख्यया विभूषितश्च सुसम्पाद्य प्रकाशितः— १२०.००

५. **बृहदारण्यकवार्तिकसारः** : श्रीमद्विद्यारण्यस्वामिविरचितो वेदान्तशास्त्रीयोऽयं ग्रन्थो म.म.पण्डित-श्रीहरिहरकृपालुद्विवेदिविरचितेन हिन्दीभाषानुवादेन समलङ्कृत्य प्रकाशितः—
प्रथमो भागः २५०.००, द्वितीयो भागः २५०.००
तृतीयो भागः २४०.००, चतुर्थो भागः २७०.००

६. **रसगङ्गाधरः** : साहित्यशास्त्रीयोऽयं प्रौढो ग्रन्थः पण्डितराजजगन्नाथप्रणीतः श्रीनागेशभट्टकृतया '**गुरुमर्मप्रकाश**'व्याख्ययोपेतः सुसम्पाद्य प्रकाशितः— प्रथमो भागः १८०.००
द्वितीयो भागः ४८०.००

७. **पाश्चात्त्य-भारतीयराजनीत्योः समालोचनम्** : पण्डितराजश्रीराजेश्वरशास्त्रिव्याख्यानभूतः समालोचनात्मकोऽयं ग्रन्थः सुसम्पाद्य प्रकाशितः— भाग-१ ५००.००
भाग-२ ५५०.००

८. **मानवनीतिविवेचनम्** : प्रो.राधेश्यामधरद्विवेदिमहोदयेन प्रणीतो भारतीयसमाजनीतिमानवनीत्योश्च विश्लेषणात्मकोऽनुसन्धानात्मकोऽयं ग्रन्थः सम्यग्रूपेण सम्पाद्य प्रकाशितः— २८०.००

९. **भास्करी (द्वितीयं संस्करणम्)** : शैवदर्शनस्य महनीयोऽयं ग्रन्थः श्रीमदुत्पलाचार्यप्रणीतया **ईश्वर-प्रत्यभिज्ञाकारिकयोपेतः** श्रीमदाचार्याभिनवगुप्तविरचित'**विमर्शिन्या**'ख्यटीकया विभूषितः, तट्टीकाभूत-**भास्करी**व्याख्यया समलङ्कृत्य सम्पाद्य च प्रकाशितः— प्रथमो भागः १५०.००
द्वितीयो भागः १५०.००
तृतीयो भागः १८०.००

१०. **वर्णाश्रम शिक्षा-व्यवस्था तथा आधुनिक युग में उसकी उपयोगिता** : डॉ.सुभाषचन्द्रतिवारिमहोदयेन विरचितः शिक्षाशास्त्रस्यानुसन्धानात्मको विश्लेषणात्मकोऽयं ग्रन्थः सुसम्पाद्य प्रकाशितः— २००.००

११. **संस्कृतकथाकुञ्जः** : अभिनवकथानिगुम्फनपराणां स्वनामधन्यानां कथाकाराणामेकविंशतिसंख्याकाः कथाः सङ्कलय्य पण्डितश्रीशिवजी-उपाध्यायमहोदयैः, डॉ.शिवदत्तशर्मचतुर्वेदिमहाशयैश्च सम्पादितोऽयं ग्रन्थः प्रकाशितः— १३०.००

१२. **भवभूति की काव्यभाषा का शैली (रीति) वैज्ञानिक अध्ययन** : भाषावैज्ञानिकानुसन्धानात्मकोऽयं ग्रन्थः डॉ.व्रजभूषणत्रिपाठिमहोदयेन विरचितः सुसम्पाद्य प्रकाशितः— २६०.००

पत्रव्यवहारसङ्केतः— **निदेशकः**, प्रकाशनसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri